श्री

Shreemad Bhagvatam

सप्तमस्कंध ७

Saptama Skandha (7)

अथ

सप्तम स्कंधः

भा० स० श्रीगणेशाय नमः स्वभक्तपक्षपातेन तद्विपक्षविदारणं नृसिंहमद्भुतं वंदे परमानंदविग्रहं ऊतीः पंचादशाध्याये सप्तमे
१ वर्ण्यतेधुना ऊतीश्च वासना प्रोक्ता तत्र कर्मानुसारिणी अशुभा च शुभा चेति द्विधा सा हेतुभेदतः अशुभा महतां कोपाच्छुभा
महदनुग्रहात् हरेर्द्वारपयोर्यद्वद्वैकुंठेवसतोरपि चतुःसनकाद्विष्णुद्वेषादशुभवासना यथा हि दैत्यगर्भेपि प्रह्लादस्य ततः
स्थिरा नारदानुग्रहादास विसौसद्भक्तवासना स्वभक्तैश्च सदा विष्णुर्द्वेषतमपि रक्षति तृतीये प्रथमे ह्यस्याव करोदात्मसात्तु
नः अतोमनीषिणाध्यत्तः कार्यमहदनुग्रहे इत्येतदर्थमूतीनामत्र लक्षणमुच्यते त्वाद्यैर्दशभिर्दैत्येत्तसुत्रमतिभेद

रा० वा० समः प्रियः सुहृद्ब्रह्मन्भूतानां भगवान्स्वयं इंद्रस्यार्थे कथं दैत्यानवधीद्विषमो यथा १ नह्यस्यार्थैः
सुरगणैः साक्षान्निःश्रेयसात्मनः नैवासुरेभ्यो विद्वेषो नोद्वेगश्चागुणस्य हि २

तः महत्कोपानुकंपेस्य वासनाभेद उच्यते तद्वासनाच युज्यते कर्मभिः शुद्धचेतसः परैस्तु पंचभिस्तस्मात्क्रियते ध
र्मनिर्णयः तत्र तु प्रथमेध्याये हिरण्यकशिपोः सुते विष्णुभक्तौ विरोधस्तु द्विजशापत ईर्यते तदुक्तं श्वस्कंधांते हते
पुत्रादिति शक्रप्राणिंगारह्णेन विष्णुना मन्युनाशोकदीप्तेन ज्वलंती पर्यचिंतयादिति तच्छ्रुत्वा विस्मितः परीक्षित् पृच्छ
ति समः त्रिभिः न हि समस्य सुहृदश्च वैषम्यं नामास्ति न च प्रियस्य प्रीतिकर्तृषु वैषम्यं युक्तमित्यर्थः १ किंच यस्यार्थैः
प्रयोजनं सिध्यति स तत्पक्षपाती भवति येभ्यो बिभेति तान् द्वेष्टि दोषेण हंति न तु तस्यास्तीत्याह नहीति निःश्रेयसं परमानं
दस्वात्मा स्वरूपं यस्य असुरेभ्यो द्वेषो द्वेगो भयं नास्ति अतो विद्वेषोपि नास्त्येव तत्र हेतुः अगुणस्येति २ १

ति

भा० स० निर्हारं दाहार्थं नयनं अस्तं अस्ताचलं प्राप्तं २४ परिदेवितं रोदनं स्वपुर्य्यामेवाश्रुत्य श्रुत्वा तत्र स्वयमेवोपागतो यमस्ताना

८ ह अहोरित्यादिना २५ वयसा अस्मत्तोऽधिकानामपि लोकस्य विधिं जन्ममरणादिप्रकारं विपश्यतामपि विमोहमेवाह य

द्यस्मादव्यक्तादागतः तत्रैव गतमपार्थं शोचंतीति तदुक्तं गीतासु अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत अव्यक्तनि

एवं विलपतीनां वै परिगृह्य मृतं पतिं अनिच्छतीनां निर्हारमर्कोऽस्तं संन्यवर्त्तत २४ तत्र ह प्रेतबंधूनामाश्रु

त्य परिदेवितं आह तान् बालको भूत्वा यमः स्वयमुपागतः २५ यम उवाच अहो अमीषां वयसाधिकानां वि

पश्यतां लोकविधिं विमोहः यत्रागतस्तत्र गतं मनुष्यं स्वयं स्वधर्मा अपि शोचंत्यपार्थं २६ अहो वयं ध

न्यतमा यदत्र त्यक्ताः पितृभ्यां न विचिंतयामः अभक्ष्यमाणा अबला वृकादिभिः स रक्षिता रक्षति यो हि गा

व २ र्भे २७ यदृच्छयेशः सृजतीदमव्ययो य एव रक्षत्यवलुंपते च यः तस्याबलाः क्रीडनमाहुरीशितुश्चराच

रं निग्रहसंग्रहे प्रभुः २८

धनान्येव तत्र का परिदेवनेति किंच स्वयमपि स्वधर्मा मृतेन सह नानामृत्युलक्षणो धर्मो येषां तथाभूता अ

२६ अबलाद्दुर्बला अपि वृकादिभिरभक्ष्यमाणा वयं तत्र हेतुः यो नो गर्भे रक्षति स एव हि विश्वं रक्षति तोरक्षो

ति २७ ननु तस्य रक्षणे किं प्रयोजनं न किंचित् अपि किंतु क्रीडैव केवलमित्याह यदृच्छयेति विश्वं सृजति रक्ष

ति च भो अबलाः तस्येशितुश्चराचरं क्रीडासाधनमाहुः अत एव निग्रहे पालने च प्रभुः २८ ॥ ऽऽ ॥ ८

उपासत तत्समीपे आवृत्य स्थिताः २७ विशीर्णरत्नमयं कवचं यस्य विभ्रष्टानि आभरणानि स्रजश्च यस्य शरैर्
निर्भिन्नं हृदयं यस्य असृजा रक्तेन आविलं लिप्तं २८ प्रकीर्णाः केशा यस्य ध्वस्ते अक्षिणी यस्य रभसा संरंभेण दष्टो दंत
च्छदः ओष्ठो येन रजसा कुंठं आवृत्तं मुखांभोजं यस्य छिन्नमायुधं भुजश्च यस्य २९ तस्य पादयोरुपसमीपे आसमंता

उशीनरेषु भद्रा राजासुयज्ञ इति विश्रुतः सपत्नैर्निहतो युद्धे ज्ञातयस्तमुपासत २७ विशीर्णरत्नकवचं वि
भ्रष्टाभरणस्रजं शरनिर्भिन्नहृदयं शयानमसृगाविलं २८ प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदं ॥
रजःकुंठमुखांभोजं छिन्नायुधभुजं मृधे २९ उशीनरेंद्रं विधिना तथा कृतं पतिं महिष्यः प्रसमीक्ष्य दुः
खिताः हता स्म नाथेति करैः करो भृशं घ्नंत्यो मुहुस्तत्पदयोरुपापतन् ३० रुदंत्य उच्चैर्दयितांघ्रिपंक
जं सिंचंत्य अस्रैः कुचकुंकुमारुणैः विस्रस्तकेशाभरणाः शुचं नृणां सृजंत्य आक्रंदनया विलेपिरे ३१
अहो विधात्राकरुणेन नः प्रभो भवान्प्रणीतो दृगगोचरां दशां उशीनराणामसि वृत्तिदः पुरा कृतो धुनाये
न शुचां विवर्द्धनः ३२ त्वया कृतज्ञेन वयं महीपते कथं विना स्याम सुहृत्तमेन ते तत्रानुयानं तव वीर पादयोः शु
श्रूषतीनां दिश यत्र यास्यसि ३३

दपतन् ३० ३१ विलापमेवाह अहो इति द्वाभ्यां अकरुणत्वमेवाहुः दृशामगोचरां दशां येन भवान्प्रणीतो गमितः
तेन विधात्रा त्वमधुना शुचां विवर्द्धनः करोसीत्यन्वयः ३२ त्वया सुहृत्तमेन विना वयं कथं स्याम भवेम जीवेम अतः हे वीर
यत्र त्वं यास्यसि तत्र ते अनुगमनं तव पादयोः शुश्रूषां कुर्वतीनां अस्माकं दिशं देहि ३३ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ

भा०स०
७ तद्वयं कामादिनिमित्तं पापं हत्वा २९ ३० नर्हि वेणः किमिति नरके पातितः तीव्रध्यानाभावात् पापमफलि
तमित्याह कतमो पीति पुरुषं श्रीहरिं प्रीति पुरुषस्य कामासंभवात् भयादिभिश्चिंतयतां पंचानां मध्ये नैक
तमोपीत्युक्तं ३१ तदेवमितिहासप्रस्तावकथामुक्त्वा श्रीकृष्णशिशुपालस्य वैरानुबंधे को हेतुरित्यपेक्षाम
कामाद्द्वेषाद्भयात्स्नेहाद्यथाभक्त्येश्वरे मनः आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः २९ गोप्यः
कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः संबंधाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ३० कतमो
पि न वेणः स्यात्पंचानां पुरुषं प्रति तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत् ३१ मातृष्वसेयो व
श्चैद्यो दंतवक्रश्च पांडव पार्षदप्रवरौ विष्णोर्विप्रशापात्पदच्युतौ ३२ यु ष्ठि उ व कीदृशः
कस्य वा शापो हरिदासाभिमर्शनः अश्रद्धेय इवाभाति हरेरेकांतिनां भवः ३३ देहेंद्रियासु
व१ हीनानां वैकुंठपुरवासिनां देहसंबंधसंबद्धमेतदाख्यातुमर्हसि ३४
मेवेतिहासं वक्तुमाह मातृष्वस्रेय इति पदात्प्रच्यु ३२ हरिदासो अभिमृश[illegible]ति अभिभवतीति तथा
अश्रद्धेयः अनादरणीय इव असंभवात् भवो जन्म ३३ असंभवमेवाह जन्महेतुभूतैः प्राकृतैर्देहेंद्रिया
सुभिर्हीनानां शुद्धसत्त्वमयदेहानामित्यर्थः प्राकृतदेहसंबंधेन संबद्धमेतदाख्यानमाख्यातुमर्हसि ३४

यस्मिन्निबद्धोयमभिमानः तस्यदेहस्यवधाद्वधश्चयथातथायस्याभिमानोनास्ति अस्यपरमेश्वरस्य ३
हिंसाकेनहेतुनाकल्प्यते नकेनापि अभिमानाभावेहेतुः कैवल्यात् अद्वितीयेनाभिमंतव्याभावात् वैषम्याभा
वेहेतुः अखिलात्मनःसर्वात्मनइति तर्हिकिमितिहंतितत्राह परस्येति दमकर्तुःहितार्थंदंडंकरोतीत्यर्थः २४ यस्मा
द्भगवतोनिंदादिकृतंवैषम्यंनास्तितस्माद्येनकेनाप्युपायेनध्यायतस्तेनैवनिंदादिकृतपापस्यापिनाशात्तमायुज्यंयु

यन्निबद्धोभिमानोयंतद्वधात्प्राणिनांवधः तथानयस्यकैवल्यादभिमानोखिलात्मनः परस्यदमक
र्तुर्हिहिंसाकेनास्यकल्प्यते २४ तस्माद्वैरानुबंधेननिर्वैरेणभयेनवा स्नेहात्कामेनवायुंज्यात्कथंचिन्ने
क्षतेपृथक् २५ यथावैरानुबंधेनमर्त्यस्तन्मयतामियात् नतथाभक्तियोगेनइतिमेनिश्चितामतिः
२६ कीटःपेशस्कृतारुद्धःकुड्यायांतमनुस्मरन् संरंभभययोगेनविंदतेतत्स्वरूपतां २७ एवंकृष्णेभग
वतिमायामनुजईश्वरे वैरेणपूतपाप्मानस्तमापुरनुचिंतया २८

कमित्याशयेनाह तस्मादितिसप्तभिः नास्तिवैरंकेनापियस्मिन्तेनभक्तियोगेनेत्यर्थः युंज्यान्मनइतिशेषः
तस्मादेतैरुपायैःपृथङ्नेक्षेत २५ तेष्वपिवैरानुबंधःश्रेष्ठइत्याह यथेति नतथाभक्तियोगेनापीति २६ अत्र
दृष्टांतः कीटःपेशस्कृताभ्रमरेणसंरंभोद्वेषःभयंच तदेवयोगस्तेन २७ वैरेणयाअनुचिंतातयैव
धूतःपाप्मायेषांतेतंप्रापुः २८

भा०स० सर्वभूतानात्मभूतानामात्मभूतं कुतः समः स्वस्मैव पश्यतीति तथा तं अतः प्रशांतं द्वेषादिरहितं अत एवम
५ गवत्तेजसास्पृष्टं व्याप्तं उद्यमैः शस्त्रप्रहारादिभिः ४२ विश्रवसः सुतौ ४३ न्यहनत् हतवानित्यर्थः तर्हि तदेव

सर्वभूतात्मभूतं तं प्रशांतं समदर्शनं भगवत्तेजसास्पृष्टं नाशक्नोद्धंतुमुद्यमैः ४२ ततस्तौ रा
क्षसौ जातौ केशिन्यां विश्रवःसुतौ रावणः कुंभकर्णश्च सर्वलोकोपतापनौ ४३ तत्रापि राघवो भूत्वा
न्यहनच्छापमुक्तये रामवीर्यं श्रोष्यसि त्वं मार्कंडेयमुखात्प्रभो ४४ तावेव क्षत्रियौ जातौ मातृ
ष्वस्रात्मजौ तव । अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ ॥ ४५ वैरानुबंधतीव्रेण ध्यानेना
च्युतसात्मतां ॥ नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ॥ ४६ ॥ युधिष्ठिर उवाच ॥ विद्वेषो दयिते
पुत्रे कथमासीन्महात्मनि ब्रूहि मे भगवन्येन प्रह्लादस्याच्युतात्मता ॥ ४७ ॥ इति श्रीमद्भागवते महा
पुराणे सप्तमस्कंधे नारदयुधिष्ठिरसंवादे प्रथमोऽध्यायः ॥ १ ॥

कथनीयमिति तत्सूचकं प्रत्याह रामवीर्यमिति ४४ कृष्णचक्रेण हतमंहो ययोस्तौ तयोः पापमेव
हतं न तु तावित्यर्थः ४५ ४६ येन कारणेन प्रह्लादस्याच्युतात्मता अच्युते कचित्तत्वं तद्ब्रूहीति
[illegible] ॥ ४७ ॥ इति सप्तमे प्रथमः ॥ १ ॥ ५

९

३५ कथं भ्रतृणां चत्वा षट्‌त्वा हायनानि येषां ते अर्भा बालाः तदुक्तमायेषां ते पूर्वेषां मरीच्यादीनामपि दिग्वाससः
दिगंबराः अतः शिशून्मत्वा ३६ वासमपि नार्हथः कुतः पुत्र[illegible]वामिति च कारार्थः हे बालिशो अतो हेतोः श्री
प्रयातां ॥ ३७ वां युवयोस्त्रिभिर्जन्मभिः लोकाय स्वस्थानप्राप्तये कल्पतां तावता श्वयं शापः समाप्यतामिति पु

स्लो नारद उवाच ॥ एकदा ब्रह्मणः पुत्रा विष्णुलोकं यदृच्छया सनंदनादयो जग्मुश्चरंतो भुवनत्रयं ३५ पंच
षड्‌हायनार्भाभाः पूर्वेषामपि पूर्वजाः दिग्वाससः शिशून्मत्वा द्वास्थौ तान्प्रतिषेधतां ३६ अशपन्
कुपिता एवं युवां वासं न चार्हथः रजस्तमोभ्यां रहिते पादमूले मधुद्विषः पापिष्ठामासुरीं योनिं
तैः४ बालिशौ यातमाश्वतः ३७ एवं शप्तौ स्वभवनात्पतंतौ तौ कृपालुभिः प्रोक्तौ पुनर्जन्मभिर्वां त्रिभिर्लोकाय
कल्पतां ३८ जज्ञाते तौ दितेः पुत्रौ दैत्यदानववंदितौ हिरण्यकशिपुर्ज्येष्ठो हिरण्याक्षोनुजस्ततः ३९
हतो हिरण्यकशिपुर्हरिणा सिंहरूपिणा हिरण्याक्षो धरोद्धारे बिभ्रता शौकरं वपुः ४० हिरण्यकशि
पुः पुत्रं प्रह्लादं केशवप्रियं जिघांसुरकरोन्नाना यातना मृत्युहेतवे ४१

पुनः प्रोक्ताविर्त्यर्थः ३९ धरोद्धारे निमित्ते तन्निमित्ते घातो हतः ४० हिरण्यकशिपोर्वधे कार
णं सूचयति हिरण्यकशिपुः पुत्रमिति ४१ रामरामरामरामरामरामरा ॥ ३३ ॥ रामराम

द्वितीयेविष्णुरोषेणलोकंविज्ञाप्यदानवैः तद्धतभ्रातृहन्त्रादीनितिहासैरसान्त्वयत् भगवद्द्वेषएवतद्द्वेषेपिकारणं
मित्याशयेनाह भ्रातरीत्यादिना एवंदेवपक्षपातेन १ कोपेनउत्तप्रतिशयेनज्वलद्भ्यांशोकोपाभ्यांधूमेनैवधूम्रमम्बरंनि
रीक्षमाणः २ करालदंष्ट्राभियुक्तयाउग्रयादृष्ट्यादुःप्रेक्षंभ्रुकुटीयुक्तंमुखंयस्यसः ३ ४ ५ समेनापितपधाव
नारद उवाच ॥ भ्रातर्य्येवंविनिहतेहरिणाक्रोडमूर्त्तिना हिरण्यकशिपूराजन्पर्य्यतप्यद्रुषाशुचा १ आ
हेदंरुषापूर्णः संदष्टदशनच्छदः कोपोज्ज्वलद्भ्यांचक्षुर्भ्यांनिरीक्षन्धूम्रमम्बरं २ करालदंष्ट्रोग्रदृष्ट्या
दुष्प्रेक्ष्यभ्रुकुटीमुखः शूलमुद्यम्यसदसिदानवानिदमब्रवीत् ३ भोभोदानवदैतेया द्विमूर्द्धन्
त्र्यक्षशंबर शतबाहोहयग्रीवनमुचेपाकइल्वल ४ विप्रचित्तेममवचः पुलोमन्शकुनादयः शृ
णुतानंतरंसर्वेक्रियतामाशुमाचिरं ५ सपत्नैर्घातितः क्षुद्रैर्भ्रातामेदयितःसुहृत् पार्ष्णिग्राहेणहरि
णासमेनाप्युपधावनैः ६ तस्यत्यक्तस्वभावस्यघृणेर्मायावनौकसः भजन्तंभजमानस्यबालस्येवास्थि
रात्मनः ७ मच्छूलभिन्नग्रीवस्यभूरिणारुधिरेणवै रुधिरप्रियंतर्पयिष्येभ्रातरंमेगतव्यथः ॥ ८ ॥
नैर्भजनैः निमित्तभूतैः पार्ष्णिग्राहेणसता ६ एवंत्यक्तःस्वभावःसमत्वंयेन तस्यघृणेः शुद्धतेजोमयस्यापिमाय
यावनौकसः वाराहरूपस्यसतः अस्थिरात्मनः अव्यवस्थितचित्तस्य कुतः योयोभजतितंतंभजमानस्य अनुसरतः

७ तस्यरुधिरेणयावत्तर्पयिष्यामितावद्दुःखमुवंया
नेतितृतीयेनान्वयः ८

भा०स० ६

नचदेवैस्तद्वधःकारितः अतस्तैः किंनहन्तव्यंतेनतत्राह तस्मिन्नुरेकपदे अदिते प्रतिपद्ये कूरमीहितं यस्य
तिवा नष्टे अदृष्टे सति देवाः शुष्यंति स्वयमेव नाशं यास्यंति कुतः विष्णुरेव प्राणा येषां ९ तपोयज्ञादियुक्तान्
स्वदयध्वं इच्छात यतः १० ननु तैः किमपराधं तत्राह विष्णुरिति द्विजानां क्रिया अनुष्ठानं सम्स्थयस्य सः यतोऽसौ
यज्ञो धर्ममयश्च परायणं परम आश्रयः अतो यज्ञेरूपस्य विष्णोर्मूलत्वात् मामनादृत्य तेत दाश्रयणाच्चते

तस्मिन्कृष्टे द्विजे नष्टे कृत्तमूले वनस्पतौ [illegible] इवैं शुष्यंति विष्णुप्राणा दिवौकसः ९ तावद्धा हि १
तभुवं सर्वं विप्रछत्रसमेधितां स्वदयध्वं तपोयज्ञस्वाध्यायव्रतदानिनः १० विष्णुर्द्विजक्रियाम
लो यज्ञो धर्ममयः पुमान् देवर्षिपितृभूतानां धर्मस्य च परायणं ११ यत्र यत्र द्विजा गावो वेदा वर्णाश्र
मक्रियाः तंतंजनपदंयात संदीपयत वृश्चत १२ इति ते भर्तृनिर्देशमादाय शिरसा दृताः तथा प्रजा
नां कदनं विदधुः कदनप्रियाः १३ पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् खेटखर्वटघोषांश्च दद
हुः पत्तनानि च १४

सध्या इति भावः ११ तस्मात्परमं मंत्रं स्वरूते तिभाषत्याह यत्र यत्रेति संदीपयत दहत वृश्चत छेदं कुरुत १२ पु
रं हट्टादिमत् ग्रामं तद्रहितं व्रजो गवां वासः उद्यानं कृत्रिमं वनं क्षेत्रं व्रीह्यादेः आरामो कृत्रिमं वनं आश्रमं स्वषी
णंस्थानं आकरो रत्नादीनां खेटः कृषीवलानां वासः खर्वटो गिरिद्रोण्याश्रयो ग्रामः घोषः आभीराणां वासः पत्तनं

दशमस्कं ८४ ६

भा०स० एवं लोकदृष्ट्या शोकं निवार्य तत्त्वदृष्ट्या वारयति नित्य इति नित्यः मृत्युशून्यः अव्ययः अपक्षयशून्यः शुद्धः निर्मलः
७ सर्वगतः सर्ववित् सर्वज्ञश्च सर्वत्र हेतुः परो देहादिव्यतिरिक्तः अतो मृत इति कृश इति मलिन इति विच्युत इति अज्ञ इ
ति शोको न कार्य इत्यर्थः कथं तर्हि तस्य संसारः तत्राह धत्त इति आत्मनो मायया स्वाविद्यया लिंगं धत्ते गुणान् उच्चावचान् देहा
न् सुखदुःखादीन् वा विशेषेण सृजन् स्वीकुर्वन् लिंगशरीरोपाधिः संसार इत्यर्थः २१ एतत्सदृष्टांतं प्रपंचयति यथेति चतु

नित्य आत्माव्ययः शुद्धः सर्वगः सर्ववित्परः धत्तेसावात्मनो लिंगं मायया विसृजन् गुणान् २१ यथांभसा
प्रचलता तरवोऽपि चला इव चक्षुषा भ्राम्यमाणेन दृश्यते चलतीव भूः २२ एवं गुणैर्भ्राम्यमाणे मनस्यवि
कलः पुमान् याति तत्साम्यतां भद्रे ह्यलिंगो लिंगवानिव २३ एष आत्मविपर्यासो ह्यलिंगे लिंगभावना
एष प्रियाप्रियैर्योगो वियोगः कर्मसंसृतिः २४ संभवश्च विनाशश्च शोकश्च विविधः स्मृतः अविवे
कश्च चिंता च विवेकास्मृतिरेव च २५ अत्राप्युदाहरंतीममितिहासं पुरातनं यमस्य प्रेतबंधूनां संवादं तं निबो
धत २६

र्भिः तरवः प्रतिबिंबिताः उपाधिधर्मोपहिता भवंतीति दृष्टांतमुक्त्वा ग्राहकधर्मप्राप्त्येव भवंतीति दृष्टांतमाह चक्षु
षेति २२ अविकलः परिपूर्ण एव तत्साम्यतां मनःसमतामित्यर्थः २३ लिंगभावनात् देहाभिमानः एष आत्मनो विपर्या
सः अन्यथाभावः तमेवाह प्रियैर्वियोगः अप्रियैर्योगश्च कर्म च संसृतिश्च नानागर्भेषु प्रवेशः २४ ततश्च संभव उत्प
त्तिः विवेकस्यास्मृतिः अननुसंधानं २५ अत्रापि शोकहेतुं विना दृष्टैवायं शोक इत्यस्मिन्नर्थे प्रेतस्य मृतस्य तस्य ये ७

खनित्रैः खननसाधनैः आजीव्यान् शरणानि गृहान् १४ विप्रकृते उपद्रुते यज्ञभावानामभावात् दिवं परित्यज्य १५ तदेवं
प्रजानां कदनं दानवेषु कुर्वत्सु स्वयं स्वर्गराज्यादि साधयितुं तपस्तप्तुकामः प्रथमं यत्कृतवान् तदाह हिरण्यकशिपुरि
मं कटोदकं प्रेताय प्रदेयमुदकं आदिशब्दात् प्रेतश्राद्धं च १६ १७ १८ हे वध्व इति भ्रातुर्भार्यां संबोधयति १९

केचित्खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान् आजीव्यांश्छिछिदुर्वृक्षान् केचित्परशुपाणयः ॥ प्रादहन्
शरणान्यन्ये प्रजानां ज्वलितोल्मुकैः १४ एवं विप्रकृते लोके दैत्येंद्रानुचरैर्मुहुः ॥ दिवं देवाः परित्यज्य
भुवि चेरुरलक्षिताः १५ हिरण्यकशिपुर्भ्रातुः संपरेतस्य दुःखितः ॥ कृत्वा कटोदकादीनि भ्रातृपुत्रा
नसांत्वयत् १६ शकुनिं शंबरं धृष्टं भूतसंतापनं वृकं ॥ कालनाभं महानाभं हरिश्मश्रुमथोत्कचं ॥ १७ ॥ त
न्मातरं रुषाभानुं दितिं च जननीं गिरा ॥ श्लक्ष्णया देशकालज्ञ इदमाह जनेश्वरः ॥ १८ ॥ हिरण्यकशिपुरु
वाच ॥ अंबांब हे वधूः पुत्रा वीरं मार्हथ शोचितुं रिपोरभिमुखे श्लाघ्यः शूराणां वध ईप्सितः १९ भूतानामि
ह संवासः प्रपायामिव सुव्रते दैवेनैकत्र नीतानामुन्नीतानां स्वकर्मभिः २०

भवतु नाम तस्य श्लाघ्यो वधः तथाप्यस्माकं तावत्त्वं धुर्गत एवेति चेत्तत्राह भूतानामिति दैवेन प्राचीनकर्मणा
एकत्र नीतानां संयोजितानां पुनः स्वैः स्वैः कर्मभिरुन्नीतानां वियोजितानाम् २० रामराम ॥ ७ ॥

श्रीनारायणस्य गुणान् अनुग्रहनिग्रहादीन् प्रति महत्तं संशयं ३ भागवतस्य प्रह्लादस्य माहात्म्यं ४ कृष्णाय व्या
सायकृष्णं मुनिं नत्वेत्यर्थः ५ यस्मात्प्रकृतेः परः अतो निर्गुणः अतएवाव्यक्तः रागद्वेषादिनिमित्तभूतेंद्रियादिरहितः
सोपि स्वमायागुणं सत्वादिकं आविश्य अधिष्ठाय वाध्यान् प्रति यद्वा देवासुरादीनां यापरस्परं वाध्यवाधकत्तां ग
तः प्राप्तः तत्रहेतु अजीत इत्यर्थः तत्र गुणानां स्वीयत्वे सति प्राकृतपुरुषवद्विषमः स्यात् न तु तदस्तीत्याह सत्वमिति नते

इति नः सुमहाभाग नारायणसुरमान्प्रति संशयः सुमहान् जातस्तद्भवान् छेत्तुमर्हति ३ श्री क वाच
साधु पृष्टं महाराज हरेश्चरितमद्भुतं यद्भागवतमाहात्म्यं भगवद्भक्तिवर्द्धनं ४ गीयते परमं पुण्य
मृषिभिर्नारदादिभिः नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथां ५ निर्गुणोपि ह्यजोव्यक्तो भगवान् प्र
कृतेः परः स्वमायागुणमाविश्य वाध्यवाधकतां गतः ६ सत्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः न तेषां
युगपद्राजन् ह्रास उल्लास एव वा ७ जयकाले तु सत्वस्य देवर्षीन् रजसोसुरान् तमसो यक्षरक्षांसि तत्कालानु
गुणोभजत् ८ ज्योतिरादिरिवाभाति संघातान्न विविच्यते ९ स्वेषम्यायुक्तमधिष्ठानेनापि पक्षपातेन तद्वैषम्यं स्यादेव न तस्य
कालकृतत्वादित्याह नतेषामिति सार्द्धेन उल्लासो वृद्धिः ७ सत्वस्य जयकाले देवादीन् श्रभजत् तत्र देहं प्रविश्य वर्द्धयती
त्यर्थः रजसो जयकाले तमसो जयकाले इत्यन्वयः तस्य कालस्यानुगुणः सन् ८ समस्यापि निमित्तभेदेन वैषम्यं दृष्टं ततः ज्यो
तिर्यथा काष्ठादिषु जलं यथा पात्रेषु आकाशं यथा घटादिषु तथान्तर्नानारूपं भाति नन्वतर्हि तद्वैषम्यं विवेकेन प्रतीयते तत्राह

भा०स० तर्हि तान् भजन्तीति कुतो ज्ञायते तत्राह विदंतीति आत्मस्थं परमात्मानं कवयो निपुणाः मथित्वा कार्यदर्शनलिंगेन विचा
२ र्य जानंति अंततः स्वभावं केवलं निषेधेन विंदंतीति पाठे लभंते पि ज्ञानमेव अत्रापि ज्योतिरादिरिवेति दृष्टांतः यथा स्थ
र्य्यकांतादौ दाहदर्शनाज्ज्योतिर्ज्ञायते यथा च गंध दर्शनाद्वायुरित्यादि ९ तदेवं मायागुणवैषम्येन तत्कृतवैषम्यं न स्वाभा
विकमित्युक्तं तर्हि गुणपारतंत्र्यादनीश्वरत्वमाशंक्याह यदा आत्मनो जीवस्य भोगाय पुरः शरीराणि परः परमेश्वरः
भैव सिसृक्षुरिति तदा साम्येन स्थितं रजः पृथक् सृजति विचित्रासु पुरीषु रिरंसुः क्रीडितुमिच्छुः सत्वं पृथक् सृजति शयि

विदंत्यात्मानमात्मस्थं मथित्वा कवयोंततः ९ यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत्येष पृ
स्व२ थक् स्वमायया सत्वं विचित्रासु रिरंसुरीश्वरः शयिष्यमाणस्तम ईरयत्यसौ १० कालं चरं तं सृज
तीश आश्रयं प्रधानपुंभ्यां नरदेव सत्यकृत् य एष राजन्नपि काल ईशिता सत्वं सुरानीकमिवैधय
त्यतः तत्प्रत्यनीकानसुरान्सुरप्रियो रजस्तमस्कान् प्रमिणोत्युरुश्रवाः ११

ष्यमाणः संहरिष्यन् तमः पृथगीरयति प्रेरयति १० यदा सिसृक्षुरित्यादिनिर्देशात्प्रतीतं कालपारतंत्र्यं वारयन्प्रधा
नपुरुषपारतंत्र्यमपि वारयति कालमिति हे नरदेव प्रधानपुंभ्यां निमित्तभूताभ्यां सत्यकृत् अमोघकर्ता ईश्वर
स्तयोः सहकारित्वेनाश्रयभूतं चरं तं वर्त्तमानं कालं स्वयमेव सृजति स्वचेष्टारूपत्वात् कालस्य न पारतंत्र्यमित्यर्थः
तथापि प्रस्तुते किमायातं तत्राह यः एष कालोभिधयति अतो हेतोः ईशितापि ईश्वरोपि सत्वप्रधानं सुरानीकं देवस
मूहं एधयति इवेत्यर्थः तत्प्रत्यनीकान् सुरप्रत्यनीकान् सुरप्रतिपक्षान् प्रमिणोति हिनस्तीवेत्यन्वयः उरुश्रवाः कीर्त्ति

भा० स० पृथगवस्थानाभावेऽपि भिन्नत्वे दृष्टांतद्वयमाह यथानलो दारुष्वेवस्थितोपि दाहकत्वेन प्रकाशकत्वेन भि
६ न्न एव प्रतीयते यथा च देहगतोप्यनिलो नासिकादिषु पृथक्स्थित एव प्रतीयते देहस्थत्वेप्यात्मनस्तद्धर्म
योगाभावे दृष्टांतमाह यथा नभो न सज्जते क्वापि संगं न प्राप्नोति तथा पुमानपि सर्वेषां गुणानां देहेंद्रियादीना
माश्रयः तेषामाश्रितो वा परः पृथगेवेत्यर्थः ४२ किंच हे मूढाः यमनुशोचथ सोयं सुयज्ञो नन्वयं शेते न शेते कि

यथानलो दारुषु भिन्न ईयते यथानिलो देहगतः पृथक्स्थितः यथा नभः सर्वगतं न सज्जते
तथा पुमान्सर्वगुणाश्रयः परः ४२ सुयज्ञो नन्वयं शेते मूढा यमनुशोचथ यः श्रोता योनुवक्तेह
स न दृश्येत कर्हिचित् ४३ न श्रोता नानुवक्तायं मुख्योप्यत्र महानसुः यस्त्विहेंद्रियवानात्मा स चा
न्यः प्राणदेहयोः ४४

मिति शोचथ नन्वेतावंतं कालमसौ शृणोति अनंतरं प्रतिवक्ति च इदानीं तस्यादर्शनात् मृत इति शोचाम
इति चेत् सत्यं शोचनीयो न भवति प्रागपि तस्यादर्शनादित्याह यः श्रोतेति महान् सर्वेंद्रियचेष्टाहेतुः अत ए
व मुख्यः प्राणो वै मुख्य इति श्रुतेः के तर्हि वक्ता श्रोता च तत्राह यस्त्विह देहेंद्रियैस्तत्तदर्थद्रष्टा आत्मा स तु
प्राणदेहाभ्यामचेतनाभ्यामन्य एव चेतनः ४४
४३ ननु मुखनासिकासंचारी प्राणः श्रोता वक्ता च इष्ट एव नष्टो श्रोता वक्ता च अचेतनत्वादित्याह न श्रोतेति २
६

प्रभुत्वमेवान्वयव्यतिरेकाभ्यां दर्शयति पथीति दिष्टेन दैवेनेश्वरेणाविहतं अस्य हतः तेनोपेक्षितः ३९ तदे
देवमात्मनो जन्ममरणादिकमंगीकृत्येश्वराधीनत्वाच्छोकायोग्य इत्युक्तं इदानीं तु देहानामेव जन्मादि न त्वात्म
न इत्याह त्रिभिः भूतानि देहाः निजयोनिः स्वकारणभूतं लिंगशरीरं तन्निमित्तैः कर्मभिः भवंति जायंते न भवंति न
श्यंति च सर्वशः देवादिदेहा अपि तत्राह तदा प्रकृतौ देहे स्थितोप्यात्मा तस्या गुणैः देहधर्मैर्जन्मादिभिर्न वध्य
ते न युज्यते अतोन्यतमो देहादत्यंतविलक्षणः ४० न चाहं देहः स्थूल इत्यादौ न वैलक्षण्यं प्रतीयते तत्रा

पथि च्युतं तिष्ठति दिष्टरक्षितं गृहे स्थितं तद्विहतं विनश्यति जीवत्यनाथोपि तदीक्षितो वने गृ
स्य २ हेपि गुप्तोस्य हतो न जीवति ३९ भूतानि तैस्तैर्निजयोनिकर्मभिर्भवंति काले न भवंति सर्वशः ॥
न तत्र हात्मा प्रकृतावपि स्थितस्तस्या गुणैरन्यतमो न वध्यते ४० इदं शरीरं पुरुषस्य मोहजं यथा पृ
थग्भौतिकमीयते गृहं यथोदकैः पार्थिवतैजसैर्जनः कालेन जातो विकृतो विनश्यति ४१

ह इदं मोहजं अविवेकादात्मत्वेन ज्ञातं वस्तुतस्तु पृथगेव यतः ईयते दृश्यते भौतिकं च यथा गृहमित्यन्वयः अत्रैवं
प्रयोगः इदं शरीरं भौतिकाच्च पुरुषात् शरीरं भिन्नं दृश्यत्वात् भौतिकत्वाच्च यथा तथा विवेकिनश्चात्मत्वेनाभिमतमपि गृ
हं ततः पृथक्कृतं तद्वदिति भौतिकत्वानुमानं दृष्टान्तेनोक्त्वा स्वभावमुपसंहरति यथा अोदकैः परमाणुभिर्जातो बुद्बु
दः यथा च पार्थिवैर्जातो घटादिर्यथा च तैजसैर्जातः कुंडलादिर्विनश्यति तथा तैरेव त्रिविधैः परमाणुभिः जातो
जनो देह एव विकृतः परिणतः स विनश्यति न त्वात्मेत्यर्थः ४१

भा० स० १० स्वयंस्वधर्मोऽपीतियदुक्तंतत्रेतिहासमाह लुब्धकइत्यादिना पक्षिणामंतकः ईश्वरेणनिर्मितःसन् यत्रयत्र
तेपक्षिणः तत्रतत्रतान् प्रलोभयन्जालंविस्ताय्र्यतान् विधेविशेषेणधृतवान् पाठांतरेतेषामन्नकणादिभिःप्र
लोभनंकृतवानित्यर्थः ४९ कुलिंगःफंदभक्षीपक्षीविशेषः कुलिंगयोर्मिथुनं ५० शिंचस्तस्याजालसूत्रे सक्तान्

लुब्धकोविपिनेकश्चित्पक्षिणांनिर्मितोऽन्तकः वितत्यजालंविदधेतत्रतत्रप्रलोभनं ४९ कुलिं ५१
गमिथुनंतत्रविचरन्तसमभ्यपद्यत तयोःकुलिंगीसहसालुब्धकेनप्रलोभिता ५० सासज्जतशिंच
स्तस्यामहिषीकालयंत्रिता कुलिंगस्तांतथापन्नांनिरीक्ष्यभृशदुःखितः स्नेहादकल्पःकृपणःकृ
पणांपर्यदेवयत् ५१ अहोअकरुणोदेवःस्त्रियाकरुणयाविभुः कृपणंमामनुशोचंत्यादीनयाकिं
करिष्यति ५२ कामंनयतुमांदेवःकिमर्द्धेनात्मनोहिमे दीनेनजीवितादुःखमनेनविधुरायुषा
५३ कथंत्वजातपक्षांस्तान्मातृहीनान्बिभर्म्यहं मंदभाग्याःप्रतीक्षंतेनीडेमेमातरंप्रजाः
५४ एवंकुलिंगंविलपंतमाराद्प्रियावियोगातुरमश्रुकंठं सएवतंशाकुनिकःशरेणविव्याधकाल

ग्रस्तंप्राप्य आपन्नांआपदंप्राप्तां ५१ आकरुणयासर्वतोऽनुकंपया ५२ आत्म प्रहितोविलीनः ५५
नोदेहस्यार्द्धेन विधुरेणदुःखाभार्ययाशून्यजीवितेनानेनदुःखंयथाभवत्येवंजीवताकिंमेप्रयोजनं अतोमा
मपिकामंनयत्वित्यन्वयः ५३ नजाताःपक्षायेषांतान्कथंबिभर्मिपोषयामि ५४ शाकुनिकःपक्षिहं

गालितः सत ५१

१०

ननु चेतनत्वेऽन्यत्वे च तस्याहं कृशः स्थूलः काणो बधिर इत्यादि देहधर्मोपलब्धिः कुतस्तत्राह भूतेंद्रियमनो
भिर्लिंग्यते लक्ष्यंत इति तथा तान् देहान् तेभ्योऽन्य एव भजति अहमिति मन्यते तर्हि कथं मोक्षस्तत्राह तच्च भ
जनं स्वेन तेजसा विवेकबलेन उत्सृजत्यपि हि इत्यनुभवं प्रमाणयति ४५ ननु विवेकानंतरमपि प्रारब्धकर्म
वशात्पुनर्बंधः स्यादेवेत्यत आह यावल्लिंगशरीरेणान्वितः तदभिमानवानात्मा भवतीति तावदेव तस्य तत्क
र्मनिबंधनं बंधहेतुर्भवति ततो विपर्ययः देहधर्माभिमानः ततः क्लेशश्चानुवर्त्तते ननु लिंगाभिमाने निवृत्तेऽपि

भूतेंद्रियमनोलिंगान् देहानुच्चावचान्विभुः भजत्युत्सृजति ह्यन्यस्तच्चापि स्वेन तेजसा ४५ यावल्लिं
गान्वितो ह्यात्मा तावत्कर्मनिबंधनं ततो विपर्ययः क्लेशो मायायोगोनुवर्त्तते ४६ वितथाभिनिवेशोयं
यद्गुणेष्वर्थदृग्वचः यथा मनोरथः स्वप्नः सर्वमैंद्रियकं मृषा ४७ अथ नित्यमनित्यं वा नेह शोचंति
तद्विदः नान्यथा शक्यते कर्तुं स्वभावः शोचतामिति ४८

यतोऽयं मायायोगो विपर्ययादिर्मायया युज्यत इति तथा न परमार्थ इत्यर्थः ४६ ननु सुखदुःखादीनां तत्साध
नानां च सत्यत्वप्रतीतेः कुतो मायामयत्वं तथा बहवो वादिनः सत्यत्वमेव वदंति तत्राह वितथो मिथ्या अयं तो
ऽयमभिनिवेशः कोसौ गुणेषु तत्कार्येषु सुखादिषु अर्थः पुरुषार्थ इति दृक्च वचश्चेति यत् कुत इत्यत आह यथेति ॥
४७ उपसंहरति अथेतस्मान्नित्यमात्मानमनित्यं देहं वा तद्विदः नित्यमनित्यं च ज्ञानेन तः नन्वेवमुपदेष्टारोऽपि
शोचंतो दृश्यंते तत्राह नान्यथेति अज्ञानद्राढ्याभावात् स्वभावो न निवर्त्तत इत्यर्थः ४८

भा० स० ऊर्द्ध्वो वाह्वयस्य नभसि दृष्टिर्यस्य पादांगुष्ठेनाश्रिता अवनिर्येन २ जटानां दिधितिभिः कांतिभिः अंशुभिः र
११ श्मिभिः प्रत्ययकर्त्तो अर्कोदयवद्राजे पूर्वं यं अलक्षिताः संतो विचेरुस्ते देवाः पुनः स्थानानि भेजिरे ३ तपोमयो जल
सेकादिक्रियया निर्वाधः विध्यगिरिरितः सर्वतः प्रसृतः सन् ४ द्वीपैरद्रिभिश्च सहिता अस्त्रं चलिता ५ ६ तवव
सते येसंदरुद्ध्रोणयां नपः परमद्युरुगाम् ऊर्द्ध्ववाहुर्नभो दृष्टिः पादांगुष्ठाश्रितावनिः २ जटादिधिति
भीरेजे संवर्त्तार्कोदयांशुभिः तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे ३ तस्य मूर्द्ध्नः समुद्भूतः सधूमा
ग्निस्तपोमयः तिर्यगूर्द्ध्वमधो लोकान् तपद्विंध्यगिरिरितः ४ चुक्षुभुर्नद्युदन्वंतः सद्वीपाद्रिश्च चा
लभूः निपेतुः सग्रहास्तारा जज्वलुश्च दिशो दश ५ तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं ययुः सुराः धा
त्रे विज्ञापयामासुर्देवदेव जगत्पते ६ दैत्येंद्रतपसा तप्ता दिवि स्थातुं न शक्नुमः तस्य चोपशमं
प्रभो मन विधेहि यदि मन्यसे लोका न यावन्नंक्ष्यंति वलिहारास्तव अभिभो ७ तस्यायं किल संकल्पश्चरतो दु
श्चरं तपः श्रूयतां किं न विदितस्तवाथापि निवेदितं ८ लिहारः करप्रदाः पूजाकारिण इति वा अभिभव
नीत्यभिभुः हे अभिभो सर्वाधिपते पाठांतरे भो इति संबोधनं अभिअभितो यावन्नंक्ष्यंतीति संबंधः ७ ब्रह्म
णस्तस्मिन् दोषमुत्पादयितुं तत्संकल्पमाह तस्येति चतुर्भिः अथाप्यस्माभिर्निवेदितं वेयाश्रूयतां ८ ॥ ५५ ११

आत्मापायं स्वमत्युं ॥५६॥ अयथोत्थितं मिथ्यैवाविर्भूतं ॥५७॥ सांपरायिकं परलोककृत्यं ॥५८॥ अशोच्यते ति पाठे आ
ऽगम आर्ष ॥ स्वःपरइत्यभिनिवेश एवाज्ञानं तेन विना ॥५९॥ सस्नुषा स्नुषया सहिता ॥६०॥ इति सप्तमे द्वितीयः ॥२॥

एवं स्वयमपश्यंत्यस्त्रात्मापायमबुद्धयः ॥ नैनं प्राप्स्यथ शोचंत्यः पतिं वर्षशतैरपि ॥५६॥ हिरण्यकशि
पुरुवाच ॥ बाल एवं प्रवदति सर्वे विस्मितचेतसः ॥ ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितं ॥५७॥ यम एत
दुपाख्याय तत्रैवांतरधीयत ॥ ज्ञातयोपि सुयज्ञस्य चक्रुर्यत्सांपरायिकं ॥५८॥ ततः शोचत मा यूयं परं
चात्मानमेव च ॥ क आत्मा कः परो वात्र स्वीयः पारक्य एव वा ॥ स्वपराभिनिवेशेन विनाज्ञानेन दे
हिनां ॥५९॥ नारद उवाच ॥ इति दैत्यपतेर्वाक्यं दितिराकर्ण्य सस्नुषा ॥ पुत्रशोकं क्षणात्त्यक्त्वा त त२
त्वे चित्तमधारयत् ॥६०॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे द्वितीयोध्यायः ॥२॥ नारद उवा
च ॥ हिरण्यकशिपू राजन्नजेयमजरामरं ॥ आत्मानमप्रतिद्वंद्वमेकराजं व्यधित्सत ॥१॥

तृतीये तस्य तपसा तप्तं त्रैलोक्यं जगाद्विधिः आगत्य विस्मितस्तेन संस्तुतः स वरानदात् तदेवं साधूनां कदने
दानवानां द्विष्य वधूनां शोके तत्त्वनिरूपणेनापनीय पहृतवान् तदाह हिरण्यकशिपुरित्यादिना अप्रतिद्वंद्वं प्र
तिपक्षरहितं एकराजं एकमेव राजानं व्यधित्सत कर्तुमैच्छत् १

भा० स० वाल्मीकादिभिः प्रतिछन्नं प्रथमं न ददर्श पश्चात्कथंचिद्विलक्ष्य तं प्राहेति द्वयोरन्वयः आचीर्णं समंताद्भक्षितं मेद
१२ स्त्वङ्मांसं च शोणितं च यस्य अभ्रैरपिहितं छन्नं रविमिव विलक्ष्य हृत्सारं धैर्यं दंशैर्मक्षिकाविशेषैर्भक्षि
तो देहो यस्य निरंबुः निषिद्धमंबु येन सः अनेन व्यवसायेन च त्वावज्जितोहं तपोनिष्ठेन भवताहं तत्राजितः

न ददर्श प्रतिछन्नं वाल्मीकतृणकीचकैः १७ पिपीलिकाभिराचीर्णं मेदस्त्वङ्मांसशोणितं तपं
तं तपसा लोकान् यथाभ्रापिहितं रविं विलक्ष्य विस्मितः प्राह प्रहसन् हंसवाहनः ब्रह्मोवाच उत्ति
ष्ठोत्तिष्ठ भद्रं ते तपःसिद्धोसि काश्यप वरदोहमनुप्राप्तो व्रियतामीप्सितो वरः अद्राक्षमहमेतं तेह
त्सारं महदद्भुतं दंशभक्षितदेहस्य प्राणा ह्यस्थिषु शेरते २० नैतत्पूर्वर्षयश्चक्रुर्न करिष्यंति चापरे नि
रंबुर्धारयेत्प्राणान्को वै दिव्यसमाः शतं २१ व्यवसायेन तेनेन दुष्करेण मनस्विनां तपोनिष्ठेन भवता
अ ३ जितोहं दितिनंदन २२ ततस्त आशिषः सर्वा ददाम्यसुरपुंगव मर्त्यस्य ते अमर्त्यस्य दर्शनं नाफलं मम
२३ नारद उवाच इत्युक्त्वादिभवो देवो भक्षितांगं पिपीलकैः कमंडलुजलेनौक्षद्दिव्येनामोघराधसा स त
त्कीचकवल्मीकात्सह ओजोबलान्वितः सर्वावयवसंपन्नो वज्रसंहननो युवा उत्थितस्तप्तहेमाभो
है। विभावसुरिवैधसः स निरीक्ष्यांबरे देवं हंसवाहनमवस्थितं ननाम शिरसा भूमौ तद्दर्शनमहोत्सवः २५

अमर्त्यस्य मम दर्शनं सफलं न भवति आदौ भव भवतीति भावः औक्षत् प्रोक्षितवान् वज्रवत्संहननं अंगदा
र्ढ्यं यस्य तप्तस्य हेम्न इव आभा यस्य तस्य दर्शनमेव महानुत्सवो यस्य हर्षेणाश्रुपुलकोद्गमश्च यस्य २४ १२

श्री

तपोयोगयोः समाधिनानिष्ठया सर्वधिस्ण्येभ्यः श्रेष्ठं निजासनं सत्यलोकं तथाऽध्यास्तेऽधितिष्ठति ९ तत्रैवा
त्मनः साधयिष्यामि न तु ब्रह्मणा श्रुतिदीर्घायुषा तपस्तप्त्वा तत्साधितं अन्यः कुतस्तत्साधयेत्तत्राह कालात्म
नोऽरिति यद्यथाऽऽयुषोऽल्पत्वेन देहो वा रथो वा रंभ्रियेत तथापि कालस्यात्मनश्च नित्यत्वात्त्वद्रूभिर्जन्मभिस्त
पात तत्साधयिष्याम्येवे १० वर्द्धमानेनेतियदुक्तं तस्य फलमाह अन्यथेति सुरादिर्यत्त्वयेनाऽयथापूर्वं पुण्य

स्रष्टा चराचरमिदं तपोयोगसमाधिना अध्यास्ते सर्वधिस्ण्येभ्यः परमेष्ठी निजासनं ९ तदहं
वर्द्धमानेन तपोयोगसमाधिना कालात्मनोश्च नित्यत्वात्साधयिष्ये तथात्मनः १० अन्यथेदं विधास्ये
ऽहमयथापूर्वमोजसा किमन्यैः कालनिर्धूतैः कल्पांते वैष्णवादिभिः ११ इतिशुश्रुमनिर्बंधं तपः परम
मास्थितः विधत्स्वानंतरं युक्तं स्वयं त्रिभुवनेश्वर १२ तवासनं द्विजगवां पारमेष्ठ्यं जगत्पते भवा
यश्रेयसे भूत्यै क्षेमाय विजयाय च १३ इति विज्ञापितो देवैर्भगवानात्मभूर्नृप परीतो भृगुदक्षा
द्यैर्ययौ दैत्येश्वराश्रमं १४

यापादिर्यत्त्वयेन इदं जगद्विधास्यामि वैष्णवादिभिः ध्रुवादिपदैः किं प्रयोजनं अतस्तदेव साधयिष्या
मि १२ इति त्वत्पदापहरणे तस्य निर्बंधः शुश्रुम अतएवासौ तपः परमास्थितः यदत्र युक्तं तदनंतरमेव विधत्स्व
अन्यथा तवस्थानं भ्रंशो साधूनामनिष्टं स्यादिति शोचंत आहुः तवेति पारमेष्ठ्यमिदमासनं द्विजानां गवां च भवायोद्भवाय श्रेय

भा० स०
१२

रुद्रानीयज्ञप्रवर्तकत्वेनांतर्यामित्वेन जगत्पालकत्वमाह त्वमेव सप्ततंतून् अग्निष्टोमादियज्ञान् विस्तारयसि क
यत्र्या तन्वा वेदत्रयरूपेण कथंभूतया चत्वारो होतारो यत्र तच्चतुर्होत्रकं कर्म तद्विषया विद्यया आत्मवतां प्राणि
नामात्मभूतस्त्वमेवांतरात्मा च अंतर्यामी कुतः यतः कविः सर्वज्ञः तत्कुतः एकः अखंडः तत्र हेतुः अनादिः अनं
तपारश्चेति नास्त्यंतः कालतः पूर्वं च देशतो यस्य सः ३१ कालरूपेण संहर्तृत्वमाह त्वमेवेति लवाद्यैरवयवैः क्षिण
षि क्षपयसि तदेवं स्रष्ट्र्यादिकर्तृत्वेऽपि निर्विकारत्वमेवाह कूटस्थ इति तत्र हेतवः आत्मा ज्ञानरूप परमेष्ठी पर

त्वं सप्ततंतून् वितनोषि तन्वा त्रय्या चतुर्होत्रकविद्यया च त्वमेक आत्मात्मवतामनादिरनंतपारः क
विरंतरात्मा ३१ त्वमेव कालोऽनिमिषो जनानामायुर्लवाद्यावयवैः क्षिणोषि कूटस्थ आत्मा परमेष्ठ्यजो
महांस्त्वं जीवलोकस्य च जीव आत्मा ३२ त्वत्तः परं नापरमप्यनेजदेजच्च किंचिद्व्यतिरिक्तमस्ति विद्याः
ह १ कलास्ते तनवश्च सर्वा हिरण्यगर्भोऽसि बृहत्त्रिपृष्ठः ३३

मेष्ठः अजः जन्मशून्यः महान् अपरिच्छिन्नः किंच जीवलोक एव कर्मवशाज्जन्मादिभिर्विक्रियते त्वं तु तस्य जीवः
जीवनस्य हेतुः यतस्तस्य हेतुः येतस्तस्यात्मा नियंता ३२ तत्कुतस्तत्राह त्वत्तः इति त्वत्तो व्यतिरिक्तं यदि किंचिद्भ
वेत् तर्हि तस्मात्तव जन्मादिविकारो नियम्यत्वादिकं चाभवेत् त्वत्तः परं कारणं अपरं कार्यं तत्र वैयक्तरूपं गमनं
निजं तस्थावरं च व्यतिरिक्तं नास्ति बोधकं शास्त्रं व्यतिरिक्तमस्तीति चेत्तन्न यतः विद्या वेदोपवेदादिविद्यास्त्वा नानिक
लाश्च तदंगानि ते तव तनवः न त्वद्व्यतिरिक्ताः तत्कुतः यतः इह त्वं ब्रह्मैवासि तदपि कुतः तत्राह हिरण्यरूपं ब्रह्मांडं गर्भो

यस्य सः त्रिपृष्ठः त्रिगुणात्मकस्य प्रधानस्य पृष्ठपरतः स्थितः अक्षरात्परतः पर इत्यादिश्रुतेः ३३

२६ अंधेन निविडेन तत्र हेतुः कालसृष्टेन प्रकृतिगुणरूपेण नतु ध्वांतेन तमसावृतमिदं जगत् यः अभिव्यनक्
अभिव्यक्तमकरोत् २७ यस्त्रिगुणेनात्मनाइदं सृजति अवति लुंपति तस्मै रजःसत्वतमसां धाम्ने आश्रयाय म
हते पराय परमेश्वराय नम इति द्वयोरन्वयः २८ तत्र च स्वप्रकाशकत्वं जगत्प्रकाशकत्वं तत्कारणत्वं तत्स्रष्ट्रादि
कर्तृत्वं महत्वं परमेश्वरत्वं चेति षड्विधमुक्तं तदेवं प्रपंचयन्नमस्करोति नम इत्यादि चतुर्भिः बीजाय का
रणाय तत्र हेतुः आद्यायानां ज्ञप्तिः विज्ञानं विषयाकारं ज्ञानं ते मूर्त्तिर्यस्य तस्मै अनेन स्वप्रकाशकत्वं च दर्शितं बीजायेति

उत्थाय प्रांजलिः प्रह्व ईक्षमाणो दृशा विभुं ॥ हर्षाश्रुपुलकोद्भेदो गिरा गद्गदयागृणात् ॥२६॥ हिरण्यकशिपु
रुवाच ॥ कल्पांते कालसृष्टेन योऽंधेन तमसावृतं अभिव्यनक् जगदिदं स्वयंज्योतिः स्वरोचिषा २७ आत्मना
त्रिवृता चेदं सृजत्यवति लुंपति रजःसत्वतमोधाम्ने पराय महते नमः २८ नम आद्याय बीजाय ज्ञानविज्ञानमूर्
तये प्राणेंद्रियमनोबुद्धिविकारैर्व्यक्तिमीयुषे २९ त्वमीशिषे जगतस्तस्थुषश्च प्राणेन मुख्येन पतिः प्रजानां चि
त्तस्य चित्तैर्मनइंद्रियाणां पतिर्महान्भूतगुणाशयेशः ३०

निमित्तत्वमुक्तं उपादानत्वं चाह प्राणेंद्रियायेति विकारास्तेरूपैर्व्यक्तिं कार्याकारं ईयुषे प्राप्तवते २९ एवमात्मना त्रिवृ
ता चेत्यनेनोक्तं कारणत्वं द्विधा दर्शितं महत्वमीश्वरत्वं चाह त्वमेव जगतो जंगमस्य तस्थुषः स्थावरस्य च ईशिषे नि
यंता भवसि केन मुख्येन प्राणेन सूत्रात्मरूपेण अतस्त्वं प्रजानां पतिः तासां चित्तस्य च चित्तैश्च तत्परिणामभूतायाश्चेत
नायाः मनसश्च तन्नियम्यानामिंद्रियाणां च पतिः अतस्त्वमेव महान् भूतानामाकाशादीनां तद्गुणानां शब्दादिविषया

भा०स० १४

चतुर्थे तु वरान्लब्ध्वा विजित्याखिललोकपान् विसृष्टद्वेषेणतान्सर्वान्दैत्येंद्रः समपीडयत् शतधृतिर्ब्रह्मा १
मम मतः यद्यपि मे दुर्लभाः २ अमोघः अनुग्रहो यस्य ३ यदर्थं तपस्तप्तं तदाह एवमित्यादिना ४ ५ ६ स

नारद उवाच ॥ एवंवृतः शतधृतिर्हिरण्यकशिपोरथ प्रादात्तांस्तपसा प्रीतो वरांस्तस्य सुदुर्लभान् १
ब्रह्मोवाच तातेमे दुर्लभाः पुंसां यान्वृणीषे वरान्मम तथापि वितराम्यंग वरान्यद्यपि दुर्लभान् २
ततो जगाम भगवानमोघानुग्रहो विभुः पूजितोऽसुरवर्येण स्तूयमानः प्रजेश्वरैः ३ एवं लब्धवरो दैत्यो
बिभ्रद्धेममयं वपुः भगवत्यकरोद्द्वेषं भ्रातुर्वधमनुस्मरन् ४ स विजित्य दिशः सर्वा लोकांश्च त्रीन्म
हासुरः देवासुरमनुष्येंद्रान्गंधर्वगरुडोरगान् ५ सिद्धचारणविद्याध्रान् ऋषीन्पितृपतीन्मनून्
यक्षरक्षपिशाचेशान्प्रेतभूतपतीनथ ६ सर्वसत्वपतीन्जित्वा वशमानीय विश्वजित् जहार लोकपा
लानां स्थानानि सहतेजसा ७ देवोद्यानश्रिया जुष्टमध्यास्ते स्म त्रिविष्टपं महेंद्रभवनं साक्षान्निर्मितं वि
श्वकर्मणा त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्द्धिमत् ८ यत्र विद्रुमसोपाना महामारकता भुवः
यत्र स्फटिककुड्यानि वैदूर्यस्तंभपंक्तयः ९

र्वेषां सत्वानां ये ये पतयस्तान् ७ त्रिविष्टपं स्वर्गं अध्यास्ते स्म अधितिष्ठवान् तत्र महेंद्रभुवनमध्युवास अधिव
सतिस्म ८ अखिलसमृद्धित्वमेवाह यत्रेति त्रिभिः ८

१४

वचना ४

ननु ब्रह्मांडशरीरस्य मम कुतो ब्रह्मत्वं कुतो ब्रह्मांडगर्भत्वादित्यत्राह व्यक्तं कार्य्यमिदं तव शरीरं व्यक्तं सत्यमिति वा येन
शरीरेण त्वमिंद्रियप्राणमनसां गुणान्नु विषयान्भुंक्ते किंतु पारमेष्ठ्ये परमैश्वर्ये धामनि स्वरूपे स्थित एव भुंक्ते न तु स्वरू
पतिरोधानेन अतस्त्वमव्यक्तः आत्मा निरुपाधि ब्रह्मैव पुराणपुरुषश्चेत्यर्थः ३४ ननु ब्रह्मत्वं पुराणपुरुषत्वं कथमेक
स्य तत्राह हे अनंत येन त्वया अव्यक्तेन मनोगोचरेण रूपेण इदं विश्वं ततं व्याप्तं तस्मै तुभ्यं भगवते अचिंत्यैश्वर्यायन

व्यक्तं विभो स्थूलमिदं शरीरं येनेंद्रियप्राणमनोगुणांस्त्वं भुंक्षे स्थितो धामनि पारमेष्ठ्ये अव्यक्त आत्मा पुरु
षः पुराणः ३४ अनंताव्यक्तरूपेण येनेदमखिलं ततं चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः ३५ य
स्प १ दि दास्यस्यभिमतान्वरान्मे वरदोत्तम भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो ३६ नांतर्बहिर्दिवा
नक्तमन्यस्मादपि चायुधैः न भूमौ नांबरे मृत्युर्न नरैर्न मृगैरपि व्यसुभिर्वासुमद्भिर्वा सुरासुरमहो
रगैः ३७ अप्रतिद्वंद्वतां युद्धे ऐकपत्यं च देहिनां सर्वेषां लोकपालानां महिमानं यथात्मनः तपोयोग
प्रभावानां यन्न रिष्यति कर्हिचित् ॥३८॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे तृतीयोध्यायः ॥३॥

नः भगवत्त्वे हेतुः चिच्छक्तिर्विद्या अचिच्छक्तिरविद्या याताभ्यां युक्ताय इति ३५ अन्यस्मात्त्वत्सृष्टव्यतिरिक्तादपि भ
गवतः आयुधैर्मा भूत् ३६ व्यसुभिः अप्राणैः असुमद्भिः सप्राणैः ३७ यथा आत्मनस्तव आस्ति तथा अप्रतिद्वंद्वतादिकं
देहीति शेषः तपसा योगेन च प्रभावो येषां तेषां यत् अणिमाद्यैश्वर्यं न रिष्यति न नश्यति तच्च देहीत्यर्थः ३८ ॥ ६६ ॥

भा० सं० आक्रीडं क्रीडास्थानं गुणान् पुष्पफलादीन् सर्वलोकपालानां पृथग्विधान् गुणान् क्षीरदहनशोषणादीनेकए
१५ वद्धार १८ निर्जिताः ककुभो येन यथोपयोपयोषमयथाप्रीति १९ २० २१ २२ २३ अरूपा वक्त्रीरहिता २४
द्रोला द्रोणीभिराक्रीडं सर्वर्तुषु गुणान् द्रुमाः दधार लोकपालानामेक एव पृथग्गुणान् १८ स एव निर्जित
ककुबेकराट् विषयान्प्रियान् यथोपयोषं भुंजानो नातृप्यदजितेंद्रियः १९ एवमैश्वर्यमत्तस्य दृप्त
स्योच्छास्त्रवर्तिनः कालो महान् व्यतीयाय ब्रह्मशापमुपेयुषः २० ततस्योग्रदंडसंविग्नाः सर्वे लोका
:सपालकाः अन्यत्रालब्धशरणाः शरणं ययुरच्युतं २१ तस्यै नमोस्तु काष्ठायै यत्रात्मा हरिरीश्व
रः यद्गत्वा न निवर्त्तंते शांता संन्यासिनोऽमलाः २२ इति ते संयतात्मानः समाहितधियोमलाः उपत
स्थुर्हृषीकेशं विनिद्रा वायुभोजनाः २३ तेषामाविरभूद्वाणी अरूपा मेघनिस्वना संनादयंती ककु
भः साधूनामभयंकरी २४ मा भैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः मद्दर्शनं हि भूतानां सर्वश्रे
योपपत्तये २५ ज्ञातमेतस्य दौरात्म्यं दैतेयापसदस्य यत् तस्य शांतिं करिष्यामि कालं तावत्प्र
त१ तीक्षत २६ यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु धर्मे मयि च विद्वेषः स वा आशु विनश्यति २७
ममदर्शनं श्रवणं सर्वेषां श्रेयसामुपपत्तये प्राप्तये २५ २६ २७ ॥ रामरामरामरामरामराम १५

मुक्तादामानिपरिछदाः परिकरायासां १० सुदतीः सुदंत्यः ११ ऊर्जितमधिकंचंडंतीव्रंशासनंयस्य १२ अंगाद्दैराजन
उरुगंधिनाउग्रगंधेनमधुनासुरयामत्तं अतएवविवृत्तेविघूर्णितेताम्रेआरक्तेएणीयस्यतं अशेषधिष्ण्यपाः सर्वलोकपाला

यत्रचित्रवितानानिपद्मरागासनानिच पयःफेननिभाःशय्यामुक्तादामपरिछदाः कूजंद्भिर्नूपुरैर्देव्यः
शब्दयंत्यइतस्ततः १० रत्नस्थलीषुपश्यंतिसुदतीःसुंदरंमुखं ११ तस्मिन्महेंद्रभवनेमहाबलो
महामनानिर्जितलोकएकराट् रेमेऽभिवंद्यांघ्रियुगः सुरादिभिः प्रतापितैरूर्जितचंडशासनः १२ त
मंगमत्तंमधुनोरुगंधिनाविवृत्तताम्राक्षमशेषधिष्ण्यपाः उपासतोपायनपाणिभिर्विनात्रिभिस्त
पोयोगबलौजसांपदं १३ जगुर्महेंद्रासनमोजसास्थितं विश्वावसुस्तुंबुरुरस्मदादयः गंधर्वसिद्धा
ऋषयोस्तुवन्मुहुर्विद्याधराश्चाप्सरसश्चपांडव १४ सएववर्णाश्रमिभिः क्रतुभिर्भूरिदक्षिणैः
इज्यमानोहविर्भागानग्रहीत्स्वेनतेजसा १५ अकृष्टपच्यातस्यासीत्सप्तद्वीपवतीमही तथाका
मदुघाद्यौस्तुनानाश्चर्यपदंनभः १६ रत्नाकराश्चरत्नौघास्तत्पत्न्यश्चोहुरूर्मिभिः हारसीधुघृतद्रो
द्दधिक्षीरामृतोदकाः १७

उपायनयुक्तैः पाणिभिरुपासत त्रिभिर्ब्रह्मविष्णुरुद्रैर्विना पदंआश्रयभूतं उपासनप्रकारमाह जगुरि
ति १४ १५ १६ तत्पत्न्योनद्यःऊहुः वहंतिस्म रत्नाकरानेवाह हारेति १७

भा०स०
१६
अधुनापि ते गुणा न पिधीयंते ते तिरोहिता न भवंति ॥ ३४॥ साधुगाथा सदसि साधुकथाप्रसंगवत्यां सभायां प्रतिमा
नं दृष्टांतं ॥ ३५॥ सूच्यते मया केवलं श्लोक्यते सुष्टु कथ्यते इति वा ॥ ३६॥ नैसर्गिकी रतेर्लिंगान्याह ॥ न्यस्तक्रीडनक इति
षड्भिः ॥ तन्मनस्तया तदेकतत्त्वेन ॥ ३७॥ एतानि आसनादीनि गोविंदपरिरंभितः ॥ आत्मना एकीकृतः ॥ ३८॥ रुदति रोदिति
यस्मिन्महद्गुणा राजन्गृह्यंते कविभिर्मुकुंदः ॥ न तेऽधुनापि धीयंते यथा भगवतीश्वरे ॥ ३४॥ यं साधुगाथास
दसि रिपवोऽपि सुरा नृप ॥ प्रतिगानं प्रकुर्वंति किमुतान्ये भवादृशाः ॥ ३५॥ गुणैरलमसंख्येयैर्माहात्म्यं त
स्य सूच्यते ॥ वासुदेवे भगवति यस्य नैसर्गिकी रतिः ॥ ३६॥ न्यस्तक्रीडनको बालो जडवत्तन्मयस्तया ॥ कृ
ष्णग्रहगृहीतात्मा न वेद जगदीदृशं ॥ ३७॥ आसीनः पर्यटन्नश्नन्शयानः प्रपिबन्ब्रुवन् ॥ नानुसंधत्त
एतानि गोविंदपरिरंभितः ॥ ३८॥ क्वचिद्रुदति वैकुंठचिंताशबलचेतनः ॥ क्वचिद्धसति तच्चिंताह्लाद उद्गाय
४२ ति क्वचित् ॥ ३९॥ नदति क्वचिदुत्कंठो विलज्जो नृत्यति क्वचित् ॥ क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकार ह
॥ ४०॥ क्वचिदुत्पुलकस्तूष्णीमास्ते संस्पर्शनिर्वृतः ॥ अस्पंदप्रणयानंदसलिलामीलितेक्षणः ॥ ४१॥
वैकुंठस्य चिंतया शबला व्यामिश्रा स्तुभिता चेतना यस्य तस्य चिंतयाह्लादो यस्य ॥ ३९॥ उत्कंठः समुत्कंठः तन्
अनुचकार तच्चेष्टादिकं स्वयं कृतवान् ॥ ४०॥ संस्पर्शस्तद्भावापत्तिः ॥ अस्पंदः स्थिरः यः प्रणयस्नेहमयः आनंदः तेन य
१६

ननु देवादिविद्वेषेण्यस्य विनाशो नास्ति ब्रह्मवरेणोर्जितत्वात् तत्राह॥ निर्वैरायेति सर्वं महं न सहे महमिति भावः॥
२५॥ अप्रस्तुसंत्वहत्तं मेनिरे॥ तदानीं तद्द्वेषस्य प्रवृत्तत्वादिति भावः॥२६॥ तदेवं हृष्यं पंवत्तुल्मादौ सुतस्य महत्वमाह॥ त
स्येत्यादिना गुणैर्महानभूत्॥ गुणानेवाह महदुपासक इत्यादिना॥३०॥ सत्यसंधा प्रतिज्ञा यस्य॥ एक एव प्रियश्च

निर्वैराय प्रशान्ताय स्वसुताय महात्मने॥ प्रह्लादाय यदा द्रुह्येद्धनिष्येपि वरोर्जितं॥२८॥ नारद उवाच॥
इत्युक्ता लोकगुरुणा तं प्रणम्य दिवौकसः॥ न्यवर्तन्त गतोद्वेगा मेनिरे चासुरं हतं॥२९॥ तस्य दैत्यप
तेः पुत्राश्चत्वारः परमाद्भुताः॥ प्रह्लादोऽभून्महांस्तेषां गुणैर्महदुपासकः॥३०॥ ब्रह्मण्यः शीलसंपन्नः
सत्यसंधो जितेन्द्रियः॥ आत्मवत्सर्वभूतानामेकः प्रियः सुहृत्तमः॥३१॥ दासवत्सन्नतार्याङ्घ्रिः पितृ
वद्दीनव स्निग्धो गुरुष्वीश्वरभावनः॥ विद्यार्थरूपजन्माढ्यो मानस्तम्भविवर्जितः॥३२॥ नोद्विग्न
चित्तो विषयेषु निस्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक्॥ दान्तेन्द्रियप्राणशरीरधीः सदा प्रशान्तकामो
रहितासुरोऽसुरः॥३३॥

सुहृत्तमश्च॥३१॥ सम्यक् नता आर्याणां अंघ्रयो येन॥ ईश्वर इति भावना यस्य॥३२॥ व्यसनेषु नोद्विग्नचि
त्तः गुणेषु विषयेषु निस्पृहः यतस्तेषु अवस्तुदृक्॥ दान्त इन्द्रियादयो यस्य॥ रहित आसुरभावो मत्सरादिर्ये

त्सलः भ्रातृवत्सदृशे २

भा०स० पंचमेगुरुतोधीतंत्यक्त्वाविष्णुस्तुतौरतं घातयनद्विपसर्पाद्यैःसुतंदैत्योनचाशकत १ भगवद्भक्तिरेववि
१७ द्वेषकारणमितितिरःकुमाह पौरोहित्येत्यादिनाकाव्यःशुक्रः अत्रतस्तस्यसुतौत्वन्यवसतामितिशेषः १
पाठ्यान् रटनीत्यादीन् पाठ्यानसुरबालकानितिवान्वयः २ अनुश्रवणानंतरंतथैवपपाठय किंतुतत्सा
श्रीनारद उवाच पौरोहित्यायभगवान्वृतःकाव्यःकिलासुरैः षंडामर्कौसुतौतस्यदैत्यराज
गृहांतिके १ तौराज्ञाप्रापितंबालंप्रह्लादंनयकोविदं पाठयामासतुःपाठ्यानन्यांश्चासुरबाल
कान् २ यत्तत्रगुरुणाप्रोक्तंशुश्रुवेनुपपाठच नसाधुमनसामेनेस्वपरासद्ग्रहाश्रयं ३ ए
कदासुरराट्पुत्रमंकमारोप्यपांडव पप्रच्छकथ्यतांवत्समन्यतेसाधुयद्भवान् ४ प्र ह्रा
द उवाच तत्साधुमन्येऽसुरवर्यदेहिनांसदासमुद्विग्नधियामसद्ग्रहात् हित्वात्मपातंगृहमं
धकूपंवनंगतोयद्धरिमाश्रयेत ५
छमेमेतत्रहेतुःस्वःपरइत्यसद्ग्रहः मिथ्याभिनिवेशएवआश्रयोयस्यतत् ३ ४ हेअसुरवर्य असद्ग्र
हात् अहंममेति मिथ्याभिनिवेशाद्धेतोः समुद्विग्नाधीर्येषांवनंगतःसन् हरिमाश्रयेतेतियत्त
देवाहंसाधुमन्ये कथंभूतंगृहंहित्वा आत्मनःपातं अधःपातनिमित्तं कुतः अंधकूपवन् मोहावहं ५ १७

आत्मनः परां निर्वृतिं तन्वन् दुःसंगेन दीनस्यान्यस्यापि मनः समं शांतिं व्यधात् ४२ अघं द्रोहमकरोत् ४३
प्रथमाध्यायांते पृष्टमेवार्थमतिविस्मयेन पुनः पृच्छति देवर्ष इति तव त्वत्तः तव वाक्यमिति वा साधवे अघमदात्
साधोर्द्रोहकृत्वानिति यत् एतद्वेदितुं ४४ उपालभंते आक्षिपंति अघं तु नैव कुर्वंति अपरः शत्रुरिव ४५ अ
स उत्तमश्लोकपदारविंदयोर्निषेवयाकिंचनसंगलब्धया तन्वन् परां निर्वृतिमात्मनो मुहुर्दुःसंगदी
नान्यमनः शमं व्यधात् ४२ तस्मिन्महाभागवते महाभागे महात्मनि हिरण्यकशिपू राजन्नकरोद
घमात्मजे ४३ ॥ युधिष्ठिर उवाच ॥ देवर्ष एतदिच्छामो वेदितुं तव सुव्रत यदात्मजाय शुद्धाय पितादा
त्साधवे ह्यघं ४४ पुत्रान्विप्रतिकूलान्स्वान्पितरः पुत्रवत्सलाः उपालभंते शिक्षार्थं नैवाघमपरो
यथा ४५ किमुतानुवशान्साधूंस्तादृशान्गुरुदेवतान् ॥ एतत्कौतूहलं ब्रह्मन्नस्माकं विधम प्रभो पितुः
पुत्राय यद्द्वेषो मरणाय प्रयोजितः ४६ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे चतुर्थोध्यायः ॥ ४ ॥
४७ तुवशान् अनुकूलान् साधून् अपगतरोषान् गुरुं पितरं देवतां येषां तात्वुपदिश्याघं न कुर्वंतीति किमु वक्तव्यमि
त्यर्थः पुत्राय पुत्रस्य प्रह्लादस्य पितुर्द्वेषः पित्रा कृतो द्वेषः पुत्रस्य मरणार्थं प्रयोजितः प्रवर्तित इति यत् एतत्कौतूह
लं धर्मे अर्थी कुरु यद्वा यद्यस्मात्पुत्राय यो द्वेषः स पितुर्मरणाय प्रयोजितः अत एव तत्कौतूहलं विधमेत्यर्थः ४६

भेदस्यासत्वं दर्शयन्नाह स एषः परमात्मैव स्वः पर इति च अविवेकिभिर्निरूप्यते युक्तं चैतत् यतः यस्य
वर्त्मनि जिज्ञासायां ब्रह्मादयो मुह्यंति तत्र हेतुः दुरत्ययं दुर्घरमनुक्रमणं अनुचरितमनुवर्णनं वा यस्य सः १३
ननु निर्विकारस्य कथं मतिभेदकत्वं तत्राह यथा अयो लोहं आकर्षस्य अयस्कांतस्य समीपे स्वयमेव भ्रमति चेतस्तु चक्र
पाणेः सन्निधिरेव कुतो जातस्तत्राह यदृच्छयेति केस्यचित्पोशनादेः फलमेतदिति न ज्ञायेत इत्यर्थः १४

स एष आत्मा स्वपरेत्यबुद्धिभिर्दुरत्ययानुक्रमणो निरूप्यते मुह्यंति यद्वर्त्मनि वेदवादिनो ब्रह्मादयो
ह्येष भिनत्ति मे मतिं १३ यथा भ्राम्यत्ययो ब्रह्मन्स्वयमाकर्षसन्निधौ तथा मे भिद्यते चेतश्चक्र
पाणेर्यदृच्छया १४ एतावद्ब्राह्मणायोक्त्वा विरराम महामतिः तं निर्भर्त्स्याथ कुपितः सदीनो राजसे
वकः १५ आनीयतामरे वेत्रमस्माकमयशस्करः कुलांगारस्य दुर्बुद्धेश्चतुर्थोस्योदितो दमः १६ दैत्ये
यचंदनवने जातोयं कंटकद्रुमः यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोऽर्भकः १७

राजसेवकत्वाच्चेति शेषः १५ वेत्रं कशां पापानामधेयं चतुर्थः दमो दंडः अस्य दुर्बुद्धेः उदितः उक्तः शास्त्रेषु दुर्बुद्धि
त्वे हेतुः कुलस्यांगारवन्नाशहेतोः १६ तदुक्तं तत्राह दैतेया एव चंदनद्रुमाः तेषां वने अयं कंटकद्रुमतुल्यो जातः
तदेवाह यस्य दैत्यवनस्य मूलोन्मूलने परशुस्थानीयस्य विष्णोरयमर्भक एव नालायितः नालमिवाचरन् यथा
परशोश्छेदकत्वेपि दंडादिनिर्मितो दंडः सहकारित्वं विना छेदनो संभवात् तथा अयं विष्णोर्दैत्यमूलच्छेदे हे

परपक्षेविस्नोसमाहिताः परिनिष्ठिताः हासमेवाह बुद्धिरिति ६ विष्णुपक्षैर्भागवतैः ननु त्वद्गृहे कुतस्तेषां प्र
वेशः सत्यं तथापि प्रतिछन्नैः ७ इत्येवं गृहमानीतं ८ वालानसर्वानतीत्यतुभ्यं त्वय ९ १० अहो मायया मो
हिता भवंतो मामाक्षिपंतीत्याशयेन तानवदाह परः स्वश्चेति मिथ्याभिनिवेशो यदीयया माययैव कृतः न तु वास्त

ना द वा श्रुत्वा पुत्रगिरो दैत्यः परपक्षसमाहिताः जहास वुद्धिर्वालानां भिद्यते परवुद्धिभिः ६
सम्यग्विचार्य्यतां वालो गुरुगेहे द्विजातिभिः विष्णुपक्षैः प्रतिछन्नैर्न भिद्येतास्य धीर्यथा ७ गृहमा
नीतमाहूय प्रह्लादं दैत्ययाजकाः प्रशस्य श्लक्ष्णया वाचा समपृछंत सामभिः ८ वत्स प्रह्लाद भ
द्रं ते सत्यं कथय मा मृषा वालानति कुतस्तुभ्यमेष वुद्धिविपर्य्ययः ९ वुद्धिभेदः परकृत उताहो ते स
तोऽभवत् भण्यतां श्रोतुकामानां गुरूणां कुलनंदन १० प्र द वा परः स्वश्चेत्यसद्ग्राहः पुंसां य
न्मायया कृतः विमोहितधियां दृष्टस्तस्मै भगवते नमः ११ स यदानुव्रतः पुंसां पशुवुद्धिर्विभिद्यते
अन्य एष तथान्योऽहमिति भेदगतासती १२ [illegible]

वः अत एव तया विमोहितवुद्धीनां भवतामेव दृष्टः न तु मम तस्मै अचिंत्यमायेश्वराय नमः ११ अहो किमेतत्तत्प्रत्य
पसि तव वुद्धिभेदो यतो जातः तत्कथयेत्याक्षिप्तः सन् तत्प्रसादादेवेत्युत्तरमाह स इति त्रिभिः स भगवान् य

दानुव्रतः अनुकूलो भवति तदा पशूनामिव वुद्धिर्भिद्य
ते असती मिथ्याविषया भिद्यते अभिन्नोऽस निष्ठा
भवति १२

भा० स० २६ मित्रत्वेन वर्त्तमानस्यापि तव विरोधाचरणं न संभवितमित्याह संति हीति दुष्टं मैत्रं मित्रत्वं येषां ते रोग इति ब्रह्महा तु
१९ य रोगी स्यात्सुरापः श्यावदंतकः स्वर्णहारी तु कुनखी दुश्चर्मा गुरुतल्पग इत्यादिस्मृत्युक्तः पातकिनां रोगो यथोदे
ति तथा तेषामघं विद्वेषादिकमुदेतीत्यर्थः २७ मत्प्रणीतं मयाध्यापितं नोऽस्मभ्यं कुत्र कुत्सितं दोषं मा स्म अदाः अदा

लो१ ब्रह्मबंधो किमेतत्ते विपक्षं श्रयतासता असारं ग्राहितो बालो मामनादृत्य दुर्मते २६ संति ह्यसाधवो लोके
दुर्मैत्राश्छद्मवेषिणः तेषामुदेत्यघं काले रोगः पातकिनामिव २७ गुरुपुत्र उवाच नमत्प्रणीतं न परप्र
णीतं सुतो वदत्येष तवेंद्रशत्रो नैसर्गिकीयं मतिरस्य राजन्नियच्छ मन्युं कददाः स्म मा नः २८ ना
द वा गुरुणैवं प्रतिप्रोक्तो भूय आहासुरः सुतं नचेद्गुरुमुखीयं ते कुतोऽभद्रासती मतिः २९ प्र
द वा मतिर्न कृष्णे परतः स्वतो वा मिथोऽभिपद्येत गृहव्रतानां अदांतगोभिर्विशतां तमिस्रं पुनःपु
नश्चर्वितचर्वणानां ३०

गम आर्षः मयि दोषारोपं मा कृथा इत्यर्थः इंद्रशत्रो इति नहि ब्राह्मणेषु त
व कोप उचित इति भावः २८ गुरुमुखी गुरुवाक्यजनिता हे अभद्र २९ आस्तामियं वार्त्ता भवादृशानां विषया
सक्तानामत्यनधिकारादित्याशयेनाह मतिरिति परतः गुरोः स्वतो वा मिथो वा अन्योन्यतः नाभिपद्यते न संपद्ये
त केषां गृह एव व्रतं संकल्प इति कृत्यचिंता येषां अत एव अदांतैरनुपरतैर्गोभिरिंद्रियैर्हेतुभूतैः तमिस्रं संसारं
प्रविशतां पुनः पुनश्चर्वितचर्वणं येषां ३०

इतितंप्रह्लादंभीषयन्धर्मार्थकामवर्गस्यप्रतिपादकंशास्त्रमध्यापयामास १८ ज्ञातंज्ञेयमुपायचतुष्टयंयेनतंज्ञा
त्वादैत्येंद्रंप्रतिमात्रासृष्टं उद्वर्त्यस्नापितं १९ २० २१ २२ पादसेवनंपरिचर्या अर्चनंपूजा दास्यंकर्मार्पणंसख्यंतद्विश्वा
सादि आत्मनिवेदनंदेहसमर्पणं यथाविक्रीतस्यगवाश्वादेर्भरणपालनादिचिंतानक्रियतेतथादेहंतस्मैसमर्प्यतच्चिं

इतितंविविधोपायैर्भीषयंस्तर्जनादिभिः प्रह्लादंग्राहयामासत्रिवर्गस्योपपादनं १८ ततएनंगुरुर्ज्ञात्वा
ज्ञातज्ञेयंचतुष्टयं दैत्येंद्रंदर्शयामासमातृमृष्टमलंकृतं १९ पादयोःपतितंबालंप्रतिनंद्याशिषासुरः प
रिष्वज्यचिरंदोर्भ्यांपरमामापनिर्वृतिं २० आरोप्यांकमवघ्रायमूर्द्धन्यश्रुकलांबुभिः आसिंचं [illegible]क्त्रमि न्विकस ३
दमाहयुधिष्ठिर २१ हि एय शि रु च प्रह्लादानूच्यतांतातस्वधीतंकिंचिदुत्तमं कालेनैतावतायुष्मन्य
दशिक्षद्गुरोर्भवान् २२ प्रह्ला उ च श्रवणंकीर्त्तनंविष्णोःस्मरणंपादसेवनं अर्चनंवंदनंदास्यं
सख्यमात्मनिवेदनं २३ इतिपुंसार्पिताविष्णौभक्तिश्चेन्नवलक्षणा क्रियतेभगवत्यद्धातन्मन्येधीत
मुत्तमं २४ निशम्यैतत्सुतवचोहिरण्यकशिपुस्तदा गुरुपुत्रमुवाचेदंरुषाप्रस्फुरिताधरः २५

तावर्ज्जनमित्यर्थः २३ इतिनवलक्षणानियस्याःसाअधीतेनचेद्भगवतिविष्णौभक्तिःक्रियतेसाचअर्पितैवस
तीयदिक्रियतेनतुकृतासतिपश्चादर्प्यतेतदुत्तममधीतंमन्येउत्तमं नत्वस्माद्गुरोरधीतंत्रिप्रादितंवात्तयावि
धं
धंकिंचिदस्तीतिभावः २४ २५

भा०स० अमर्षोऽसहनं तेन सहितया रूषा आविष्टो व्याप्तः कषायीभूते आताम्रे लोचने यस्य हे नैरृताः राक्षसाः वध्यत्वे हेतुः यतोऽ
२० यं मे भ्रातृहा कुतः यो विष्णोः पादावर्चतीति तत्पक्षपातीत्यर्थः अतः हंतव्य एवायमित्यन्वयः ३५ अहो विस्मृतः अप्यविश्वसनीयं
प्रह्लादं कं किमिति स्वीकृतवानित्याह विष्णोर्वेति अजहात् जहौ ३६ ननु तवायमपत्यं कथं वध्यस्तत्राह परोप्यौषधमिव

आहामर्षरुषाविष्टः कषायीभूतलोचनः वध्यतामाश्वयं वध्यो निःसारयत नैरृताः ३४ अयं मे भ्रात
हा सोयं हित्वा स्वान्सुहृदोधमः पितृव्यहंतुर्यः पादौ विष्णोर्दासवदर्चति ३५ विष्णोर्वा साध्वसौ किंनु करि
ष्यत्यसमंजसः सौहृदं दुस्त्यजं पित्रोरहाद्यः पंचहायनः ३६ परोप्यपत्यं हितकृद्यथौषधं स्वदेह
जोप्यामयवत्सुतोऽहितः छिंद्यात्तदंगं यदुतात्मनोऽहितं शेषं सुखं जीवति यद्विवर्जनात् ३७ सर्वैरु
पायैर्हंतव्यः संभोजशयनासनैः सुहृल्लिंगधरः शत्रुर्मुनेर्दुष्टमिवेंद्रियं ३८ नैरृतास्ते समादिष्टा
भर्त्रा वै शूलपाणयः तिग्मदंष्ट्रकरालास्यास्ताम्रश्मश्रुशिरोरुहाः ३९ नदंतो भैरवं नादं छिंधि
भिंधीति वादिनः आसीनं चाहनन् शूलैः प्रह्लादं सर्वमर्मसु ४०

हितकृच्चेत्तर्ह्यपत्यमेव ज्ञेयं सुतः स्वदेहजोपि अहितश्चेत्तर्ह्यामयः व्याधिरिव आत्तो ममतास्पदस्य कस्या अंगमपिय
दि करचरणादि तदप्यात्मनोऽहितं चेत्तर्हि छिंद्यादेवेत्यर्थः ३७ अतः सर्वैरुपायैर्हंतव्यः संभोजो भोजनं भोज
नादिषु विषादिप्रयोगैरित्यर्थः यथा दुष्टमिंद्रियं मुनेः शत्रुः ३८ तिग्मानि तीक्ष्णानि दंष्ट्रा येषां करालान्यास्या

ननु श्रीकृष्णस्य परमानंदरूपत्वात्तेपि तन्निष्ठा एव किं न स्युः तद्दर्शनादित्याह नेति येदुराशया विषयवासितांतः
करणाः ते हि विष्णुं न विदुः तत्र हेतुः स्वस्मिन्नेवार्थः पुरुषार्थो येषां ते षां गतिं गम्यं ननु तेपि गुरूपदेशाद्विष्णुं ज्ञास्यं
ति तत्राह बहिर्विषयेष्वर्थो येषां ते बहिरर्थास्तानेव गुरुत्वेन मंतुं शीलं येषां ते अतः अंधैरुपनीयमाना अंधा यथापं
थानं न विदुः किंतु गर्ते पतंति तथा तेपि ईशस्य तंत्र्यां दीर्घरज्ज्वां वेदलक्षणायां उरूणि दामानि ब्राह्मणादिनामादीनि यस्यां
तस्यां काम्यैः कर्मभिर्बद्धा एव भवंतीत्यर्थः तदुक्तं विषयाविष्टचित्तानां विष्णुरेव सुदूरतः वारुणीं दिशमंतं वस्तु व्रजन्नैंद्रीं

न ते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थमानिनः अंधा यथांधैरुपनीयमाना वाचीशतंत्र्यामु
रुदाम्निबद्धाः ३१ नैषां मतिस्तावदुरुक्रमांघ्रिं स्पृशत्यनर्थापगमो यदर्थः महीयसां पादरजोभिषेकं निःकिंचना
नां न वृणीत यावत् ३२ इत्युक्तोपरते पुत्रे हिरण्यकशिपू रुषा अंधीकृतात्मा स्वोत्संगान्निरस्यत महीतले ३३

किमाप्नुयादिति ३१ ननु च एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मेत्यादिश्रुतिप्रतिपादितं विष्णुं कथं न
विदुः कुतो वा तेषां तमिस्रप्रवेशस्तत्राह नैषामिति निःकिंचनानां निरस्तविषयाभिमानानां पादरजसा अभिषेकं यावन्न
वृणीत तावत् श्रुतिवाक्यतोपि येषां मतिरुरुक्रमस्यांघ्रिं न स्पृशति न प्राप्नोति असंभावनादिभिर्विहन्यत इत्यर्थः अनर्थ
स्य संसारस्यापगमो यदर्थः यस्यायं अंघ्रिस्पर्शिन्या मतेरर्थः प्रयोजनं महदनुग्रहाभावान्न तत्वाविनिश्चयेनापीह मोह
स्तेषामित्यर्थः ३२ निरस्यत निरास्यत चिक्षेप ३३

भा० स० अप्रमेयः अपरिमेयोऽनुभावो यस्य न कुतश्चिद्भयं यस्य न वा भविता अन्यथा मृत्युर्नैव भविष्यतीत्यर्थः ४७ औश
२१ नसौ उशनसः पुत्रौ नीतिज्ञौ विविक्ते एकांते ४८ भ्रुवोर्विजृंभणेनैव त्रस्ता धिष्ण्यपा यस्मिन् तस्य चिंत्यं न च क्ष्महे
न पश्यामः पदमालंबनं नैवास्ति यद्वा शिशूनां हृत्तं गुणदोषयोः पदं विषयो न भवतीत्यर्थः ४९ तथापि तु वधे

अप्रमेयानुभावोऽयमकुतश्चिद्भयोऽमरः नूनमेतद्विरोधेन मृत्युर्मे भविता न वा ४७ इति तच्चिंतया
किंचिन्म्लानश्रियमधोमुखं शंडामर्कावौशनसौ विविक्त इति होचतुः ४८ जितं त्वयैकेन जगत्त्र
यं भ्रुवोर्विजृंभणत्रस्तसमस्तधिष्ण्यपं न तस्य चिंत्यं तव नाथ चक्ष्महे न वै शिशूनां गुणदोषयोः
पदं ४९ इमं तु पाशैर्वरुणस्य बद्ध्वा निधेहि भीतो न पलायते यथा बुद्धिश्च पुंसो वयसार्यसेव
या यावद्गुरुर्भार्गव आगमिष्यति ५० तथेति गुरुपुत्रोक्तमनुज्ञायेदमब्रवीत् धर्मो ह्यस्योपदेष्टव्यो
राज्ञां यो गृहमेधिनां ५१ धर्ममर्थं च कामं च नितरां चानुपूर्वशः प्रह्लादायोचतू राजन् प्रश्रयावनता

न तस्योचितमित्याहुः इमं त्विति यावद्गुरुरागमिष्यति तावद्बद्ध्वा निधेहि ततः किं अत आहुः बु यच्च ५२
द्धिश्च समीचीना वयसा भवतीति ५० अनुज्ञाय तथेत्यंगीकृत्य ५१ ततश्च प्रह्लादाय धर्मादिकमूचतुः प्रश्रि
तश्चासाववनतश्च तस्मै यथावत् त्रिवर्गमनुशिष्टवंतमपि साधु न मेने तोषितां चकुतः द्वंद्वे रागद्वेषादिभिः विषयेषु

२१

परेईश्वरेयुक्तः समाहितः आत्मा मनो यस्य तस्मिन् तेषां प्रहारा निष्फला जाताः तत्र हेतवः ब्रह्मणि निर्विकारे अनिर्देश्ये अ
विषये भगवति निरतिशयैश्वर्ये अखिलात्मनि शस्त्रादीनामपि नियंतरि एवंभूते परे अपुण्यस्य निर्दैवस्य सत्क्रिया महोद्यमा
इव ४१. ४२ अभिचाराः कृत्यादयः अवपातनो गिरिशृंगादधःपातनानि तैः आवरादिषु संनिरोधैश्च ४३ पर्वताक्रमणैः
पर्वतानां तदुपरि क्षेपैः च बहुवचनैरभिचाराद्यावृत्तिं दर्शयति तद्वधं कर्तुं नाभ्यपद्यत न प्रापन शक्तोदित्यर्थः ४४ चिंता

परब्रह्मण्यनिर्देश्ये भगवत्यखिलात्मनि युक्तात्मन्यफला आसन्नपुण्यस्येव सत्क्रियाः ४१ प्रयासेऽपहते तस्मिन्
दैत्येंद्रः परिशंकितः चकार तद्वधोपायान्निर्बंधेन युधिष्ठिर ४२ दिग्गजैर्दंदशूकेंद्रैरभिचारावपातनैः मा
याभिः संनिरोधैश्च गरदानैरभोजनैः ४३ हिमवाय्वग्निसलिलैः पर्वताक्रमणैरपि नशशाक यदा हंतु
मपापमसुरः सुतं चिंतां दीर्घतमां प्राप्तस्तत्कर्तुं नाभ्यपद्यत ४४ एष मे बह्वसाधूक्तो वधोपायाश्च निर्मिताः
तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तः स्वेनैव तेजसा ४५ वर्तमानोऽविदूरे वै बालोऽप्यजडधीरयं नविस्मरति मेऽनार्यं शु
नःशेफ इव प्रभुः ४६

मेवाह एष इति त्रिभिः मे मया असाधुपरुषं यथा भवति तथोक्तः असद्धर्मैरपकारैः अभिचारैर्वा ४५ अविदूरे
वर्तमानोऽपि बालोऽप्ययं जडधीः निर्भयचित्तः मे अनार्यमन्यायं शक्तुं चान विस्मरति आजीगर्तस्य मध्यमपुत्रः
शुनःशेफो नाम पितृभ्यां हरिश्चंद्राय विक्रीतः स यथा तयोरपकारमविस्मरंस्त्वद्विपक्षं विश्वामित्रमाश्रित्य गोत्रांत
रमापन्नस्तद्वत् यद्वा स्वभावापरित्यागे दृष्टांतः शुनःशेफः पुच्छमिवेति ४६

भा०स० २२ भोगोद्यमः कथं त्याज्य इति चेत्तत्राह सुखमिति सर्वत्र वर्ष्मस्वपि दैवात्सर्वदेहेष्वेव ३ अतस्तदर्थं प्रयासो न कर्तव्यः
यतः प्रयासात् परं केवलमायुषो व्यय एव यस्माच्च तेन प्रकारेण मुकुन्दचरणं न प्राप्नोति ४ भयमाश्रितः संसारं प्राप्तः पुरुष
रूपं शरीरं यावत्पुष्कलमशक्तं न विपद्येत अशक्तं न भवेत् न नश्येदिति वा तावच्छीघ्रं क्षेमाय यतेत उक्तं च यावत्स्वस्थ
मिदं शरीरमजरं यावज्जरा दूरतो यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः आत्मश्रेयसि तावदेव विदुषा का

सुखमैन्द्रियकं दैत्या देहयोगेन देहिनां सर्वत्र लभ्यते दैवाद्यथा दुःखमयत्नतः ३ तत्प्रयासो न कर्तव्यो य
त आयुर्व्ययः परं न तथा विंदते क्षेमं मुकुंदचरणांबुजं ४ ततो यतेत कुशलः क्षेमाय भयमाश्रितः शरीरं पु पौरुषं
रं ष्कलं यावन्न विपद्येत पुष्कलं ५ पुंसो वर्षशतं ह्यायुस्तदर्धं चाजितात्मनः निःफलं यदसौ रात्र्यां शेतेंऽधं
प्रापितस्तमः ६ मुग्धस्य बाल्ये कौमारे क्रीडतो याति विंशतिः जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः ७
दुरापूरेण कामेन मोहेन च बलीयसा शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि ८ को गृहेषु पुमान्सक्त
मात्मानमजितेंद्रियः स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुं ९
द्योः प्रयत्नो महान्न संदीप्ते भवने च कूपखनने प्रत्युद्यमः कीदृशः आयुर्व्ययक्रममाह पुंस इति त्रिभिः यद्यस्मा ६
त् शेते ६ विंशतिर्वर्षाणि आयुर्व्यय इति ७ दुरापूरेण दुःखैः समं जादापूर्यमाणेन ८ ननु यौवने गृहासक्तोऽपि प हैं
श्चाद्विरक्तः सन् क्षेमं यास्यतीत्याशंक्य तदसंभवं दर्शयन् कुमार एवाचरेदित्युपपादयति को गृहेष्विति सप्त
२२

५३ परावृत्तः अन्यत्र गतः उपहूतः संधि पादपूर्णेषेः क्रीडार्थं कृतक्षणैः कृतोत्सवैः लब्धावसरैरितिवा ५४ तेषां
निष्ठां जन्ममरणादिलक्षणां विद्वान् ५५ द्वंद्वारामाणां ईरितैरीहितैश्च न दूषिता धीर्येषां यतो बालाः ५६ तस्मिन्ने
वन्यस्तं हृदयमीक्षणं च यैः ५७ इ स मे च ५ षष्ठे गुरोर्गृहव्यग्रे प्रह्लादो दैत्यबालकान् अनुकंपापरं तत्त्वं ना
रदोक्तमुपादिशत् निरर्थका क्रियात्वापेशपुर्व्यमजानतो प्रह्लादः सदयं प्राह धर्मं भागवतंकोजी कौमारइत्या

यथात्रिवर्गं गुरुभिरात्मने उपशिक्षितं नसाधु मेने तच्छिक्षां द्वंद्वारामोपवर्णितां ५३ यदाचार्यः परावृ
त्तो गृहमेधीयकर्मसु वयस्यैर्बालकैस्तत्र सोपहूतः कृतक्षणैः ५४ अथ तान् श्लक्ष्णया वाचा प्रत्याहूय
महाबुधः उवाच विद्वांस्तन्निष्ठां कृपया प्रहसन्निव ५५ ते तु तद्गौरवात्सर्वे त्यक्तक्रीडापरिच्छदाः बा
ला अदूषितधियो द्वंद्वारामेरितेहितैः ५६ पर्युपासत राजेंद्र तन्न्यस्तहृदयेक्षणाः तानाह करुणो मै
त्रो महाभागवतोऽसुरः ५७ इ श्री द्वा वे म पु ए प्र क्ल पं मो यः ५ प्र द वाच कौमार
आचरेत्प्राज्ञो धर्मान्भागवतानिह दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदं १ यथा हि पुरुषस्येह वि
ष्णोः पादोपसर्पणं यदेष सर्वभूतानां प्रिय आत्मेश्वरः सुहृत् २
दिना इहैव मानुषजन्मनि धर्मानाचरेत् यतोऽर्थदमेतत् तत्र कौमार एव यतः तदप्यध्रुवं न चैवं सति जन्मांत
रे यतः दुर्लभं तत्र धर्मानेवाचरेत् न तु स्वार्थं प्रयासात् तत्र भागवतानेव धर्मानाचरेदित्येतदुपपादयति यथा हीति

चतुर्भिः इह पुरुषस्य विष्णोः पादोपसर्पणमेव यथा अनुरूपं योग्यमित्यर्थः यद्यस्मात् एष प्रिय इत्यादि २

मा ३

भा०स० प्रत्युत चौर्य्यं करोतीत्याह वित्तेष्विति नित्यमभिनिविष्टं चेतो यस्य सः परवित्तहर्तुः प्रेत्य नरकलक्षणं इह च दंडादिरू
२३ पं यथापि विद्वान् अप्याप्यशंतानभिलाषः सन् परविपरवित्तं हरत्येव १५ तद्वेवं कोगृहेषु पुमानित्यादिसप्तभिः श्लोकै
रूपपादितं गृहादिषु प्रसक्तस्य वैराग्याद्यसंभवमुपसंहरति विद्वानपीति स्वस्ता काय आत्मपरामर्शाय न कल्पते किं तु
विमूढो यथा तथा खिद्यन्नपि तमत्राभिनिवेशमेव प्रपद्यते तत्र हेतुः य इति स्वीयमिदं पारक्यमिदमिति भिन्नो भावो

वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्तुः प्रेत्येह वाथाप्यजितेंद्रियस्तदशांतकामो हरते
कुटुंबी १५ विद्वानपीत्थं दनुजाः कुटुंबं पुष्णन्स्वलोकाय न कल्पते वै यः स्वीयपारक्यविभिन्नभावस्तमः
प्रपद्येत यथा विमूढः १६ यतो न कश्चित्क्व च कुत्र वा दीनः स्वमात्मानमलं समर्थः विमोचितुं काम
दृशां विहारक्रीडामृगो यन्निगडो विसर्गः १७ ततो विदूरात्परिहृत्य दैत्या दैत्येषु संगं विषयात्मकेषु
उपेत नारायणमादिदेवं स मुक्तसंगैरिषितोपवर्गः १८

भावना यस्य सः १६ तस्मात्कौमार एव भागवतान् धर्मानाचरेदिति सहेतुकमुपसंहरति यतः कश्चिदपि स्वमा
त्मानं मोचितुं न समर्थः ततः नारायणमुपेत शरणं यात तेषु तत्रैरण्यान्वयः असामर्थ्ये हेतुः अलं दीनो लंपटः अ
तः कामिदृशां स्त्रियां तासां विहारे क्रीडायां निमित्ते क्रीडामृगः विहारमिति पृथक्पाठे तासां विहारसाधनमात्मा
नं यतस्तासां क्रीडामृगः स इत्यन्वयः यत्र यासु निगडः शृंखला तत्तुल्यो विसर्गः पुत्रादिरूपो भवति १७ विदूरात् दूरतः

संगं परिहृत्य यद्वा अविदूरात् स्त्री प्रेनारायणमुपेतेदृत्य
न्वयः यस्मात्स एवापवर्गः दूषितदृष्टः १८

यं अर्थं असुभिः क्रीणन्ति प्राणहानिमंगीकृत्यापि तस्करादिरर्थं साधयति तस्मिन्नर्थे तृष्णां को नु विसृजेत् १० किंच क
थमित्यादि प्रियायाः संगादिकं स्मरन्नकथं त्यजेदिति तृतीयेनान्वयः मंत्रान् हितशिक्षाल्लापान् सुहृत्सु च संगं तेषां स्नेहेन सि
तो बद्धः कलानि मधुराल्लापाक्षराणि येषां तेषां च संगं तेष्वनुरक्तं चित्तं यस्य ११ ताः स्वसृर्वा दुहितॄः स्थिताः हृदय्याः हृदयंगमाः
मनोज्ञानुरवः परिच्छदा येषु तान् वृत्तीर्जीविकाः कुल्याः कुलपरंपरागताः १२ कोशस्कृत् कोशकारी कीटः स यथा

को न्वर्थतृष्णां विसृजेत्प्राणेभ्योऽपि य ईप्सितः यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् १० कथं
प्रियाया अनुकंपितायाः संगं रहस्यं रुचिरांश्च मंत्रान् सुहृत्सु च स्नेहसितः शिशूनां कलाक्षराणामनु
रक्तचित्तः ११ पुत्रान्स्मरंस्ता दुहितॄर्हृदय्या भ्रातॄन्स्वसॄर्वा पितरौ च दीनौ गृहान्मनोज्ञोरुपरिच्छदांश्च
वृत्तीश्च कुल्याः पशुभृत्यवर्गान् १२ त्यजेत कोशस्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः औ
पस्थ्यजैह्व्यं बहु मन्यमानः कथं विरज्येत दुरंतमोहः १३ कुटुंबपोषाय वियन्निजायुर्न बुध्यतेऽर्थं विहतं
प्रमत्तः सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुंबरामः १४

गृहं कुर्वन्नात्मनो निर्गमाय द्वारमपि नावेशयति तथा कर्माणीहमानः न च वित्तप्रकामोऽपि दोषेणानेन विरक्तः सन्
त्यजेत् आह औपस्थ्यं च जैह्व्यं च सुखं तदेवाधिकं मन्यमानः अतो दुरंतो मोहो यस्य सः कथं विरज्येत विरक्तः स्या
त् १३ दुरंतमोहत्वं दर्शयन्नाह कुटुंबपोषणाय वियत् क्षीयमाणं निजमायुः पुरुषार्थं च विहतं न बुध्यते अतएव ताप

त्रयेण दुःखितचित्तोऽपि न निर्विद्यते दुःखबुद्धिं न करोति
यतः स्वकुटुंबे आरामो रतिर्यस्य १४

भा० स०
२४

ततः किमत आह तुष्टे च तत्र तस्मिन् किमलभ्यं तथापि गुणपरिणामाद्दैवादेः स्वसिद्धा अयत्नतः सिद्धा ये धर्मादयस्तैः किं अगु
णेन च मोक्षेण कांक्षितेन किं तमनुपमयतां नोऽस्माकमकाङ्क्षितस्यापि तस्य सिद्धेः यद्वा माभून्मोक्षः तस्य चरणयोः सारं जुषां स्तु
वतां एवमानानां तेनापि किमित्यर्थः २५ ननु च धर्मादेः पुरुषार्थत्वे किमित्याचार्याभ्यां वेदोक्तत्वे नसत्यत्वेनाभिहितः तत्राह धर्मा
र्थः कामश्चेति यस्त्रिवर्गः तदर्थं च या ईक्षाद्याश्चाभिहिताः ईक्षा आत्मविद्या त्रयी कर्मविद्या नयदमौ तर्कनीतिश्च विविधा च

तुष्टे च तत्र किमलभ्यमनन्त आद्ये किं तैर्गुणव्यतिकरादिह ये स्वसिद्धाः धर्मादयः किमगुणेन च कांक्षितेन सारं
जुषां चरणयोरुपगायतां नः २५ धर्मार्थकाम इति योऽभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च वार्त्ता मन्ये
तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः २६ ज्ञानं तदेतदमलं दुरवापमाह नारायणो
नरसखः किल नारदाय एकान्तिनां भगवतस्तदकिंचनानां पादारविंदरजसाप्लुतदेहिनां स्यात् २७

वार्त्तेति कात तदेतत्सर्वं निगमस्यार्थजातं सत्सुहृदः स्वान्तर्यामिणः परस्य पुंसः स्वात्मार्पणसाधनं चेत्तर्हि सत्यं मन्ये सत्यपरत्वा
त् अन्यथा तदसत्यमेव यद्वा तदेतदखिलं निगमस्य त्रैगुण्यविषयस्य प्रतिपाद्यं मन्ये सत्यं पुनर्निस्त्रैगुण्यलक्षणं परमस्य पुंसः
स्वात्मार्पणमेवेत्यर्थः तदुक्तं भगवता त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुनेति २६ तेषां विश्वासार्थं गुरुसंप्रदायमाह
ज्ञानमिति नरसखः नारायणः नारदाय तदविलक्षणमाह ज्ञानं किंलक्षणं अन्यैर्दुरापं वहिर्मुखैः यत्र नारदः श्रोता वक्ता श्री
नारायणः तत्र कुतो माहात्म्यं नामधिकार इति माशंकीत्याह भगवतः एकान्तभक्तानां यत्पादरजः तेन आप्लुतानां देहिनां सर्वेषा
मपि तज्ज्ञानं स्यात् न तु तत्तमानानामेवेति नियमः २७

२४

वालानामस्माकं तद्भजनमशक्यमितिचेत्तत्राह नह्यतीति वह्वायासोऽतिप्रयासः १९ आत्मत्वात्सर्वत्र सिद्धत्वादिति च हेतुद्वय
मुपपादयति परावरेष्विति चतुर्भिः ब्रह्माद्यंतेषु येषां स्थावरआदिर्येषां तेषु जीवेषु भौतिकेषु अजीवेषु घटादिषु महत्सु च
भूतेष्वाकाशादिषु २० गुणसाम्ये प्रधाने गुणव्यतिकरे महत्तत्वादौ च परं ब्रह्मस्वरूपः २१ कथं तर्हि दृष्टृदृश्यभोक्तृभो
ग्यादिभेदः माययेत्याह प्रत्यगात्मा द्रष्टा भोक्ता तद्रूपेण व्यापकत्वं यानि र्देश्यः दृश्यं भोग्यं देहादि तद्रूपेण च व्यापकत्वं

न ह्यच्युतं प्रीणयतो वह्वायासोऽसुरात्मजाः आत्मत्वात्सर्वभूतानां सिद्धत्वादिह सर्वतः १९ परावरेषु भू
तेषु ब्रह्मांतस्थावरादिषु भौतिकेषु विकारेषु भूतेषु च महत्सु च २० गुणेषु गुणसाम्ये च गुणव्यतिकरे
तथा एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः २१ प्रत्यगात्मस्वरूपेण दृश्यरूपेण च स्वयं व्याप्यव्यापको नि
र्देश्यो ह्यनिर्देश्योऽविकल्पितः २२ केवलानुभवानंदस्वरूपः परमेश्वरः मायया तिरोहितैश्वर्य ईयते गुणसर्गया
२३ तस्मात्सर्वेषु भूतेषु दयां कुरुत सौहृदम् आसुरं भावमुन्मुच्य यया तुष्यत्यधोक्षजः २४

३९ यानि र्देश्यो मायया ईयत इत्युत्तरेणान्वयः वस्तुतस्तु स्वयं अविकल्पितो निर्देश्योऽपि सन् यद्वा अनिर्देश्योऽपि एवं निर्देश्यः सन्
विकल्पित ईयत इत्यन्वयः २२ यतः केवलोऽनुभवात्मक आनंदस्वरूपं यस्य ननु स एव चेत्सर्वत्र तर्हि सर्वत्र सर्व
सत्वादुपलभ्येत तत्राह गुणात्मकः सर्गो यस्याः सा गुणसर्गा तया मायया आवृतमैश्वर्यं येन सः २३ यस्मादेवं तस्मात्
सर्वेषु यथोचितं दयां सौहृदं च कुरुत यया दयया उन्मुच्य संत्यज्य २४ ॥ ॥ ऽऽ ॥ ऽऽ ॥ ९ऽ

भा०स० ३ ६ ५ राज्ञः शिबिरं आवासं व्यलुंपन् सर्वस्वापहारेण नाशितवंतः ६ अनागसं निरपराधां मैनां नेतुमर्हसि इति
२५ प्राह ७ अविसह्यं दुःसहं अतः अनया प्रसवपर्यंतं आस्यतां ततश्च अर्थस्य पदवीं मार्गं गतः प्राप्तः सन् पुत्रं
हत्वा मोक्ष्यामीत्यर्थः ८ साक्षात्स्वगुणैरेव महान् न तु पित्रादिसंबंधात् त्वया हेतुभूतेन संस्थां मृत्युं न यास्यतीति

पिपीलिकैरहिरिव दिष्ट्या लोकोपतापनः पापेन पापोऽभक्षीति वादिनो वासवादयः ३ तेषामतिबलोद्योगं निश
म्यासुरयूथपाः वाध्यमानाः सुरैर्भीता दुद्रुवुः सर्वतो दिशं ४ कलत्रपुत्रवित्ताप्तान् गृहान् पशुपरिच्छ
दान् नावेक्षमाणास्त्वरिताः सर्वे प्राणपरीप्सवः ५ व्यलुंपन् राजशिबिरममरा जयकांक्षिणः इंद्र
स्तु राजमहिषीं मातरं मम चाग्रहीत् ६ नीयमानां भयोद्विग्नां रुदंतीं कुररीमिव यदृच्छयागतस्तत्र देव
र्षिर्ददृशे पथि ७ प्राह नैनां सुरपते नेतुमर्हस्यनागसं मुंच मुंच महाभाग सतीं परपरिग्रहं ८ इं
उ च आस्तेऽस्या जठरे वीर्यमविसह्यं सुरद्विषः आस्यतां यावत्प्रसवं मोक्ष्येऽर्थपदवीं गतः ९ ना उ वा
अयं निष्किल्बिषः साक्षान्महाभागवतो महान् त्वया न प्राप्स्यते संस्थामनंतानुचरो बली १० इत्युक्तस्तां वि
हायेंद्रो देवर्षेर्मानयन्वचः अनंतप्रियभक्त्यैनां परिक्रम्य दिवं ययौ ११

तत्र हेतवो निष्किल्बिष इत्यादयः १० अनंतस्य प्रियो यो ऽहं स वा प्रियो यस्य तस्य मम भक्त्या एनां प्रद
क्षिणीकृत्य ११ रामरामराम

श्रुतएवमयापिनारदाच्छ्रुतमित्याह विज्ञानसंयुतंधर्मंचश्रुतं २८ तत्रातिविस्मिताःपृच्छंति प्रह्लादेति एताभ्यामन्ते
न्यंगुरुंनविद्मः एतदागमनात्पूर्वमेवाहंनारद पार्श्वेगतइतिचेत्तत्राहुः वाला नामप्यतिशिशूनामस्माकं एतावी
नियंतारौ अतस्तवान्यत्रेषानसंभवति सस्वात्रागतइत्यपिनसंभव तीत्याहुः वालस्येतिदुरन्वयः दुर्घटःवि
श्रुतमेतन्मयाएवंज्ञानविज्ञानसंयुतं धर्मंभागवतंशुद्धंनारदाद्देवदर्शनात् २८ दैत्यपुत्राऊचुः प्र
ह्लादत्वंवयंचापिनर्त्तेन्यंविद्महेगुरुं एताभ्यांगुरुपुत्राभ्यांवालानामपिहीश्वरौ २९ वालस्यांतःपुरस्थ
स्यमहत्संगोदुरन्वयः छिंधिनःसंशयंसौम्यस्याच्चेद्विश्रंभकारणं ३० इ श्री द्भा व म पु
ए स स्कं प्रह्लादानुचरिते श्लो य ६ ना द वा एवंदैत्यसुतैःपृष्टोमहाभागवतोऽ
सुरः उवाचस्मयमानस्तान्स्मरन्मदनुभाषितं १ प्र द वा पितरिप्रस्थितेऽस्माकंतपसेमंदरा
चलम् युद्धोद्यमंपरंचक्रुर्विबुधादानवान्प्रति २
श्रंभकारणंविश्वासहेतुः ३० इ स मे ६ः ६ सप्तमेमा
तगर्भस्थेस्वस्मिन्नारदभाषितं प्रह्लादोवर्णयामासशिष्यप्रत्ययसिद्धये १ अस्मादिनारदादेतन्मयागर्भ
इतीरितुंतत्रतावकथामाह पद्यैःषोडशभिःसुधीः २ अस्माकंपितरिहिरण्यकशिपौ तपसेमंदराचलं
प्रस्थितेसतिनिस्वकृतेनैवपापेनपापोसौअभक्षिभक्षितइतिहर्षेणवदंतो युद्धोद्यमंचक्रुः २ ॥ रामराम रामराम

तदेवं देहधर्मैस्तत्वैलक्षण्येनात्मनो देहस्तनेद र्शितः इदानीमात्मधर्मैरेव भेदं स्फुटयंस्तदहंकारादिकं त्याजयति आ
त्मा नित्यः अविनाशी वा अरेऽयमात्मेति श्रुतेः अव्ययः अपक्षयशून्यः स एषोऽक्षरे परमे व्योमन्निति श्रुतेः शुद्ध निरवद्यं
निरंजनमिति श्रुतेः एकः एकमेवाद्वितीयमिति श्रुतेः क्षेत्रज्ञः विज्ञातारमरे केन विजानीयादिति श्रुतेः आश्रयः यस्मि
न् द्यौः पृथिवी चांतरीक्षमिति श्रुतेः अविक्रियः निष्कलं निष्क्रियं शांतमिति श्रुतेः स्वदृक् आत्मज्योतिः सम्राडिति होवा
चेति श्रुतेः हेतुः स इमांल्लोकानसृजतेति श्रुतेः व्यापकः सत्यं ज्ञानमनंतमिति श्रुतेः असंगी असंगो ह्ययं पुरुष इ

आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः अविक्रियः स्वदृग्हेतुर्व्यापकोऽसंग्यनावृतः १९ एतैर्द्वादश
भिर्विद्वानात्मनो लक्षणैः परैः अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत् २० स्वर्णं यथा ग्रावसु हेमका
रः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद्ब्रह्मगतिं लभेत २१

ति श्रुतेः अनावृतः पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत इति श्रुतेः १९ परैः श्रेष्ठैः विवेकसमर्थैः देहादौ इदं विधा
नं असद्भावं मिथ्याबुद्धिं त्यजेत् २० नन्वेवं विविक्तात्मज्ञानिनोऽप्यपरोक्षानुभवेन ब्रह्मता प्राप्तिः कथं स्यात् यतोऽ
हंकारादिकं त्यजेदित्यपेक्षायां तत्राप्तिप्रकारं सदृष्टांतमाह स्वर्णमिति क्षेत्रेषु स्फुरत्स्वर्णकणेषु ग्रावसु योगैर्धमना
द्युपायैस्तदुपायाभिज्ञो हेमकारो यथा स्वर्णं प्राप्नुयात् आत्मयोगैः आत्मप्राप्त्युपायैः ब्रह्मगतिं ब्रह्मतां अध्या
त्मवित् आत्माधिकृतकार्यकारणसंघातज्ञाता २१

इहोष्यतामित्याहेतिशेषः १२ अंतिसमीपे १३ अंतर्वत्नीगर्भिणी इच्छया भर्तुरागमनानंतरंप्रसूतये एवमपि
स्वगर्भस्यक्षेमाय १४ तस्याःशोकशांत्यैधर्मस्यतत्वंभक्तिलक्षणंज्ञानमात्मानात्मविवेकः तदुभयंप्रादात ईश्वरस्स
मर्थः १५ १६ भूयात भवेत् वैशारदीस्वार्थेतद्धितः देहाद्यहंकारछेदनिपुणेत्यर्थः १७ कासौवैशारदीधीरि

ततोनोमातरमृषिःसमानीयनिजाश्रमं आश्वास्येहोष्यतांवत्सेयावत्तेभर्तुरागमः १२ तथेत्यवात्सी
द्देवर्षेरंतिसाप्यकुतोभया यावद्दैत्यपतिर्घोरात्तपसोनन्यवर्त्तत १३ ऋषिंपर्य्यचरत्तत्रभक्त्यापर
मयासती अंतर्वत्नीस्वगर्भस्यक्षेमायेच्छाप्रसूयते १४ ऋषिःकारुणिकस्तस्याःप्रादादुभयमीश्व
रः धर्मस्यतत्वंज्ञानंचमामप्युपदिश्यनिर्मलं १५ तत्तुकालस्यदीर्घत्वात्स्त्रीत्वान्मातुस्तिरोदधे ऋ
षिणानुगृहीतंमांनाधुनाप्यजहात्स्मृतिः १६ भवतामपिभूयान्मेयदिश्रद्दधतेवचः वैशारदीधीःश्रद्धा
तःस्त्रीबालानांचमेयथा १७ जन्माद्याःषडिमेभावादृष्टादेहस्यनात्मनः फलानामिववृक्षस्यकाले
नेश्वरमूर्त्तिना १८

त्यपेक्षायांनारदोक्तमेवदेहात्मविवेकप्रकारमाह जन्मेतिदशभिः जन्माद्याःजायते अस्तिवर्द्धते विपरि
णमते अपक्षीयते नश्यतीत्येवंभूताइमेषट्भावाविकाराः वृक्षस्येव यथाफलानांदृश्यंते तद्वदात्मनितिष्ठे
वस्थितेदेहस्यदृष्टाइत्यर्थः ईश्वरोविष्कारस्समर्थीमूर्त्तिर्यस्य १८ ॥ रामरामरामरामराम ॥ ५५ ॥ ५५

भा० स० २१ विमर्षप्रकारमाह बुद्धेरिति द्वाभ्यां अध्यक्षः साक्षी २५ अतः एभिर्बुद्धिभेदैः परिणामैः पर्यस्तैः प्रतीतैः त्रिभिः अध्या-
त्मधर्मत्वेनारोपितैः बुद्धिधर्मत्वे हेतुः त्रिवर्णैः त्रिगुणात्मकैः क्रियोद्भवैः कर्मजन्यैः बुद्धेर्वा त्रिगुणात्मकत्वात् कर्म-
कर्तृत्वाच्च तस्यात्रयैता अवस्थाः आत्मा बुद्ध्यन्वयात् तदवस्थावानिव भाति न तत्त्वत इत्यात्मनः स्वरूपं बुद्ध्येत्
जानीयादित्यर्थः अत्र दृष्टांतः कुसुमधर्मैर्गंधैः स्वदाश्रयं वायुमिव २६ ननु तर्हि यथा कुसुमोपाधिकोपि वा

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः ता येनैवानुभूयंते सोध्यक्षः पुरुषः परः २५ एभिस्त्रिवर्णैः प-
र्यस्तैर्बुद्धिभेदैक्रियोद्भवैः स्वरूपमात्मनो बुध्येद्गंधैर्वायुमिवान्वयात् २६ एतद्द्वारो हि संसारो गुणक-
र्मनिबंधनः अज्ञानमूलोऽपार्थोपि पुंसः स्वप्न इवेष्यते २७ तस्माद्भवद्भिः कर्तव्यं कर्मणां त्रिगुणात्म-
नां बीजनिर्हरणं योगः प्रवाहोपरमो धियः २८

योगेधोविवेकज्ञानेन निवर्तते एवमात्मनः संसारो न निवर्तत इत्याशंक्याह एतद्द्वारः बुद्धिद्वारः कस्तदवस्था-
धो २ द्वारको वा न स्वतः हि यस्माद्बुद्धेर्गुणाः कर्माणि चैते निबंध तद्दृति तथा सचाज्ञानमूलः अतोऽपार्थो मिथ्याभू-
तोऽपि स्वप्न इवेष्यते वायोस्तु गंधो द्रव्यांतरद्रव्यसंबंधस्य वास्तवत्वाद्विषमो दृष्टांतः २७ यस्मादेवं निवृत्तिर्घटते ते-
स्माद्बीजमज्ञानं तस्य निर्हरणं दहनेकिंतेत योगः कथंभूतः धियः प्रवाहं जाग्रदादिरूपमुपरमयतीति तथा २८ २१
बीज

अध्यात्मविवेकमात्मप्राप्त्युपायमाह अष्टाविंशतिभिः मूलप्रकृतिः महदहंकारौ पंचतन्मात्राणि चेत्यष्टौ त्रयः स ५०
त्वादयः तेच प्रकृतिगुणा एतत्तु भिन्नाः एकादशेंद्रियाणि पंचमहाभूतानि चेति षोडश पुमानात्मा एकः प्रोक्तः
कपिलादिभिराचार्यैः एकत्वे हेतुः एषु साक्षित्वेनान्वयात् तदुक्तं मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतयः स
प्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति २२ जगत् जंगमं तस्थुः स्थावरं अत्रैव सर्वसंघातात्म

अष्टौ प्रकृतयः प्रोक्तास्त्रय स्त्वाहितद्गुणाः विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् २२ दे
हस्तु सर्वसंघातो जगत्तस्थुरिति द्विधा अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन् २३ अन्वयव्य
तिरेकेण विवेकेनोशतात्मना सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः २४

के देहस्थ एव मृग्यः अन्वेष्टव्यः स्वशंकचैतदित्याह नेति नेतीत्यन्यापोहे क्रियमाणे स्वयमेवातत्त्यजन् अना
त्मवर्गं त्यजन्नुपलभ्यमान इत्यर्थः २३ मणिषु सूत्रमिव सर्वत्रानुस्यूतत्वेनान्वयः अत एव मणिभ्यः सूत्रस्ये
वैकैकव्यतिरेकश्च तयोर्द्वैक्यत्वेन यो विवेकः पृथक्तेन वा तेनोशताशुद्धेनात्मनामनसा सर्ग[illegible]स्थानस
माम्नायैः सृष्टिस्थितिसंहारैः यतो वा इमानि भूतानि जायंते इत्यादिश्रुत्युक्तसंधानैरित्यर्थः विमृशद्भिः विचा
रयद्भिः असत्वरैः अव्यग्रैर्मृग्यत इति पूर्वेणान्वयः २४

भा० स० तस्य भावश्चेष्टादिः तस्य भावो भावना तेनानुकृते आशयाकृती मनःशरीरे यस्य निर्दग्धं बीजमज्ञानमनुशयो वा
२८ सना यस्य सः सम्यगेति प्राप्नोति ३६ ततः किमत आह अधोक्षजस्यालंभं मनसा स्पर्शं प्राप्तं तदेतस्याश्रयणं अ
शुभः रागादियुक्तः आत्मा मनो यस्य संसृतिचक्रशातनं तन्निवर्त्तकं बुधा विदुः तदेव ब्रह्मण्येनिर्वाणलयो मोक्षः

वभा १ तदा पुमान् मुक्तसमस्तबंधनस्तद्भावभावानुकृताशयाकृतिः निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण
समेत्यधोक्षजं ३६ अधोक्षजालंभमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनं तद्ब्रह्मनिर्वाणसुखं वि
दुर्बुधास्ततो भजध्वं हृदये हृदीश्वरं ३७ को तिप्रयासोसुरबालका हरेरुपासने स्वे हृदि छिद्रवत्सतः स्वस्या
त्मनः सख्युरशेषदेहिनां सामान्यतो किं विषयोपपादनैः ३८ रायः कलत्रं पशवः सुतादयो गृहा मही कुंजरको
शभूतयः सर्वेर्थकामाः क्षणभंगुरायुषः कुर्वंति मर्त्यस्य कियत्प्रियं चलाः ३९

तदात्मकं सुखं विदुः हृदीश्वरं मंतर्यामिणं ३७ भक्तिरत्र को तिवचनमंतर्यामित्याह कइति छिद्रवत् आ
काशवत् विषयाणामुपपादनैरर्जनैः किं तत्र हेतुः सर्वदेहिनां सामान्यतो विषयनिष्पत्तेरेककराद्यवतारसाधा
रण्यायत्तेरित्यर्थः नचैवमादौ पौनरुक्त्यं दोषः नारदोक्तानुवादरूपत्वादस्य प्रकरणस्य ३८ अनर्थकं च विष
यार्जनमित्याह रायइति क्षणभंगुरमायुर्यस्य तदुक्तमितिहासेषु धनं हि पुरुषो लोके पुरुषं धनमेव वा अव
श्यमेकं त्यजति तस्मात्किं धनतृष्णयेति ३९

२८

तदेवं ज्ञानप्रकारमुक्त्वा तत्साधनधर्मस्य तत्त्वं नारदोक्तमेवाह तत्रेति पंचभिः यैर्धर्मैर्यथानुष्ठितैर्वा रतिरिति यत्स्वयमु
पायो भवतीत्युक्तः तथा हि गीतासु यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति भ
क्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः इत्यादि २९ तत्रैवांतरंगान्धर्मानाह गुरोः शुश्रूषया भक्त्या प्रेम्णा सर्वेषां ल

तत्रोपायसहस्राणामयं भगवतोदितः यदीश्वरे भगवति यथा यैरंजसा रतिः २९ गुरुशुश्रूषया भक्त्या सर्वल
ब्धार्पणेन च संगेन साधुभक्तानामीश्वराराधनेन च ३० श्रद्धया तत्कथायां च कीर्तनैर्गुणकर्मणां तत्पादां
बुरुहध्यानात्तल्लिंगेक्षार्हणादिभिः ३१ हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः इति भूतानि मनसा कामैस्तैः
साधु मानयेत् ३२ एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे वासुदेवे भगवति यया संलभते रतिं ३३ निशम्य
कर्माणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कंठ उद्गायति रौति
नृत्यति ३४ यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रंदते ध्यायति वंदते जनं मुहुः श्वसन् वक्ति हरे जगत्पते नारा
यणेत्यात्ममतिर्गतत्रपः ३५

ब्धानामर्पणेन च ३० तस्य लिंगानां मूर्तीनामीक्षणमर्हणं चादिर्येषां वंदनादीनां तैश्च ३१ ३२ निर्जिताः षण्णां कामक्रोधलोभ
मोहमत्सराणां इंद्रियाणां वा वर्गा यैः ३३ भगवद्भक्तेर्लिंगान्याह निशम्येति त्रिभिः गुणान् भक्तवात्सल्यादीन् अतिह
र्षेण उद्गताः पुलकाः अश्रूणि च तैः गद्गदं यथा भवत्येवं प्रोत्कंठ उद्गायति ३४ ॥ ३५

इदानीं तु तयोर्वधो न सुरपक्षपातेन किंतु ब्राह्मणशापेनासुरीं योनिं प्राप्तयोरनुग्रहार्थ एवेति वक्तुमितिहासमु
पक्षिपति अत्रैवद्वेषादिसहितस्यापि दैत्यवधे १२ चेदिभूभुजः शिशुपालस्य १३ १४ एकांतभक्तानामपि दुर्लभा

अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा प्रीत्या महाक्रतौ राजन् पृच्छतेऽजातशत्रवे १२ दृष्ट्वा म
हाद्भुतं राजा राजसूये महाक्रतौ वासुदेवे भगवति सायुज्यं चेदिभूभुजः १३ तत्रासीनं सुरऋषिं
राजा पांडुसुतः क्रतौ पप्रच्छ विस्मितमना मुनीनां शृण्वतामिदं १४ यु छि उ च अहो अ
त्यद्भुतं ह्येतद्दुर्लभैकांतिनामपि वासुदेवे परे तत्त्वे प्राप्तिश्चैद्यस्य विद्विषः १५ एतद्वेदितुमि
च्छामः सर्व एव वयं मुने भगवन्निंदया वेनो द्विजैस्तमसि पातितः १६ दमघोषसुतः पाप आ
रभ्य कलभाषणात् संप्रत्यमर्षी गोविंदे दंतवक्रश्च दुर्मतिः १७ शपतोरसकृद्विष्णुं यद्ब्रह्म पर
मव्ययं श्वित्रो न जातो जिह्वायां नांधं विविशतुस्तमः १८ प्राप्तिर्विद्विषो जातेत्येतदद्भुतं हि १५ तस्य ह
वेनस्येव नरकपात एवोचितः स्यादित्याह भगवन्निंदयेति तमसि नरके १६ दमघोषस्य सुतः शिशुपालः कल
भाषणाद्बाल्ये कोमलभाषणमारभ्य संप्रति इधुनापि अमर्षी क्रोधी मत्सरी वा १७ श्वित्रः श्वेतकुष्ठः

भा॰ स॰ ३ दुरवगाह्यं दुःप्राप्यं धामस्वरूपंयस्यतस्मिन्लयंसायुज्यंईयतुः श्रीभक्तस्यापिदंतवक्त्रल्लयस्यतस्मिन्लयंसा
युज्यंतज्जातकुप्रमाणेपतसिद्धवन्निहैपाः १९ एतदद्भुततमंहि श्रीनरनस्त्रातिभ्राम्यति भगवान्सर्वज्ञस्त्वंब्रूहि
२० श्रीभाष्यसंवोध्यसीदंतिनिषीदंत्यस्यामितसत्सभातस्याःसदस्यःशृण्वत्याःकथाःप्राहइत्यन्वयः २१ भगवन्निंद
कस्यनरकपातेनभाव्यमितिवदतस्तवकोभिप्रायः भगवत्पीडाकरत्वेनवातद्भावेपिसुरापानादिवन्निषिद्ध

कथंतस्मिन्भगवतिदुरवगाह्यधामनि पश्यतांसर्वलोकानांलयमीयतुरंजसा १९ एतद्भ्राम्यति
मेबुद्धिर्दीपार्चिरिववायुना ब्रूह्येतदद्भुततमंभगवांस्तत्रकारणं २० श्री क वा राज्ञस्तद्व
चआकर्ण्यनारदोभगवानृषिः तुष्टःप्राहतमाभाष्यशृण्वत्यास्तत्सदःकथाः २१ ना द वा निं
दनस्तवसत्कारन्यक्कारार्थंकलेवरं प्रधानपरयोराजन्नविवेकेनकल्पितं २२ हिंसातदभिमाने
नदंडपारुष्ययोर्यथा यद्वैषम्यमिहभूतानांममाहमितिपार्थिव २३

निंदादिवरणाहतत्रतावद्देहाभिमानकृतनिंदानिमित्तत्वात् पीडादीनांभगवतस्तदभावात्नपीडाशंका
स्तीत्याहसार्द्धत्रिभिः निंदनंदोषकीर्तनं न्यक्कारस्तिरस्कारः निंदनस्तुत्यादिज्ञानार्थंप्रधानपुरुषयोरवि
वेकेनकलेवरंकल्पितंरचितं २२ तदभिमानेनभूतानांयथाममाहमितिवैषम्यंतत्कृतम हिंसादिकंचभ
वति तथानयस्यास्तुनरेणन्वयः दंडस्ताडनंपारुष्यंनिंदातयोर्हेतुभूतयोर्हिंसापीडाचभवति २३ ॥

भोगावसराभावाच्चैतैः कउपायोगः इत्याह निरूप्यतामिति प्राचीनैः कर्मभिः क्लिश्यमानस्य कर्मभिः क्रियान
र्थ इति वा अन्वयः ४६ ननु कर्मसु सामान्येषु भोगावसरः स्यात् तत्राह कर्माणीति न वेद कर्म तत्फलं देहादि
कं च परमार्थ इत्याह उभयं कर्म च अविवेकतः अज्ञानेनैव तन्वते ४७ यदुपाश्रया यदधीनाः ४८ भूतानां प्राणि

निरूप्यतामिह स्वार्थः कियान्देहभृतोऽसुराः निषेकादिष्ववस्थासु क्लिश्यमानस्य कर्मभिः ४६ क
र्माण्यारभते देही देहेनात्मानुवर्तिना कर्मभिस्तनुते देहमुभयं त्वविवेकतः ४७ तस्मादर्थाश्च का
माश्च धर्माश्च यदुपाश्रयाः भजतानीहयात्मानमनीहं हरिमीश्वरं ४८ सर्वेषामपि भूतानां हरि
रात्मेश्वरः प्रियः भूतैर्महद्भिः स्वकृतैः भूतानां जीवसंज्ञितः ४९ देवोऽसुरो मनुष्यो वा यक्षो गंध
र्व एव च भजन्मुकुंदचरणं स्वस्तिमान्स्याद्यथा वयं ५० नालं द्विजत्वं देवत्वमृषित्वं वासुरात्मजाः
प्रीणनाय मुकुंदस्य न वृत्तं न बहुज्ञता ५१ न दानं न तपो नेज्या न शौचं न व्रतानि च प्रीयतेऽमल
या भक्त्या हरिरन्यद्विडंबनं ५२

नां जीवसंज्ञितः ४९ असुराणां अस्माकं अत्र नाधिकारः इत्यपि न वाच्यमित्याह देव इति पं
चभिः ५० ५१ अमलया निष्कामया विडंबनं नटनमात्रम् ५२ राम राम राम राम राम राम ॥

यन्न दुःखेन भिन्नं नच ग्रस्तमनंतरं अभिलाषोपपन्नं च सुखं स्वर्गपदास्पदमित्येवंभूताः स्वर्गादिभोगा अपि न सेव्या हीत्य
त्याह एवं हीति क्षयिष्णुत्वे हेतुः क्रतुभिः कृता इति यद्यपीह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लो
कः क्षीयते इति श्रुतेः अत एव पुण्यतारतम्येन सातिशया नच निर्मत्सराः स्पर्द्धादिमत्वात् न विद्यते दृष्टश्रुतं च दूष
णं यस्मिन् ६० किंच यदर्थं यत्संकल्प्यातः संकल्पितात् विपर्यासं विपरीतं फलं अमोघं अवश्यं प्राप्नोति ६१ तदे
एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सातिशया न निर्मलाः तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेश
भजेत तत्त्वजिज्ञासये ६० यदर्थ इह कर्माणि विद्वन्मान्यसकृन्नरः करोत्यतो विपर्यासममोघं विंदते फलं ६१ सु
खाय दुःखमोक्षाय संकल्प्य इह कर्मिणः सदाप्नोतीहया दुःखमनीहायाः सुखावृतः ६२ कामान्कामयते
काम्यैर्यदर्थमिह पूरुषः सवै देहस्तु पारक्यो भंगुरो यात्युपैति च ६३ किमु व्यवहितापत्यदारागारधनाद
यः राज्यकोशगजामात्यभृत्याप्ता ममतास्पदाः ६४ किमेतैरात्मनस्तुच्छैः सह देहेन नश्वरैः अनर्थै
रर्थसंकाशैर्नित्यानंदमहोदधेः ६५
वदेवदर्शयति सुखायेति ईहया इच्छया क्रियया वा यः पूर्वमनीहया हेतुसुखेनावृतो व्याप्तः आसीत् स
ईहया दुःखमाप्नोत्येव ६२ किंच कामान् भोगान् काम्यैर्विषयैः कर्मभिर्वा पारक्यः श्वादिभोग्यः न त्वात्मीयः
भंगुरश्च ६३ किमु देहात् व्यवहिताः अपत्यादयो ममता विषया पारक्या इति वक्तव्यं ६४ किंच स्वयं पुरुषा

र्थरूपस्य किमेतैरित्याह किमेतैरिति ६५

५ मंदात्मन्नल्पबुद्धे मदाज्ञातिलंघितं त्वामद्य यमालयं नेष्यामि ६ अभीतवत् किंबलं यस्य सः किंबलः
७ वशं प्रणीता इत्यत्र हेतुः स ईश्वर इति उरवः क्रमा पादविक्षेपा यस्य वृहत्पराक्रम इति वा ओजआदिरूपः सन्

प्रश्रयावनतं दांतं बद्धांजलिमवस्थितं सर्पः पदाहत इव श्वसन्प्रकृतिदारुणः ५ हे दुर्विनीत मंदा
त्मन्कुलभेदकराधम स्तब्धं मच्छासनोद्धूतं नेष्ये त्वाद्य यमक्षयं ६ क्रुद्धस्य यस्य कंपंते त्रयो लोकाः
सहेश्वराः तस्य मे भीतवन्मूढ शासनं किंबलोत्यगाः ७ प्र द वा नकेवलं मे भवतश्च राजन्स
वै बलं बलिनां चापरेषां परेऽवरेऽमी स्थिरजंगमा ये ब्रह्मादयो येन वशं प्रणीताः ८ स ईश्वरः का
ल उरुक्रमोसावोजः सहः सत्वबलेंद्रियात्मा स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुण
त्रयेशः ९ जह्यासुरं भावमिमं त्वमात्मनः समं मनो धत्स्व न संति विद्विषः ऋतेऽजितादात्मन
उत्पथस्थितात्तद्धि ह्यनंतस्य महत्समर्हणम् १०

धैर्यंबुद्धिर्वा ९ मच्छत्रुरसौ कथं ममापि स एव बलं स्यादत आह जहीति आत्मनः स्वस्य स्वभावं त्यज अ
जितादात्मनो मनस ऋते विना अन्ये विद्विषो न संति किंच तद्धि तदेव सामान्येन मनसो धारणमेव समह
णमाराधनं १० ॥

५३॥ अच्युततां आत्मत्वं ॥ ५४ ॥ अध्यायद्वयमुपसंहरति ॥ एतावानिति तदीक्षणं गोविंदस्य सामान्यं ॥ ५५ ॥ इति
सप्तमे सप्तमः ॥ ७ ॥ अष्टमे त्विति रुषास्तंभं निघ्नन् दैत्यो हतः स्वयं ॥ आविर्भूय नृसिंहेन स च ब्रह्मादिभिः स्तुतः ॥ अंतःकृपा
सुधापूर्णकहिः क्रोधोन केशरी ॥ दैत्येंद्रमरिभावेन भजंतं समभावयत् ॥ १ ॥ एकांतसंस्थितां प्रत्यङ्निष्ठां यथा

ततो हरौ भगवति भक्तिं कुरुत दानवाः ॥ आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे ॥ ५३ ॥ दैतेयायक्ष
रक्षांसि स्त्रियः शूद्रा व्रजौकसः ॥ खगा मृगाः पापजीवाः संति ह्यच्युततां गताः ॥ ५४ ॥ एतावानेव लोकेस्मि
न्पुंसः स्वार्थः परः स्मृतः ॥ एकांतभक्तिर्गोविंदे यत्सर्वत्र तदीक्षणं ॥ ५५ ॥ इति श्रीमद्भागवते महापुराणे
सप्तमस्कंधे बालानुशासनं नाम सप्तमोध्यायः ॥ ७ ॥ नारद उवाच ॥ अथ दैत्यसुताः सर्वे श्रुत्वा तदनुवर्णि
तं ॥ जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितं ॥ १ ॥ अथाचार्य्यसुतस्तेषां बुद्धिमेकांतसंस्थितां ॥ आलक्ष्य भी
तस्त्वरितो राज्ञ आवेदयद्यथा ॥ २ ॥ श्रुत्वा तदप्रियं दैत्यो दुःसहं तनयानयं ॥ कोपावेशचलद्गात्रः पुत्रं हंतुं
मनो दधे ॥ ३ ॥ क्षिप्त्वा परुषया वाचा प्रह्लादमतदर्हणं ॥ आहेक्षमाणः पापेन तिरश्चीनेन चक्षुषा ॥ ४ ॥

यथावत् ॥ २ ॥ स च हंतुं मनो दधे ॥ कथंभूतः ॥ कोपस्यावेशेनोद्रेकेण चलत् गात्रं वपुर्यस्य सः ॥ ३ ॥ क्षिप्त्वाति
तिरस्कृत्य ॥ पापेन सरोषेण तिरश्चीनेन वक्रेण ॥ ४ ॥ रामरामरामरामरामरामरामरामरामरामरा ॥

भा० स० भगवांस्तदात्र दृश्यत इत्येव भवत्विकिमर्थं. निर्भेदभृत्येन प्रह्लादेन यद्भाषितं दृश्यत इति तत्सत्यं विधातुं कर्तुं तथात्राखि
३१ लेषु भूतेषु स्वात्मनो व्याप्तिं च सत्यं कर्तुं स्तम्भे अदृश्यत तत्किमर्थं भौतिकेषु च भावेषु भूतेष्वथ महत्सु भगवानात्तु
तिजैनैव भृत्येन भाषितं तत्सत्यं कर्तुं तथात्यद्भुतं दैत्यघातकमिति घोररूपमुद्वहन् दृश्यत तत्किमर्थं निजभृत्यैः
सनकादिभिः प्राप्तान्तरमनुजन्मैस्त्रिभिर्जन्मभिः शापमोक्षो भवत्विति तत्सत्यं कर्तुं तथात्रात्यद्भुतं ब्रह्मणो दत्तवर
स्कं ७ दृष्टमं तच्च रूपमुद्वहन् तच्चैन मृगाकारं न च मनुष्याकारमुद्वहन् सभायां मध्ये अदृश्यत तत्किमर्थं निजभृ
त्येन हिरण्यकशिपुना ब्रह्माणं प्रतियद्भाषितं भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो इति तथात्रैतनैव

सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः अदृश्यतात्यद्भुतरूपमुद्वहन्
स्तम्भे सभायां न मृगं न मानुषम् १८

हिरिति न नरैर्न मृगैरिति च ब्रह्मणा च निजभृत्येन तथास्त्विति यद्भाषितं तत्सत्यं कर्तुं न हि तद्ब्रह्मसृष्टं भूतं
न च नरो वा मृगो वा न च सभागृहस्यान्तः न च प्राग्गत्या बहिः एवं ताभ्यां भाषितं सत्यं कर्तुं यच्च हिरण्यकशिपुना
भाषितं नूनमेतद्विरोधे न मृत्युर्मे भवितेति तथाभयम कुतोऽश्चिद्योऽमर इति वक्तुं नारदेन निजभृत्येनेंद्रं प्रति
भाषितं अयं महान्संस्थां न प्राप्स्यति अनेनतानुचर इत्येनेन स्वस्य भक्तपक्षपातित्वं च यद्भाषितं तच्च सत्यं कर्तुं तथै
दृश्यत चकारान्निजभाषितं यत् कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यतीति तथा तेषामहं समुद्धर्ता मृत्यु
संसारसागरादित्यादि तच्च सत्यं कर्तुं अदृश्यतेति द्रष्टव्यम् अलमतिविस्तारेण १८

मयादिग्विजये सर्वे ... जिताः अतः सांप्रतं न संतीति सत्यमिति चेत् तत्राह दस्यूनिति एके भवादृशाः मंदाः दुरात्म
लुंपतः सर्वं संहरतः षडिंद्रियलक्षणान् शत्रून् न विजित्य अजित्वा दश दिशः स्वयं जिता मन्यंते साधोस्तु जितचित्त
स्य देहिनां समस्य ज्ञस्य विदुषः स्वाज्ञानकल्पिताः परे शात्रवः कुतः स्युः ११ व्यक्तं निश्चितं विक्लवात्मन्नित्वितारूत्य

दस्यून्तु राघएन विजित्य लुंपतो मन्यंत एके स्वजिता दिशो दश जितात्मनो ज्ञस्य समस्य देहिनां साधोः स
मोहप्रभवाः कुतः परे ११ हिर क पुरु च व्यक्तं त्वं मर्तुकामोसि योतिमात्रं विकत्थसे मुमूर्षूणां हि मं
दात्मन् ननु स्युर्विक्लवा गिरः १२ यस्त्वया मंदभाग्योक्तो मदन्यो जगदीश्वरः क्वासौ दि स सर्वत्र कस्मात्स्त
भेन दृश्यते १३ सोहं विकत्थमानस्य शिरः कायाद्धरामि ते गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितं १४ ए
ञ ४ वं दुरुक्तैर्मुहुरर्दयन् रुषा सुतं महाभागवतं महासुरः खड्गं प्रगृह्योत्पतितो वरासनात् स्तंभं तताडातिबलः स्वमु
ष्टिना १५ तदैव तस्मिन्निनदोतिभीषणो बभूव येनांडकटाहमस्फुटत् यं वै स्वधिष्ण्योपगतं त्वजादयः श्रुत्वा स्व
धामात्ययमंग मेनिरे १६ स विक्रमन् पुत्रवधेप्सुरोजसा निशम्य निर्ह्रादमपूर्वमद्भुतं अंतःसभायां न दद
र्श तत्पदं वितत्रसुर्येन सुरारियूथपाः १७
आ १ धेः १२ हे मंदभाग्य यद्यसावस्ति तर्हि क्वास्ति प्रह्लाद ह सर्वत्रास्तीति हिरण्यकशिपुराह तर्हि कस्मात्स्तंभे नास्ति।
प्रह्लादस्तु स्तंभं निरीक्ष्यमाणो नमस्यन्नाह दृश्यत इति १३ हिरण्यकशिपुस्तत्र मपश्यन्नाह सोहमिति १४ प्रह्लादेन
मूर्ध्नि बध्वांजलिना निरीक्ष्यमाणं स्तंभं ताडितवान् तत्परं तस्य ध्वनेराश्चर्यं १७

दुरासदं प्राप्नुमशक्यं सर्वाण्यपि च निर्जितानि येन क्रोधेन इतरेषामायुधप्रवेकाः शस्त्रोत्तमाः तैर्विद्रावित
दैत्यदानवानुयायेन तद्रूपं तं प्रतीमांसमानस्याग्रतः समीपे समवस्थितम् इति पूर्वेणान्वयः २३ तदा विभाव्य प्रयोजनं विमर्शपूर्व
कं तेन स दैत्यस्य युद्धमाहसन्नभिः प्रायेण महात्मायाविना हरिणा मे श्रेयमेवंभूतो वधः मृत्युहेतुः स्मृतः चिंतितः तथा

दुरासदं सर्वनिर्जितायुधप्रवेकं विद्रावितदैत्यदानवं २३ प्रायेण मेऽयं हरिणोरुमायिना वधः स्मृतो नेन्नस
मुच्यते न किं एवं ब्रुवंस्त्वभ्यापतत् गदायुधो नदन्नृसिंहं प्रति दैत्यकुंजरः २४ अलक्षितोऽग्नौ पतितः पतंग
मो यथा नृसिंहौजसि सोऽसुरस्तदा न तद्धि चित्रं खलु सत्वधामनि स्वतेजसा यो नु पुरापिबत्तमः २५ त
तोऽभिपद्याभ्यहनन्महासुरो रुषा नृसिंहं गदयोरुवेगया तं विक्रमंतं सगदं गदाधरो महोरगं तार्क्ष्यसुतो य
थाग्रहीत २६ स तस्य हस्तोत्कलितस्तदासुरो विक्रीडतो यद्वद्हिर्गरुत्मतः असाध्वमन्यंत हृतौकसो
तदा घनच्छदा भारत सर्वधिष्ण्यपाः २७

अनेन सन्तुष्यते न किंचित्स्यादित्येवं ब्रुवन्नभ्यपतदित्यन्वयः २४ त
दासोऽसुरो नृसिंहस्यौजसि दीप्तोपतितः अदृष्टोऽभवत् सत्वधामनि सत्वप्रकाशे हरौ पतितस्यात तमोमयस्यादर्शनं
तद्धि चित्रं न भवति तत्र हेतुः यो हरिः पुरा स्रष्टा प्रलयकालीनं तमः नुत्त्रेऽपिबत् ताल्लिन् २५ विक्रमंतं समंता
त्प्रहरंतं २६ हस्तादुत्कलितः निःसृतः तदा अमराः देवाः सर्वे धिष्ण्यपाः असाध्वमन्यत हृतान्यौकांसि स्थानानि

सद्दैत्यः एवं ध्वनिं श्रुत्वा तदाश्रयं सत्वं प्राणिविशेषं सर्वतो विलोकयन् स्तंभस्य मध्यान्निर्गच्छन्तं नृमृगेन्द्रयोर्मिश्ररूपं
अहो किमेतदिति मीमांसितवान् निर्विशेषः ॥ तस्यैवं मन्तं भयानकं नृसिंहरूपं मीमांसमानस्याग्रतो नृसिंहरूपः प्रादु
र्भूतः समुत्थितः ॥ १९ ॥ भयानकत्वमेव दर्शयन् तद्रूपमेवानुवर्णयति त्रिभिः ॥ प्रतप्तं चामीकरं स्वर्णमिव पिंगानि चंडानि लो
चनानि यस्मिन् सटाः जटाः ॥ केशराः स्कंधरोमाणि स्फुरद्भिः सटाकेशरैर्जृंभितं साटोपमाननं यस्मिन् ॥ करालाः तुंगाः

स सत्त्वमेनं परितो विपश्यन् स्तंभस्य मध्यादनुनिर्जिहानं ॥ नायं मृगो नापि नरो विचित्रमहो किमेतत्
न्नृमृगेंद्ररूपं ॥ मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपं तदलं भयानकं ॥ १९ ॥ प्रतप्तचामीकरचंडलो
चनं स्फुरत्सटाकेशरजृंभिताननं ॥ करालदंष्ट्रं करवालचंचलक्षुरांतजिह्वं भ्रुकुटीमुखोल्बणं ॥ २० ॥
स्तब्धोर्ध्वकर्णं गिरिकंदराद्भुतव्यात्तास्यनासं हनुभेदभीषणं ॥ दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षः
स्थलमल्पमध्यमं ॥ २१ ॥ चंद्रांशुगौरैश्छुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधं ॥ २२ ॥

दंष्ट्रा यस्मिन् ॥ करवालः खड्गः तद्वच्चंचला क्षुरांतवत्तीक्ष्णा जिह्वा यस्मिन् ॥ भ्रुकुटीयुक्तेन मुखेनोल्बणं ॥ २० ॥ स्तब्धौ उन्नतौ श
ङ्कुवद्दीर्घौ कर्णौ यस्मिन् ॥ गिरिकंदरवदद्भुतं व्यात्तं प्रसृतमास्यं नासे च यस्मिन् ॥ हनू कपोलप्रांतौ तयोर्भेदेन विदारणेन
भीषणं ॥ दिविस्पृशत्कायो यस्मिन् ॥ अलुक्समासः ॥ अदीर्घं ह्रस्वा पीवरा स्थूला ग्रीवा यस्मिन् ॥ ऊरु विशालं वक्षस्थलं य
स्मिन् तत्तथा ॥ अल्पं मध्यमं उदरं यस्मिन् ॥ २१ ॥ चंद्रांशुवद्गौरैस्तनूरुहैः लोमभिः छुरितं व्याप्तं विष्वक् सर्वतः प्रसृता भुजा
येषां ॥ अनीकानि स्तोमाः तेषां शतानि यस्मिन् ॥ नखान्येवायुधा
नि यस्मिन् ॥ २२ ॥

भा० स०
३३

नखांकुरैरुत्पाटितंहृत्सरोरुहंयस्यतं दोर्दंडानांयूथानियस्यसः तमनुपंथायेषांतान् अन्यानपितत्पक्षपातिन इत्यर्थः ३२
दैत्यवधव्यग्रस्यनृहरेःसटारोमाणिताभिरवधूताःप्रकंपिताःपरापतन् वाष्पीयंततस्यदृष्ट्याविमुष्टरोचिर्येषांतेति
रस्कृतप्रभाःअभवन्नितिशेषः दिगिभादिग्गजाः ३३ तस्यसटाभिरुत्क्षिप्तानिविमानानितैःसंकुलाव्याप्तासतीप्रो

नखांकुरोत्पाटितहृत्सरोरुहंविसृज्यतस्यानुचरानुदायुधान् अहन्समस्तान्नखशस्त्रपार्ष्णिभिर्दोर्दंडयूथो
नुपथान्सहस्रशः ३२ सटावधूताजलदाःपरापतन्ग्रहाश्चतद्दृष्टिविमुष्टरोचिषः अंभोधयःश्वासहता
विचुक्षुभुर्निर्ह्रादभीतादिगिभाविचुक्रुशुः ३३ द्यौस्तत्सटोत्क्षिप्तविमानसंकुलाःप्रोत्सर्पतक्ष्मावपदातिपी
डिता॥ शैलाःसमुत्पेतुरमुष्यरंहसातत्तेजसाखंककुभोनरेजिरे ३४ ततःसभायामुपविष्टमुत्तमेनृपासने
संभृततेजसंविभुं अलक्षितद्वैरथमत्यमर्षणंप्रचंडवक्त्रंनबभाजकश्चन ३५ निशाम्यलोकत्रयमस्त
कज्वरंतमादिदैत्यंहरिणाहतंमृधे प्रहर्षवेगोत्कलिताननामुहुःप्रसूनवर्षैर्ववृषुःसुरस्त्रियः ३६ तदा
विमानावलिभिर्नभस्तलंदिदृक्षतांसंकुलमासनाकिनां सुरानकादुंदुभयोथजघ्निरेगन्धर्वमुख्याननृतुर्जगुः

त्सर्प्यतस्वस्थानात्प्रकर्षेणोदसर्पत् ३४ स्वभर्तृत्वैश्वर्यमाश्चर्यमिवमत्वा कौतुहलेनतस्यासनेउपविष्टंभयात्कोपिनबभा
ज नासेवत नलक्षितोद्वैरथः प्रतियोद्धायेन ३५ लोकत्रयस्यमस्तकज्वरं शिरोव्यथेवदुःसहं प्रहर्षस्यवेगेनउत्कलि
तानिविकाशितान्याननानियासांताः न्यहसंववृषुः ३६ नाकिनांविमानावलिभिः सुरानकामानेकाःपटहाःतैर्जघ्निरेवादिताः
स्त्रियोऽप्सरसोननृतुः ३७

३३

यस्य हस्तात्स्वयं मुक्तः तं नरहरिं स्ववीर्याच्छलं तं मन्यमानः खड्गचर्मणी प्रगृह्य पुनस्तं आसज्जत अभ्यपद्यते इत्यन्वयः २८ श्ये
नस्येव वेगो यस्य तं शतचंद्रैर्वर्मभिः खड्गचर्ममार्गैः अच्छिद्रं यथा भवत्येवमुपर्यधश्चरंतं अट्टहासमेवाह स्वरं तीव्रं उत्स्वने
न महाशब्देनोल्बणं भयंकरं तद्भयेन हरेस्तेजसा च निमीलिते दृशौ यस्य २९ ग्रहणे दृष्टांतः व्यालो यथा आखुं मू
षकं विदारणे दृष्टांतः अहिं गरुड इवेति विषकृत्सर्वतः स्फुरंतं निःसरंतं यद्बलेनातुरं विवशं इंद्रेण सह युद्धे तत्र त्व

तं मन्यमानो निजवीर्यशंकितं यद्धस्तमुक्तो नृहरिं महासुरः । पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य
वेगेन जितश्रमो मृधे २८ तं श्येनवेगं शतचंद्रवर्त्मभिश्चरंतमच्छिद्रमुपर्यधो हरिः । कृत्वाट्टहासं खरमु
त्स्वनोल्बणं निमीलिताक्षं जगृहे महाजवः २९ विष्वक्स्फुरंतं सहसातुरं हरिर्व्यालो यथाखुं कुलिशाक्ष
तत्वचं द्वार्यूरुमापात्य ददार लीलया नखैर्यथाहिं गरुडो महाविषं ३० संरंभदुष्प्रेक्ष्यकराललोचनो
व्यात्ताननांतं विलिहन्स्वजिह्वया । असृक्कणालक्तकेशराननो यथांत्रमाली द्विपहत्यया हरिः ३१

युक्तेन कुलिशेन न क्षता त्वक् अपि यस्य द्वारि सभायां नांतर्न वहिः ऊरू ऊरौ निपात्य भूमौ न चांबरे न खे नखैर्व्या सुमद्भिर्वी
एतेर्दिवानक्तं परिहाराय संध्यायामिति द्रष्टव्यं ३० त्येत्यवधमुक्का तद्वत्यवधमाह द्वाभ्यां संरंभेण दुष्प्रेक्ष्याणि करा
लानि लोचनानि यस्य असृक्कणैः रक्तस्य लवैर्विंदुभिः रक्ताः अत एव अरुणाः केशराः आननं च यस्य सः करिवद्विपहत्य

यागजवधेन हरिः सिंहो यथा एवं भूतस्तस्यानुचरान्
ग्रहच्चित्युत्तरेणान्वयः ३१

३८ गंधर्वाप्सरसश्चारणाश्चेत्यर्थः ३९ नरशार्दूलं पुरुषोत्तमं ब्रह्मादयो नृसिंहस्य शंकया ॥ कुतश्चेत्तत्सः आराद्देवा
स्तुवन् सप्तदशश्लोकैः पृथक्पृथक् ४० अनंताय अनंतं प्रसादयितुं नतोस्मि अनंतत्वे हेतुः दुरंता शक्तयो यस्य तत्कुतः
विचित्राणि वीर्याणि प्रभावा यस्य तत्किमर्थं पवित्राणि शोधकानि कर्माणि यस्य पवित्रवीर्यत्वमेवाह विश्वस्येति संदधते से

ततोपव्रज्य विबुधा ब्रह्मेंद्रगिरिशादयः ऋषयः पितरः सिद्धा विद्याधरमहोरगाः ३८ मनवः प्रजानां पतयो गंध
र्वाप्सरचारणाः यक्षाः किंपुरुषाभूतवेतालाः सिद्धकिन्नराः ते विष्णुपार्षदाः सर्वे सुनंदकुमुदादयः ३९ मू
र्ध्नि बद्धांजलिपुटा आसीनं तीव्रतेजसं ईडिरे नरशार्दूलं नातिदूरचराः पृथक् ४० श्रीब्रह्मोवाच नतोस्म्यनं
ताय दुरंतशक्तये विचित्रवीर्याय पवित्रकर्मणे विश्वस्य सर्गस्थितिसंयमान् गुणैः स्वलीलया संदधतेऽव्यया
त्मने ४१ श्रीरुद्र उवाच कोपः कालो युगांतस्ते हतोयमसुरोऽल्पकः तत्सुतं पाह्युपरतं भक्तं ते भक्तव
त्सल ४२

न्यक्कुर्वते एवमपि अव्ययात्मने अप्रच्युतस्वरूपाय ४१ रुद्रस्तु तव कोपकालाभिज्ञो नायं कोपाव
सर इति तं प्रार्थयते सहस्रयुगांतस्तव कोपस्य कालः कोपायोग्यश्चायमिति त्याह अल्पकः अत्यल्पः
अतः कोपान्निवृत्य प्रह्लादं मा हिंसीरित्याह तत्सुतमिति यद्वा अकालेऽप्ययं कोपोऽस्य रक्षणार्थ इति चेत्
तर्हीदानीं कोपं त्यक्त्वेमं पाहीत्यर्थः ४२

पितरस्तु श्राद्धोद्धरणेन परमोपकारं संप्रणमंति ॥ श्राद्धानि श्राद्धयुक्तानि पिंडादीनि । नोऽस्मभ्यं पुत्रैर्दत्तानि प्रसभं बला
त्स्वयमधिकृत्य बुभुजे ॥ किंच तीर्थस्नानसमये दत्तं तिलोदकमप्यपिबत् ॥ तानि तस्योदराद्वपां आर्च्छत् आहृतवान् ॥ कथं
भूतात् ॥ नखैर्विदीर्णा वपा यस्मात् वपाविदारणस्य तत्कृतपिंडोद्धरणमेव फलमिति भावः ॥४४॥ योगसिद्धां गतिं अणि

पितर ऊचुः ॥ श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजैर्दत्तानि तीर्थसमयेऽप्यपिबत्तिलांबु ॥ तस्योदरान्नखविदीर्णवपा
द्य आर्च्छत्तस्मै नमो नृहरयेऽखिलधर्मगोप्त्रे ॥४४॥ सिद्धा ऊचुः ॥ यो नो गतिं योगसिद्धामसाधुरहार्षीद्योग
तपोबलेन ॥ नानादर्पं तं नखैर्विददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ॥४६॥ विद्याधरा ऊचुः ॥ विद्यां पृथग्धार
णयानुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः ॥ स येन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यं ॥४७॥ नागा
ऊचुः ॥ येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः ॥ तद्वक्षःपाटनेनासां दत्तानंद नमोऽस्तु ते ॥४८॥ मनव ऊचुः ॥ म
नवो वयं तव निदेशकारिणो दितिजेन देव परिभूतसेतवः ॥ भवता खलः स उपसंहृतः प्रभो करवाम ते किमनुशाधि
किंकरान् ॥४९॥

मादिसिद्धिं ॥ नाना अनेकाः दर्पा यस्य तं ॥ तस्मै तुभ्यं त्वामुद्दिश्य ॥४६॥ विद्यां अंतर्धानादिलक्षणां ॥ अनुराद्धां संप्राप्तां संख्ये युद्धे
॥४७॥ रत्नानि फणामुक्तानि स्त्रीरत्नानि च उत्तमाः स्त्रियः ॥ आसां स्त्रीणां दत्त आनंदो येन न तस्मै संबोधनं ॥ पाठांतरे अस्माकं दत्त आ
नंदो येनेति ॥४८॥ नृसिंहेनावलोकिताः संतो मूर्ध्नि कृतांजलयो मनवः प्रोचुः ॥ मनवो वयं ... परिभूताः सेतवो वर्णाश्रमध

भा० स०
३५

प्रजापतयोऽपि तद्वल्लोकिताः प्रोचुः ॥ हे परेशानते त्वयाभिसृष्टाः ॥ प्रजेशा वयं येन निषिद्धाः संततः प्रजानसृजाम
स एव भिन्नवृत्तोऽयस्य सः ॥ नु निश्चितं मतः शेते ॥ अतः परं प्रजाः स्व स्थाम इति हृष्यन्तः ॥ आहुः ॥ हे सत्वमूर्ते त्वमेवायम
वतारो जगतो मंगलं ॥ ४० ॥ गंधर्वाश्चापि तद्वल्लोकिताः प्रोचुः ॥ हे विभो वयं ते त्वदीयाः नराः ॥ नर्त्तकाः नाद्येन त्येगायकाः

प्रजापतय ऊचुः ॥ प्रजेशा वयं ते प्रजेशाभिसृष्टा नयेन प्रजा वै सृजामो निषिद्धाः ॥ स एष त्वयाभिन्नवृत्तो
नुशेते जगन्मंगलं सत्वमूर्तेऽवतारः ॥ ४० ॥ गंधर्वा ऊचुः ॥ वयं विभो तन नर्तनाद्यमायकायेनात्मसाद्वीर्य्यवि
लोऽजसा कृताः ॥ स एष नीतो भवतादशामिमां किमुत्पथस्थः कुशलाय कल्पते ॥ ४१ ॥ चारणा ऊचुः ॥ हरे त
वांघ्रिपंकजं भवापवर्गमाश्रिताः ॥ यदेष साधूहृच्छयस्त्वयासुरः समापितः ॥ ४२ ॥ यक्षा ऊचुः ॥ वयमनु
चरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह हदितिसुतेन प्रापिता वाहकत्वं ॥ स तु जनपरितापं तत्कृतं जान
ता तेन रहर उपनीतः पंचतां पंचविंश ॥ ४३ ॥
येन स्वाधीनाः कृताः कथंभूतेन वीर्य्यशौर्य्यबलशक्तिः ॥ ताभ्यामोजः प्रभावो यस्य तेन इमां दशां मृत्युं ॥ उचितमेत
दित्याहुः किमिति ॥ ४१ ॥ भवापवर्गसंसारनिवर्त्तकं ॥ आश्रयणे हेतुः ॥ ४२ ॥ यस्मात्साधूनां हृदि भजनकत्वेन
शेते तिष्ठतीति तथा ॥ स एषोऽसुरस्त्वया समापितः ॥ अंतं नीतः ॥ ४३ ॥ मनोज्ञैः ॥ कर्मभिरनुचरेषु मुख्याः पंचतां मृ
त्युं हे पंचविंशक चतुर्विंशतत्वनियामक ॥ ४३ ॥ ॥ रामरामरामराम ॥ ॥

३५

दूत्याद्याभक्ताभक्तानुकंपितामाह स्वामितिसप्तभिः॥ एवं दूरतमेवस्थितास्तुवंतः मन्युनासंरंभ आवेशोयस्यतंउप
गंतुंनाशक्नुवन् महदद्भुतरूपंदृष्ट्वाशंकितासतीतंनोपजगाम॥ अद्भुतत्वेहेतुः॥ अदृष्टेति॥ २॥ उपेहिउपगच्छ॥ ३॥ ध
कालएवाहिः तस्माद्वित्रस्ताधीर्येषांतेषांकृतमभयंयेनतत्॥ ५॥ तस्यकरस्पर्शेनधूतंनिरस्तमखिलमशुभं

नारदउवाच॥ एवंसुरादयःसर्वेब्रह्मरुद्रपुरःसराः॥ नोपैतुमशकन्मन्युसंरंभंसुदुरासदं॥ १॥ साक्षाच्छ्रीः
प्रेषितादेवैर्दृष्ट्वातंमहदद्भुतं॥ अदृष्टाश्रुतपूर्वत्वात्सानोपेयायशंकिता॥ २॥ प्रह्लादंप्रेषयामासब्रह्मावस्थितमंतिके॥ तातप्रशमयोपेहिस्वपित्रेकुपितंप्रभुं॥ ३॥ तथेतिशनकैराजन्महाभागवतोऽर्भकः॥
उपेत्यभुविकायेननना मविधृतांजलिः॥ ४॥ स्वपादमूलेपतितंतमर्भकंविलोक्यदेवःकृपयापरिप्लु
तः॥ उत्थाप्यतच्छीर्ष्ण्यदधात्करांबुजंकालाहिवित्रस्तधियांकृताभयं॥ ५॥ सतत्करस्पर्शधुताखिलाशुभः
सपद्यभिव्यक्तपरात्मदर्शनः॥ तत्पादपद्मंहृदिनिर्वृतोदधौहृष्यत्तनुःक्लिन्नहृदश्रुलोचनः॥ ६॥ अस्तौ
षीद्धरिमेकाग्रमनसासुसमाहितः॥ प्रेमगद्गदयावाचातन्न्यस्तहृदयेक्षणः॥ ७॥

यस्यसपदितत्क्षणमेव अभिव्यक्तं अपरोक्षीभूतंपरात्मदर्शनंब्रह्मज्ञानंयस्य॥ निर्वृत्तःसन् हृदिदधौ॥ हृष्यंतीरोमांचि
तातनुर्यस्यक्लिन्नमार्द्रंहृत्यस्य॥ अश्रूणिलोचनयोर्यस्य॥ भक्तस्यश्रीपरमपुरुषार्थत्वेनयाददधौ नसाधनत्वेनेत्यर्थः॥
सुसमाहितमेवाह॥ तस्मिन्नेवन्यस्तंहृदयमीक्षणंचयेनेति॥ ७॥ रामरामरामरामरामरामरामराम

किंपुरुषास्तुत्वांस्तोतुंकेवयंवराकाइत्याहुः॥वयंकिंपुरुषास्तुप्राणिनः॥त्वंमहानद्भुतप्रभावःपुरुषेनचयंम
हन्नदैत्योहतइतिकिंनवर्ण्यतइत्याशंक्यादिवदेवदित्याहुः॥अयमिति॥५४॥सत्रेषुयज्ञेषुतेतवयाहुतःएतद्धिष्ण्य
मद्यकृतं॥५५॥अमुनादितिजेनविष्टिर्मूल्यंकर्मअद्यनिरंतरंकारिताः॥अतःपरंनःविभवायसमृद्ध्येभव॥५६॥नो

किंपुरुषाऊचुः॥वयंकिंपुरुषास्त्वंतुमहापुरुषईश्वरः॥अयंकुपुरुषोनष्टोधिक्कृतःसाधुभिर्यदा॥५४॥वै
तालिकाऊचुः॥सभासुसत्रेषुतवामलंयशोगीत्वासपर्यांमहतींलभामहे॥यस्तामव्यनैषीद्वृषमेषदुर्जनो
श२ दिष्ट्याहतस्तेभगवान्यथामयः॥५५॥किन्नराऊचुः॥वयमीशकिंनरगणास्तवानुगादितिजेनविष्टिममु
नानुकारिताः॥हरेसत्वंजिनोवयंसादितोनरसिंहनाथविभवायनोभव॥५६॥विष्णुपार्षदाऊचुः॥अद्यैतद्धरि
नररूपमद्भुतंतेदृष्टंनःशरणदसर्वलोकशर्म॥सोयंतेविधिकरईशविप्रशप्तस्तस्येदंनिधनमनुग्रहाय
विद्मः॥५७॥इतिश्रीमद्भागवतेमहापुराणेसप्तमस्कंधेप्रह्लादानुचरितेदैत्यराजवधोनामाष्टमोध्यायः॥८॥

अस्माकंभक्तानांशरणदआश्रयप्रद॥सर्वेषांलोकानांशर्ममंगलमेतद्भुतंरूपं॥अद्यैवदृष्टंनतुपूर्वं॥विधिकरःकिं
करः॥५७॥इतिसप्तमेऽष्टमः॥८॥नवमेब्रह्मणाभीत्याचोदितोऽसुरबालकः॥कोपंप्रशमयन्नस्तौन्नृसिंहम
तिभीषणम्॥१॥उग्रोप्यनुग्रएवायंस्वभक्तानांनृकेशरी॥केशरीवस्वपोतानामन्येषामुग्रविग्रहः॥ २॥॥१॥

भा० स०
३७

एवंभक्त्यैवकेवलयाहरेस्तोषःसंभवतीत्युक्तं॥ इदानींभक्तिंविनानान्यत्किंचित्तत्तोषहेतुरित्याह विप्रादिति॥ पूर्वोक्ताधना
द्ययःद्विषट्द्वादशगुणास्तैर्युक्ताद्विप्रादपिश्वपचंवरिष्ठंमन्ये॥ यद्वा॥ सत्यज्ञानोक्ताद्वादशधर्मादयोगुणाः स्मृत्युक्ताः॥ तद्युक्तं ध
र्मेचदमश्चश्रुतंचह्यमात्सर्यंह्रीस्तितिक्षानसूया॥ यज्ञश्चदानंचधृतिःशमश्चमहाव्रताद्वादशब्राह्मणस्येति॥ कथंभूतात्तु अर
विंदनाभस्यपादारविंदाद्विमुखात्॥ कथंभूतंश्वपचं॥ तस्मिन्नरविंदनाभेअर्पितामनआदयोयेनतं॥ ईहितंकर्मसर्ववरिष्ठत्वेहे
तुः॥ एवंभूतःश्वपचःसर्वंकुलंपुनाति॥ भूरिमानोगर्वोयस्य सतुविप्रःआत्मानमपिनपुनातिकुतःकुलं॥ यतोभक्तिहीनस्यैतेगुणाः

विप्राद्द्विषड्गुणयुतादरविंदनाभपादारविंदविमुखाच्छ्वपचंवरिष्ठं॥ मन्येतदर्पितमनोवचनेहितार्थप्राणं
पुनातिसकुलंनतुभूरिमानः॥१०॥ नैवात्मनःप्रभुरयंनिजलाभपूर्णोमानंजनादविदुषःकरुणोवृणी
ते॥ यद्यज्जनोभगवतेविदधीतमानंतच्चात्मनेप्रतिमुखस्ययथामुखश्रीः॥११॥

गर्वायभवंति॥ नतुशुद्ध्ये॥ अतोहीनइतिभावः॥१०॥ तर्हिकिंधनाद्यर्पणेन सन्मानंप्राकृतइवभगवानपेक्षतेनेत्याह॥ नैवेति
अयंप्रभुरीश्वरः॥ अविदुषोऽज्ञाज्जनात्॥ मानंपूजामात्मनोर्थेनवृणीतेनेच्छति यतोनिजलाभेनेवपूर्णः॥ तर्हिपूजानेच्छ
यैवतत्राह॥ करुणःकृपालुः॥ अतोवृणीतेच॥ तत्रहेतुः॥ यद्यदिति॥ यंयंमानं॥ यद्वा॥ यद्यस्मात् यत् येनधनादिनाभगवते
मानंविदधीततदेवात्मनेभवतिनान्यत्॥ यथामुखेकृतेवतिलकादिश्रीःशोभाप्रतिबिंबस्यभवतिनतुसाक्षात्तस्यैवक

३७

स्वस्मिन्निवसमस्तेषु तत्कृपामरतत्वर्थये ॥ प्रह्लादः स्तौति सत्पद्यैर्द्धिचत्वारिंशता हरिं ॥ तत्रतावदात्मनोभगवत्स्तुता
वनधिकारमिवाशंक्याधिकारंसंभावयन्नाह ॥ ब्रह्मादय इति पंचभिः ॥ मुनयो मननशीलाः ॥ सिद्धाः ज्ञानिनोपि कथं
भूताः ॥ सत्व एवैकस्मिन् तानो विस्तारो यस्याः सा मतिर्येषां ॥ तथाविधा अपि वचसां प्रवादैरपि ॥ तथा वहुभिर्वद्यमा
णैर्गुणैरपि पंश्रीनृसिंहमाराधयितुं न पिप्रुः ॥ न पूर्णाः ॥ न शक्ता इत्यर्थः ॥ स हरिर्मे कथं तोषं प्राप्तुमर्हति ॥ तत्र हेतु उग्र

प्रह्लाद उवाच ॥ ब्रह्मादयः सुरगणा मुनयोप्यसिद्धाः सत्वैकतानमतयो वचसां प्रवाहैः ॥ नाराधितुं पुरु
गुणैरधुनापि पिप्रुः कंतोष्टुमर्हहरिरुग्रजातेः ॥ ८ ॥ मन्ये धनाभिजनरूपतपः श्रुतौजस्तेजः प्रभावबलपौ
रुषबुद्धियोगाः ॥ नाराधनाय हि भवंति परस्य पुंसो भक्त्या तुतोष भगवान् गजयूथपाय ॥ ९ ॥

तिसमेह २

घोरासुरीजातिर्यस्य ॥ ८ ॥ एवं हरितोषणेस्वस्यायोग्यतां संभावयति ॥ मन्य इति द्वाभ्यां ॥ अभिजनः सत्कुले जन्म
रूपं सौंदर्यं श्रुतं पांडित्यं ओजः इंद्रियनैपुण्यं ॥ तेजः कांतिः प्रभावः प्रभावः प्रतापः ॥ पौरुषमुद्यमः बुद्धिः प्रज्ञा योगोऽ
ष्टांगः ॥ एते धनादयो द्वादशापि गुणाः परमस्य पुंसः ॥ आराधनाय न भवंति हि यतः केवलया भक्त्यैव स तु गजेंद्राय
तुष्टोऽभवत् ॥ ९ ॥

भा०स० तत्तस्माद्द्वेषाद्यज्ञानादीनां भय परिहाराय मन्युं यच्छ उपसंहर ॥ यदर्थोऽयं मन्युः स चासुरः साधूनां संतोषार्थमद्य हतः ॥ अतः
३८ परं क्रोधेन कार्याभावात्क्रोधं नियच्छ ॥ नन्वन्येषां वधे न साधुः किं मोदेत तत्राह ॥ वृश्चिकादेः परोपद्रवकारिणोऽन्यत
स्य वज्ञानतया हत्या वधेन तस्यैव तद्दुःखज्ञानमिति साधुरपि मोदेतैव ॥ तर्हि वद तां सुखावहत्वादमुं क्रोधं न प्रयच्छता
मिति चेत्तत्राह ॥ लोकाश्च निर्वृतिं इताः प्राप्ताः संतः प्रतियंति ॥ क्रोधोपसंहारं प्रतीक्षंते ॥ तर्हि जनानां पुनर्भयाभावाय म

तद्यच्छ मन्युमसुरश्च हतस्त्वयाद्य मोदेत साधुरपि वृश्चिकसर्पहत्या ॥ लोकाश्च निर्वृतिमिताः प्र
तियंति सर्वे रूपं नृसिंह विभयाय जनाः स्मरंति ॥१४॥ नाहं विभेम्यजित तेतिभयानकास्यजिह्वार्कने
त्रभ्रकुटीरभसोग्रदंष्ट्रात ॥ आंत्रस्रजः क्षतजकेशरशंकुकर्णात् निर्ह्रादभीतदिगिभादरिभिन्नखा
ग्रात ॥१५॥

न्युं धारयामीति चेत्तत्राह रूपमिति ॥ विभयाय भयनिवृत्त्यै एतद्रूपस्मरणादेव भयनिवृत्तेर्नेम
न्युधारणेन कृत्यमस्तीत्यर्थः ॥१४॥ त्वं चेद्बिभेषि तर्हि त्यजामीति चेत्तत्राह ॥ नाहमिति भो अजित ते ऽस्माद्रूपात् अ
हं न विभेमि कथंभूतात् ॥ आस्यं च जिह्वा च अर्कसदृशे नेत्राणि च भ्रकुटी नो रभसं आरोपश्च ॥ उग्रा दंष्ट्रा च एता
नि अतिभयानकानि यस्मिन् तस्मात् ॥ आंत्रमयः स्रजो यस्मिन् तत् आंत्रस्रक् तस्मात् क्षतजाक्ताः केशरा यस्मिन् ॥ शंकु
वदुन्नतौ स्तब्धौ कर्णौ यस्मिन् तत् च तत्तस्मात् ॥ निर्ह्रादेन भीता दिगिभा यस्मात् ॥ अरीन् भिंदंतीत्यरिभिदिता निनखाग्रा

तच्चेतच्च १

सा

तस्मादेवंभगवान्॥ भक्त्यैवतुष्यति॥ तस्मादहंनीचोऽपिविगतत्क्लावः सन् ईश्वरस्यमहिमहिमानंसर्वप्रयत्नेनस्व
मनीषानुसारेणावर्णयामि॥ अज्ञानतोपिस्तुतिकरणेहेतुमाह॥ येनैवमहिम्ना अनुवर्णितेन॥ अविद्ययासंसारम
नुप्रविष्टःपुमान्पूयेत शुद्ध्येत॥ तन्नाहि॥ अन्यस्यतथाशोधकस्याभावादित्यर्थः॥१२॥ तदेवमात्मनःस्तुतावन

तस्मादहंविगतविक्लवईश्वरस्यसर्वात्मनामहिगृणामियथामनीषं॥ नीचोजया
गुणविसर्गमनुप्रविष्टःपूयेतयेनहिपुमाननुवर्णितेन॥१२॥ सर्वेह्यमीविधिक
रास्तवसत्वधाम्नोब्रह्मादयोवयमिवेशनचोद्विजंतः॥ क्षेमायभूतयउतात्मसुखा
यचास्यविक्रीडितंभगवतोरुचिरावतारैः॥१३॥ ॥ ६६

धिकारंप्रहृत्य॥ इदानींस्तुवन्श्रीनृसिंहंगणनकोपोपसंहारंप्रार्थयते॥ सर्वेहीतिद्वाभ्यां॥ भोईश अमीउद्विजं
तोविभ्यतः सर्वेब्रह्मादयःसत्वमूर्तेस्तवविधिकरास्तन्नियोगकर्त्तारोभक्ताएवान्येनचवयमसुराइववैरभावे
नैतेभक्ताकिंतुश्रद्धयैव॥ तवरुचिरैरवतारैर्विविधंक्रीडनं॥ अस्यविश्वस्यक्षेमादिप्रयोजनायमत्वभयोत्पादनाय१३॥

ननु दासस्य योगेन प्रवृत्तस्यापि तदंतरायभूतानां पूर्वोक्तनानादुःखानां कुतः परिहारस्तत्राह सोहं त्वद्दासः सन् भो नृसिंह तव लीला
कथाः अनुगृणन् दुर्गाणि महादुःखान्यंजसा तितर्मि तरामि न गणयिष्यामीत्यर्थः तत्र हेतुः गुणैः रागादिभिः विशेषेण प्रमु
क्तः सन् तत्कुतः ते पदयुगमेवालयो येषां त एव भक्ता हंसा ज्ञानिनः तैः संगो यस्य मम सोहं कथंभूतस्य कथास्तत्राह प्रियस्ये
त्यादि कुतो ज्ञाता विरंचिना गीताः तत्संप्रदायप्रवृत्ताः तथा चाथर्वणी श्रुतिः देवा ह वै प्रजापतिमब्रुवन्नित्यादि दासस्ये
प्रवृत्तस्य भगवदनुग्रहेण सत्संगः ततो वीतरागः तया भगवद्गुणानुवर्णनं ततश्च न दुःखाभिभवः स्यादिति वाक्यार्थः
१८ ननु दुःखैस्तप्तस्य तत्प्रतीकारो लोके प्रसिद्ध एव किं मद्दैन्येनेत्यादिना तत्राह बालस्येति भो नृसिंह तप्तस्य तत्प्र

सोहं प्रियस्य सुहृदः परदेवताया लीलाकथास्तव नृसिंह विरिंचिगीताः अंजस्तितर्म्यनुगृणन् गुणविप्रमु
क्तो दुर्गाणि ते पदयुगालयहंससंगः १८ बालस्य नेह शरणं पितरौ नृसिंह नार्तस्य चागदमुदन्वति म
ज्जतो नौः तप्तस्य तत्प्रतिविधिर्य इहांजसेष्टस्ताव विभो तनुभृतां त्वदुपेक्षितानां १९

तिविधिः दुःखप्रतीकारः इह लोके योंजसा दृष्टः स त्वयोपेक्षितानां तावदेव क्षणमात्रमेव न त्वात्यंतिकः तदेवाह बाल
स्य पितरौ शरणं रक्षकौ विह न भवतः ताभ्यां पाल्यमानस्य तस्य दुःखदर्शनात् क्वचिदजिशत्तीदिना ताभ्यामेव तेन ह
धर्षणाच्च न चार्त्तस्य रोगिणः अगदमौषधं शरणं कृतेप्यौषधे मृत्युदर्शनात् न चोदन्वति समुद्रे मज्जतां पुंसो
नौः शरणं तया सह मज्जनदर्शनात् अतस्त्वमेव शरणमित्यर्थः अथवैवं काक्वा व्याख्येयं तप्तस्य तत्प्रतिविधिर्य इह
तावत्प्रसिद्धः स त्वदुपेक्षितानां किमंजसेष्टः अपि तु नेष्ट एव यद्वा यस्तावदिह प्रतिविधिरिष्टः स किमंजसा नेवोंजे

महद्भयं त्वन्यद्वस्ती त्याह ॥ त्रस्तोस्मीति ॥ दुःसहं यदुग्रं संसारचक्रे कदनं दुःखं तस्मादहं त्रस्तोस्मी तत्र प्रयस्तोहिं स्त्राणां मध्ये स्वकर्मभिर्बद्धः सन्त्र(?)णीतः निक्षिप्तोस्मि ॥ हे कृपणवत्सल ॥ हे उत्तम ॥ कदानु त्वं प्रीतः सन्नपवर्गभिन्नं तं शरणं तवांघ्रिकमलं प्रतिक्षयसे माक्षास्यसि ॥ १६ ॥ दास्येसत्ति सत्यां तिरिति चेत्तत्र हिनानायोनिषु क्लिश्यमानस्य ममद्य

कृ १

त्रस्तोस्म्यहं कृपणवत्सल दुःसहोग्रसंसारचक्रकदनाद्बृसतां प्रणीतः ॥ बद्धः स्वकर्मभिरुशत्तम ते ङ्घ्रिमूलं प्रीतो पवर्गमरणं क्षयसे कदानु ॥ १६ ॥ यस्मात्प्रियाप्रियवियोगसंयोगजन्मशोकाग्निना सकलयोनिषु दह्यमानः ॥ दुःखौषधं तदपि दुःखमतद्धियाहं भूमन्भ्रमामि वद मे तव दास्ययोगम् ॥ १७ ॥

स्यज्ञानाभावात्त ॥ त्वमेव तदुपदिशेति प्रार्थयते ॥ यस्मादिति ॥ यस्मात्प्रियैरप्रियैश्च ॥ यथासंख्यं वियोगसंयोगाभ्यां जन्म यस्य तेन शोकाग्निना सकलेयोनिषु दह्यमानोस्मि ॥ दुःखस्य प्रतीकारः कार्य इति चेत्तत्राह ॥ दुःखस्यौषधं प्रतीकारः ॥ तदपि दुःखमेव एवमपि ॥ अतद्धियादेहाद्यभिमानेन मुह्यामि ॥ अतः हे भूमन् विभो मे तव दास्यरूपं

॥१८॥

भा० स० ८०

ननुममापिमायासेवंधात्कर्तृत्वाद्यभावात्त्वत्तः कोविशेषइत्यतआह सइति स्वधाम्नाचिच्छक्त्यानित्यंविजिताआत्मनोगु
णायेनसहित्वं यतःकालःमायाप्रेरकः अतएववशीकृताविसृज्यानांकार्य्याणांविसर्गाणांसर्ध्वनानांचसक्तयोयेन
अतः इदंदंडवन्निःपीड्यमानंमांस्वसमीपंनय २२ ननुलोकपालानांभोगान्भुंक्ष्व पित्राचराज्यमिदंदास्यामिकिमितितिसं

सत्वंहिनित्यविजितात्मगुणः स्वधाम्नाकालोवशीकृतविसृज्यविसर्गशक्तिः चक्रेविसृष्टमजयेश्व
रषोडशारेनिःपीड्यमानमुपकर्षविभोप्रपन्नं २२ दृष्टामयादिविविभोखिलधिष्ण्यपानामायुःश्रियोवि
भवइच्छतियान्जनोयं येस्मत्पितुःकुपितहासविजृंभितभ्रूविस्फूर्जितेनलुलिताःसतुतेनिरस्तः २३ त
स्मादमूस्तनुभृतामहमाशिषोज्ञआयुःश्रियंविभवमैंद्रियमाविरिंच्यात् नेच्छामितेविलुलिता
नुरुविक्रमेणकालात्मनोपनयमांनिजभृत्यपार्श्वं २४

सारादुद्विजसेतत्राह दृष्टाइतित्रिभिः श्रियःसंपदः विभवउद्भवः आयुरादयोइच्छाइतिकाकाक्षत्वमुक्तं ते
देवाहृयेअस्मत्पितुःकोपहासविकृतभ्रूभंगमात्रेणविध्वस्ताः सचत्वयानिरस्तः २३ यस्मादेवंतस्मादाशिषःभो
गान्भुंक्ष्व तत्परिपाकंविद्वान् अहंऐंद्रियं इंद्रियैर्भोग्यंब्रह्मलोकभोगमभिव्याप्यकिमपिनेच्छामि नेकालात्मनाउरु
क्रमेणविलुलितान्विध्वस्तान् अणिमादीनपि २४

८०

ननु कचित्कुतश्चित्केनचित् कदाचित् कश्चिद्द्रष्टको ऽपि दृश्यत एवेत्याशंक्य तत्रापि तद्रूपेण त्वमेव द्रष्टक इत्युररीकृ
त्य तस्यैव नरहरेः सर्वात्मतामाह यस्मिन्निति अपरो ऽर्वाचीनः पित्रादिः परो ब्रह्मादिर्वा भावः कर्ता तत्कारकैर्यद्यत्करोति त
त्सर्वं भवत एव स्वरूपं न त्वत्पृथक् यस्मिन्नधिकरणे यतो निमित्तात् यर्हि यस्मिन्काले येन करणेन येन हेतुना कर्त्रा संचोदि
तश्च यस्य संबंधि यस्मादपादानात् यस्मै संप्रदानाय यदीप्सिततमं यः कर्तेत्येवं सप्तविभक्त्यर्थाः यथा येन प्रकारेणेति
क्रियाविशेषणमुक्ता नामव्ययानामर्थः पृथक्स्वभावः सत्त्वादिप्रकृतिः करोति रूपांतरयतीति २० अतो ऽन्यस्य रक्ष

यस्मिन्यतो यर्हि येन च यस्य यस्माद्यस्मै यथा यदुत यस्त्वपरः परो वा भावः करोति विकरोति पृथक्स्वभा
वः संचोदितस्तदखिलं भवतः स्वरूपं २० मायामनः सृजति कर्ममयं बलीयः कालेन चोदितगुणानुमतेन पुं
सः छंदोमयं यदजयार्पितषोडशारं संसारचक्रमज को ऽतितरेत्त्वदन्यः २१

कस्याभावात् संसारित्वाच्च नित्यमुक्तस्त्वमेव मां शरणागतं रक्षेति प्रार्थयते मायेति द्वाभ्यां त्वदंशस्य पुंसो ऽनुम
तेन ईक्षणरूपेणानुग्रहेण मनः प्रधानं लिंगं माया सृजति कथंभूता कालेन चोदिता गुणा यस्याः कथंभूतं मनः कर्म
मयं कुर्याद्रूपं बलीयः दुर्जयं छंदोमयं वेदोक्तकर्मप्रधानं च अजया जीवस्याविद्यया तद्योगार्थं अर्पिताः षोडशारा
विकारा यस्मिन् यदेवंभूतं संसारचक्रात्मकं मनः तत्करोति तरेत् भी अज त्वदन्यः त्वत्तः पृथक्स्थितः त्वामभजन्नित्यर्थः
२१

नचत्वदीयमतिचित्रमित्याह नैषेति एतेवह्न्यादयः उत्तमाः अयमसुरोऽधमश्चेत्येषापरावरमतिः जंतोः प्राकृतस्ययथात
थाभवतोनैवस्यात् अत्रहेतुः जगतः आत्मनः सुहृदश्च तर्हिसर्वत्रमत्प्रसादएकरूपश्च किंनस्यात्तत्राह संसेवयातवप्र
सादोभवति तत्रचसेवानुरूपंयत्तदिच्छानुसारेणधर्मादीनामुदयोभवति एवंसत्यपिवैषम्याभावेदृष्टांतः सुरतरु
र्यथासेवकस्यैवसंकल्पानुसारेणफलंददाति नचविषमस्तद्वत् नचपरावरत्वं अत्रकारणमितिशेषः २७ एत

नैषापरावरमतिर्भवतोननुस्याज्जंतोर्यथात्मसुहृदोजगतस्तथापि संसेवयासुरतरोरिवतेप्र
सादःसेवानुरूपमुदयोनपरावरत्वं २७ एवंजनंनिपतितंप्रभवाहिकूपे कामाभिकाममनुयः
प्रतपन्प्रसंगात कृत्वात्मसात्सुरर्षिणाभगवन्गृहीतःसोहंकथंनुविसृजेतवभृत्यसेवां २८

स्वत्वद्भृत्यरूपयाभयाप्राप्नुमितितद्भृत्यपार्श्वेमांवमानयेत्याशयेनाह एवमिति यथात्वयानुकंपितोस्मि एवंना
रदेनात्मसात्कृत्वा एवमनुगृहीतः सोहंकथंनुत्वद्भृत्यसेवांविसृजामि कथंभूतोऽनुगृहीतोस्मि प्रभवएवाहि
युक्तःकूपस्तस्मिन् कामानभितःकामयमानंजनंनिपतितमनुतत्प्रसंगात्प्रतपन्योहं तदेवंत्वद्भृत्यस्यश्रीना
रदस्यानुग्रहेणत्वयाऽत्यंतमनुकंपितोस्मि अयमेवचममपरमनुग्रहः पुनरिदमतितुच्छंमत्प्राणरक्षणादि २८

किंच वर्त्तमानकालेऽपिनभोगार्हा इत्याह कुत्रेति श्रुतिः श्रवणं तदेवसुखंयासांताम्मृगतृष्णिकावन्मिथ्याभूताश्चाशिषः
क्व अशेषाणांरुजांरोगाणांविरोहः उद्भवस्थानंक्वचेदंकलेवरंचेत्सर्वोपिजनःकिंनविरज्यतेतत्राह यदपियद्यपि इतिए
वंविद्वानयंजनः तथापिनिर्विद्यते विरक्तोनभवति कुतः कामएवाऽनलस्तंमधुतुल्यैःसुखलवैर्दुःसाध्यैरपिशामयन्॥

कुत्राशिषःश्रुतिसुखामृगतृष्णिरूपाःक्वेदंकलेवरमशेषरुजांविरोहः निर्विद्यतेनतुजनोय
दपीतिविद्वान्कामानलंमधुलवैःशमयन्दुरापैः २५ क्वाहंरजःप्रभवईशतमोधिकेस्मिन्जा
तःसुरेतरकुलेक्वतवानुकंपा नब्रह्मणोनतुभवस्यनवैरमायायन्मेर्पितःशिरसिपद्मकरःप्रसा
दः २६

कामाग्निशमनव्यग्रस्यनिर्वेदेप्यवकाशोनास्तीत्यर्थः यद्वा अचिंत्यामिदंत्वन्मायाचेष्टितमितिभावः २५
तर्हित्वंकथंनिर्विद्योसि अनर्हेपिमयिप्रवृत्तयात्वत्कृपयैवेत्याशयेनाह क्वेति रजसैवप्रभवोजन्मयस्यसः ५९
सत्त्वम्यंतंवाकुलविशेषणं तमोधिकंयस्मिन् तस्मिन्नसुराणांकुलेजातोऽहंक्व क्वचेतवानुकंपा तामेवाह ब्रह्मादीनां
शिरस्यपियोनेवार्पितःसपद्मवत्सकलसंतापहरःकरःप्रसादःपुरुषार्थरूपोमेशिरसिअर्पितइतियत् ययाऽनुकंपयेति च

भा० स०
८२

ननु यद्येतज्जगदहमेव तर्हि जगतो वैषम्येण मम वैषम्यमपि किं न स्यादित्यत आह त्वं वै त्वमेवेदं सदसत्कार्यकारणात्मकं जगत् न तु त्व
त्तः पृथक् भवांस्तु ततोऽन्यः आद्यन्तयोः पृथगवस्थानात् यत्तु यस्मादेवमतोऽयमात्मीयोऽयं पर इति या बुद्धिः सा त्वपार्था मायैव कार्यका
रणभेदं दृष्टान्तेन साधयति यद्यतः यस्य जन्मादि तत्रैव प्रकाशश्च यस्मिन्निधनं च स्थितिश्च तत् हेतुः तदेव अष्टिवीजं कारणं तरुः कार्यं
तयोर्यथा वसुकालमात्रत्वं अयमर्थः कालशब्देन नीलत्वसाधारणगुणयोगात्पृथ्वी वसुशब्देन वसुमात्रं भूतसूक्ष्मं तेन तत
रोर्यथा पृथ्वीमयवीजमात्रत्वं तस्य च यथा भूतसूक्ष्ममात्रत्वं एवं सर्वमपि कार्यकारणात्मकं जगत्परमकारणात्मकमेवेति तथा

त्वं वा इदं सदसदीश भवांस्ततोऽन्यो माया यदात्मपरबुद्धिरियं ह्यपार्था यद्यस्य जन्म निधनं स्थितिरीक्षणं
च तद्वै तदेव वसुकालवदष्टितर्वोः ३१ न्यस्येदमात्मनि जगद्विलयांबुमध्ये शेषेत्मनानिजसुखानुभ
वो निरीहः योगेन मीलितदृगात्मनिपीतनिद्रस्तुर्ये स्थितो न तु तमो न गुणांश्च युंक्षे ३२

च परमार्थसत्त्वं तदनन्यत्वमारंभणशब्दादिभ्य इति श्रुतिश्च वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति ३१ न
नु तावदंते पृथगवस्थानं दर्शयति न्यस्येति इदं जगत् आत्मना आत्मनैवात्मनि निक्षिप्य सुखमेवानुभवन्निष्क्रियः
सन् प्रलयोदकमध्ये शयनं करोषि तर्हि वैकं जीवस्य मम मापि तमोवृत्तिरूपा निद्रास्ति न हि न हि योग एव तु व
हिर्वृत्त्यभावसाम्यान्निद्रोच्यत इत्याह योगेन मीलिते दृशौ येन आत्मना स्वरूपप्रकाशेन निपीता निद्रा येन यस्तु तुर्ये अव
स्थात्रयातिरिक्ते स्वरूपे स्थितस्त्वं न तु सुप्त इवात्मना तमो युंक्त्वेन योजयसि न च पश्यसि निजात्मस्वप्नयोरिव गुणान्विषयां

श्री० टी० ८९
८२

न चेदं त्वयाऽस्मदनुग्रहार्थं कृतं किं त्वन्यार्थमित्याह ॥ भो अनंत यदेतन्मत्प्राणरक्षणं मां हंतुमुद्यतस्य मत्पितुर्व
धश्च तदुभयं स्वभृत्यानामृषिवाक्यमृतं विधातुमित्यहं मन्ये ॥ कुतः यद्यस्मात् असतः ॥ अयुक्तं विधित्सुः खड्गं प्रगृ
ह्यावोचत् ॥ किं मदपरो मद्व्यतिरिक्तः कश्चिदीश्वरोऽस्ति तर्हि त्वामिदानीमवतु ॥ तव कं शिरोऽहं हरामीति ॥ पाठांत
रे पयमेवार्थः ॥ यद्यदा अवोचत् तदा मत्प्राणरक्षणमिति वान्वयः ॥ एतच्च सत्यं विधातुं निजभृत्यभाषितमित्यत्रैव वकु
धा व्याख्यातं ॥ २९ ॥ न चेदं पक्षपातेन रक्षणं चेत्याह नन न च त्वयि स्वाभाविकं ॥ किंतु मायागुणोपाधि त्वयि सर्वात्मकत्वे
१ रक्षणं
मत्प्राणमनंत पितुर्वधश्च मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुं ॥ खड्गं प्रगृह्य यदवोचदसद्विधि
त्सुस्त्वामीश्वरो मदपरोऽवतु कं हरामि ॥ २९ ॥ एकस्त्वमेव जगदेतदमुष्य यत्त्वमाद्यंतयोः पृथगवस्य
सि मध्यतश्च ॥ सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तदनुप्रविष्टः ॥ ३० ॥
ननु तद्योगादित्याह ॥ एक इति ॥ एतज्जगत्त्वमेवैकः यद्यतः अमुष्यादावंते च पृथगवस्यसि विरामं करोषि ॥ तन्मा
त्रमपाकरणत्वेनावधित्वेन च वर्त्तस इत्यर्थः ॥ अतो मध्यतश्च त्वमेव कुतस्तर्हि भेदप्रतीतिस्तत्राह ॥ निजमायया गु
णपरिणामात्मकमिदं जगत् सृष्ट्वा तदनुप्रविष्टस्त्वं तैर्गुणैर्हि तुभ्यं तैर्नानेव रक्षकरूपैर्हंतेव च अवसितः प्रतीतः त
दुक्तं स्कंधोपक्रमे ॥ निर्गुणोपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः ॥ स्वमायागुणमाविश्य बाध्यबाधकतां गतः इत्यादि ॥ ३० ॥

टी१

भा० स०
४३

ईश्वरत्वेन च दृष्ट्वा कृतार्थोऽभूदित्याह ॥ एवं अनेन प्रकारेण सहस्रमपरिमितानि यानि वदनादीनि तैराढ्यं
मायामयं मायाप्रधानं सत्ताप्रपंचेनोपलक्षितः सन्निवेशः पादादिरचना यस्य ॥३६॥ तदा भगवांस्तस्यानुग्रहं कृत
वानित्याह ॥ तस्मा इति हयग्रीवमूर्तिं बिभ्रत्सन् रजस्तमोरूपौ मधुकैटभाख्यौ हत्वा तस्मै ब्रह्मणे श्रुतिगणान्समर्पि
तवान् तत्र हेतुः सत्वमिति ॥३७॥ एकस्त्वमेवेत्यादिभिरष्टभिः श्लोकैः ॥ यदुक्तं पद्मपातेन रुद्रेणं तद्विपदाव्धर्मसत्वो

एवं सहस्रवदनांघ्रिशिरःकरोरुनासास्यकर्णनयनाभरणायुधाढ्यं ॥ मायामयं सदुपलक्षितसन्निवेशं
दृष्ट्वा महापुरुषमाप मुदं विरिंच्यः ॥३६॥ तस्मै भवान्हयशिरस्तनुं च बिभ्रद्वेदद्रुहावतिबलौ मधुकैटभा
ख्यौ ॥ हत्वानयच्छ्रुतिगणांस्तु रजस्तमश्च सत्वं तव प्रियतमां तनुमामनंति ॥३७॥ इत्थं नृतिर्यगृषिदेवझषा
वतारैर्लोकान्विभावयसि हंसि जगत्प्रतीपान् ॥ धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियु
गोऽथ स त्वं ॥३८॥ नैतन्मनस्तव कथासु विकुंठनाथ संप्रीयते दुरितदुष्टमसाधु तीव्रं ॥ कामातुरं हर्षशोकभयै
षणार्त्तं तस्मिन्कथं तव गतिं विमृशामि दीनः ॥३९॥

पाक्षिकानतु स्वत इति ॥ तदुपसंहरति ॥ इत्थमिति विभावयसि पालयसि ॥ हंसि घातयसि कलौ तु तन्न करोषि ॥ यतस्त
दा त्वं छन्नोऽभवोऽतः त्रिष्वपि युगेष्वाविर्भावात् स एवंभूतस्त्वं त्रियुग इति प्रसिद्धः ॥३८॥ हे देव भगवतस्तत्वं निरूपस्व
स्य च तद्विचारयोग्यतां निवेदयन्प्रार्थयते ॥ नैतदिति त्रिभिः ॥ असाधु बहिर्मुखं तीव्रं दुर्दांतं ॥ हर्षशोकभयैरेषणात्रयेण
चार्त्तं दुःखितमपि त्वत्कथासु न संप्रीयते ॥ तस्मिन्नेवंभूते मनसि सति ॥ कथं तव गतिं तत्त्वं विमृशामि ॥ विचारयामि ॥३९॥ ४३

इदानीं कारणत्वेनादावपि पृथगवस्थानं दर्शयंस्तन्मध्यमस्त्वमेवेत्येतत्प्रपंचयति चतुर्भिः यस्त्वमशेषः शेषे तस्यैव ते इदं जग
त् कुः स्वरूपेनान्यस्य यतस्त्वं मध्यतोपि स्याः कथंभूतस्य निजया कालशक्त्या संचोदिताः प्रकृतेर्धर्माः सत्वादयो येन स्वरूपत्वे
हेतुः अनंतशयनात् शेषपर्यंकात् विरमत्समाधिर्यस्य तव नाभेः सकाशात् एकार्णवोदके महाब्जं लोकपद्मं अभूत् कथंभू
तं आत्मनि त्वय्येव गूढं सत् स्वकर्णिकातः सूक्ष्माद्वटबीजान्महावट इव ३२ तदेवकारणत्वेनानुगतमस्मन्मध्यतस्त्वमेव वर्त्त

तस्यैव ते वपुरिदं निजकालशक्त्या संचोदितप्रकृतिधर्मण आत्मगूढं अंभस्यनंतशयनाद्विरमत्समाधे
र्नाभेरभूत्स्वकर्णिकाद्वटवन्महाब्जं ३३ तत्संभवः कविरतोन्यदपश्यमानस्त्वां बीजमात्मनि ततं स्वब
हिर्विचिंत्य नाविंददब्दशतमप्सु निमज्जमानो जातेंकुरे कथमुहोपलभेत बीजं ३४ सत्वात्मयोनिरति
विस्मित आस्थितोंबुं कालेन तीव्रतपसा परिशुद्धभावः त्वामात्मनीश भुवि गंधमिवातिसूक्ष्मं भूतेंद्रिया
शयमये विततं ददर्श ३५

सद्भुक्तं एतदेव सुहृदः सत्वस्य ब्रह्मणोनुभवेन स्फुरयितुं तस्य प्राक्तनीमवस्थामाह
तस्मिन्नब्जे संभवो यस्य सः कविर्ब्रह्मा अतः पद्मादन्यदपश्यन् बीजं उपादानकारणं ततं व्याप्तं तस्मिन् व्याप्तं संतमपि नाविंदत् युक्तं चै
तत् उह अहो अंकुरे जाते सति बीजं तदनुगतं कारणं पृथक् कथं नाम पुमान् पश्येत् ३४ भवदुपासनया तु स्वस्मिन्नेव ददृष्टवानि
त्याह सत्वेति परा हृत्यांबु आस्थितः सन् तीव्रेण तपसा ध्यानेन अनेन सन्मात्ररूपेणोपादानतया दर्शितं भुक्तं ३५ रामरामरामराम

 वत्स प्रह्लाद त्वं मां न तारयिष्यामि तावत्तैव कृतार्थः स्याः किमनेन निर्बंधेनेत्यत आह नैवेति हे पर सर्वोत्तम त्वद्वीर्यगाय
 नमेव महामृतं तस्मिन्मग्नं चित्तं यस्य सोहं भववैतरण्याः नोद्विजे किंतु विमूढान् शोचामि तानेवाह ततो महामृतादि
मुखं चेतो येषां प्रत्युत इंद्रियार्थनिमित्तं यन्मायासुखं तदर्थं भरं कुटुंबादिभारमुद्वहतः ४३ त्वं तु तावन्मुक्तिं गृहाण तां
स्तु तत्वज्ञा मुनय उपदेक्ष्यंतीति चेत्तत्राह प्रायेणेति न विमुमुक्षेऽविमुक्तिं नेच्छामि तर्ह्यन्यं कमपि प्रार्थयिमामेवेति कि

नैवोद्विजे पर दुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः शोचे ततो विमुखचेतस इंद्रि
यार्थमायासुखाय भरमुद्वहतो विमूढान् ४३ प्रायेण देव मुनयः स्वविमुक्तिकामा मौनं चरंति विजने न परा
र्थनिष्ठाः नैतान्विहाय कृपणान्विमुमुक्ष एको नान्यं त्वदस्य शरणं भ्रमतोनुपश्ये ४४ यन्मैथुनादिगृ
हमेधिसुखं हि तुच्छं कंडूयनेन करयोरिव दुःखदुःखं तृप्यंति नेह कृपणा बहुदुःखभाजः कंडूतिवन्मनसि
जं विसहेत धीरः ४५

ति निर्विण्णासीतिचेदत आह त्वत्तोऽन्यमस्य जनस्य शरणं न पश्यामि ४४ नन्वे
ते स्त्रीसंभोगादिना सुखिन एव न कृपणास्तत्राह यदिति करयोः कंडूयनेन संघर्षणेनेव दुःखमनु दुःखं यस्मि
न् तर्हि दुःखत्वादेव ततो निर्विद्य मुच्येरन् तत्राह कृपणाः कामुकाः बहुदुःखभाजोपि इह गृहमेधिसुखेन
तृप्यंति अलमिति न मन्यते कंडूतिवत्कामुकस्य दुःसहत्वात् ननु केचित्कंडूतिमपि सहंते कामं चेत्तत्राह त्व
त्प्रसादात्तु कश्चिद्धीर एव मनसिजं कामं विसहेत न तु सर्वे अत्रापि कंडूतिवदिति दृष्टांतः ४५ ॥ ॥ ॥ ॥

किंच॥जिह्वात्राअवितृप्तासतीभोअच्युतमांमांयतोमधुरादिरसस्तत्राकर्षति॥उदरंतुक्षुधासंतप्तंसदेवयत्किंचिदाहारमात्रं
प्रति॥चपलाहक्चक्षुः॥कर्मशक्तिःकर्मेंद्रियाणिलुनंतित्रोटयंति॥४०॥नकेवलमहमेकएव॥एवंकष्टांदशामापन्नःकिंतुमहाज
नोप्येवमेवक्लिश्यति॥अतःसर्वंजनंपालयेतिप्रार्थयते॥एवमिति॥भवःसंसारएववैतरणीयमनदीतस्यांअन्योन्यतोयानिजन्मा
दीनितेभ्योतिभीतं॥स्वेषांपरेषांचविग्रहेयथायथंवैरंमैत्रंचयस्य॥एवंमूढंजनंपश्यन्॥हंतहेपारचरतस्याःपरिस्थितनित्यमुक्तहं
तेतिअहोकष्टमित्येवमनुकंप्याद्यपीपृहि॥वैतरणीमुत्तारयपालय॥४१॥एकेनमयाकथंसर्वोजनस्तारणीयइतिचेत्तत्राह॥कोन्वि

जिह्वैकतोच्युतविकर्षतिमावितृप्ताशिश्नोन्यतस्त्वगुदरंश्रवणंकुतश्चित्॥घ्राणोन्यतश्चपलदृक्कचच
कर्मशक्तिर्बह्व्यःसपत्न्यइवगेहपतिंलुनंति॥४०॥एवंस्वकर्मपतितंभववैतरण्यामन्योन्यजन्ममरणाशनभी
तभीतं॥पश्यन्जनंस्वपरविग्रहवैरमैत्रंहंतेतिपारचरपीपृहिमूढमाद्य॥४१॥कोन्वत्रतेखिलगुरोभगवन्प्रया
सउत्तारणेस्यभवसंभवलोपहेतोः॥मूढेषुवैमहदनुग्रहआर्त्तबंधोकिंतेननतेप्रियजनाननुसेवतांनः॥४२॥

त्ति॥कोन्वित्यत्रसर्वजनोत्तारणेप्रयासः॥कोपिनकुतः॥अस्यविश्वस्यभवसंभवलोपानांउत्पत्तिस्थितिसंहाराणांहेतोः
किमेतद्दुष्करमितिभावः॥उचितंचैतदित्याह॥मूढेष्विति॥त्वांचत्वदीयांश्चतारयिष्यामि॥तदेवंसंदुराग्रहंमाकुर्याइ
तिचेत्तत्राह॥तवयेप्रियजनाःभक्ताःताननुसेवमानानांनोऽस्माकं॥तेनउत्तारणेनकिंकीर्तिप्रयासोऽस्तुरबालकाहरे॥
कोन्वत्रतेखिलगुरोभगवन्प्रयासः॥प्रह्लादइत्थमुपमंत्र्यमिषोनराणामीशोनसख्यमकरोदपनीयमायां॥४२॥

भा० स०
६५
अभक्तास्तु स्वस्मिन्ननुगतामपि त्वां न जानंतीत्याह नैते इति । नैते गुणाद्यभिमानिनो देवाः आद्यंतवंतः जडोपाधित्वात् । अनाद्यंतं
निरुपाधिं त्वां न विंदंति । हि यस्मात् सुधियो विद्वांसः । एवं विचार्य शब्दाद् अध्ययनादिव्यापाराद् उपरमंति । त्वामेव समाधिना उपासत
इत्यर्थः । तथा च श्रुतिः । किमर्था वयमध्येष्यामहे । किमर्था वयं यक्ष्यामहे इति । नानुध्यायेद्बहूञ्छब्दान्वाचो विग्लापनं हि
तदिति च । स्मृतिश्च । यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य चेत्यादि । ४९ । उपसं

वि २ नैते गुणा न गुणिनो महदादयो ये सर्वे मनःप्रभृतयः सहदेवमर्त्याः । आद्यंतवंत उरुगाय नु विदंति हि
त्वामेवं विमृश्य सुधियो विरमंति शब्दात् । ४९ । तत्तेऽर्हत्तम नमः स्तुतिकर्मपूजाः कर्म स्मृतिश्चरणयोः श्रवणं
कथायां । संसेवया त्वयि विनेति षडंगया किं भक्तिं जनः परमहंसगतौ लभेत । ५० । नारद उवाच । एतावद्व
र्णितगुणो भक्त्या भक्तेन निर्गुणः । प्रह्रादं प्रणतं प्रीतो यतमन्युरभाषत । ५१ । श्रीभगवानुवाच । प्रह्रादभ
द्र भद्रं ते प्रीतोहं तेऽसुरोत्तम । वरं वृणीष्वाभिमतं कामपूरोस्म्यहं नृणां । ५२ ।

हरति तद्विति । हे अर्हत्तम । नमः स्तुतिकर्मपूजाः प्रणिपातस्तुतिसर्वकर्मार्पणानि कथापरिचर्ये चरणयोः स्मृतिश्च क
थायां श्रवणं चेत्येवं षडंगया संसेवया विना परमहंसानां गतौ प्राप्येत् त्वयि जनः कथं भक्तिं लभेत । तस्मादेवं भक्तिं विना
चर न मे स्तोत्रे भक्तिः । संसेवया विनाऽत्रेतः पूर्वं प्राक् प्रार्थितं । दास्ययोगमेव देहीति प्रकरणार्थः । ५० । एतावंतो वर्णिता गुणा
यस्य । यतमन्युः उपसंहृतकोपः । कामान् पूरयतीति तथा । यद्वा पुरुषार्थप्रवाहोस्मीत्यर्थः । ५२ । ६५

ननु मौनादिभिर्मोक्षसाधनैः स्तुतमेव तेषामेव मुक्तिः तत्राह ॥ मौनेति ॥ हे पुरुष श्रेंतयोर्मिन्न ॥ ये मौनादयो दश ते आ-
पवर्ग्याः ॥ अपवर्गहेतवः प्रसिद्धाः विविक्तवासः ॥ ते तु प्रायशः ॥ अजितेंद्रियाणां इंद्रियभोगाय अर्थार्थे विक्रीणंतो
वार्ताः जीवनोपाया भवंति ॥ दांभिकानां वार्ता अपि भवंति वा न वा ॥ दंभस्यानियतफलत्वात् ॥ ४६ ॥ त्वज्ज्ञानं तु भ-
क्तिं विना सकामैर्मौनादिभिर्न भवत्येवेत्याह ॥ रूपे इति त्रिभिः ॥ बीजांकुराविव प्रवाहापन्ने इमे सदसती का-

मौनव्रतश्रुततपोध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः ॥ प्रायः परं पुरुष ते त्वजितें-
द्रियाणां वार्ता भवंत्युत न वाऽत्र तु दांभिकानां ॥ ४६ ॥ रूपे इमे सदसती तव वेदसृष्टे बीजांकुराविव न चान्य-
दरूपकस्य ॥ युक्ताः समक्षमुभयत्र विचिन्वते त्वां योगेन वह्निमिव दारुषु नान्यतः स्यात् ॥ ४७ ॥ त्वं वायुरग्निर-
वनिर्वियदंबु मात्राः प्राणेंद्रियाणि हृदयं चिदनुग्रहश्च ॥ सर्वं त्वमेव सगुणो विगुणश्च भूमन्नान्यत्त्वदस्त्यपि
मनोवचसा निरुक्तं ॥ ४८ ॥

र्यकारणे एव ते रूपे उपलक्षणे वेदेन सृष्टे प्रकाशिते न चान्यत् ॥ स्वसमवेतं गौ-
रत्वादिकमिव दैवतादेः ॥ कुतः अरूपकस्य प्राकृतरूपादिशून्यस्य ॥ अतः युक्ताः संयताः ॥ एवं भक्तियोगेन प्रत्यक्षं त्वामुभयत्र
कार्यकारणे एवानुगतं पश्यंति ॥ मथनेन दारुषु वह्निमिव नान्यतः स्यात् ॥ ज्ञानमिति शेषः ॥ यद्वा ज्ञानप्रकारमेवाह ॥ एतदुभयमन्यतः
प्रधानपरमाण्वादेर्न स्यात् ॥ स ऐक्षतेत्यादिश्रुतेः ॥ अतस्त्वमेव कारणत्वात्सर्वत्रानुस्यूत इति ॥ ४७ ॥ तदेवाह त्वं वायुरिति ॥ हृदयं

मनः चित् चित्तं अनुग्रहः ॥ अहंकारः ॥ देवतावर्गो वा सगुणः स्थूलः
विगुणः सूक्ष्मः मनश्च वचश्च मनोवचः तेन निरुक्तं प्रकाशितं
किमपि त्वत्तोऽन्यन्नास्ति ॥ ४८ ॥

भा० स० कथमेवं भृत्यलक्षणं ज्ञानं स्यात्तत्राह यइति तेत्यन्तैः ननु कामनयाऽपि सेव्यसे कुतः स्वामिभृत्यभावः प्रसिद्धः स
७६ त्यं सोपाधिकोऽसौ न तु सात्विक इत्याह स्वामिन्यात्मनः आशिषोऽपेक्षमाणो नैव भृत्यः हेतु कामात्मनः स्वाम्यमिच्छन्यो
भृत्याय ददाति स च नैव स्वामी ६ आवयोस्तु तात्विकोऽसावित्याह अहं त्विति अनपाश्रयो निरभिसंधिः अन्यथा कामाद्य
भिसंधिना अर्थः प्रयोजनं नास्ति ७ ननु तथापि परमोदारस्य मम संतोषार्थं किमपि वृणीष्वेति चेदत आह यदीति कामांकु

यस्त आशिष आशास्ते न स भृत्यः स वै वणिक् आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः न स्वामी भृत्य
तः स्वाम्यमिच्छन्यो राति चाशिषः ६ अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः नान्यथेहावयोरर्थो राजसेव
व ३ कयोरिव ७ यदि रासीश मे कामान्वरांस्त्वं वरदर्षभ कामानां हृद्यसंरोहं भवतस्तु वृणे वरं ८ इंद्रियाणि
मनः प्राण आत्मा धर्मो धृतिर्मतिः ह्रीः श्रीस्तेजः स्मृतिः सत्यं यस्य नश्यंति जन्मना ९ विमुंचति यदा
कामान्मानवो मनसि स्थितान् तर्ह्येव पुंडरीकाक्ष भगवत्त्वाय कल्पते १० ॐ नमो भगवते तुभ्यं पुरु
षाय महात्मने हरयेऽद्भुतसिंहाय ब्रह्मणे परमात्मने ११ ग्लां असंरोहं अनुत्पत्तिं भगवतः सकाशात् ८ न
नु कामोत्तैसत्यां को दोषस्तत्राह इंद्रियादीनि यज्जन्मना नश्यंतीति आत्मा देहः कामाभावे गुणमाह विमुंचतीति
भगवत्त्वाय त्वत्समानैश्वर्याय तथा च श्रुतिः यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि स्थिताः अथ मर्त्योऽमृतो भव
त्यत्र ब्रह्म समश्नुत इति १० निर्दोषान्कामान्दातुमिच्छंतं प्रत्याख्यासन्नमस्यति ॐ नम इति ११ ७६

अप्रीणयतः॥ न ह्यहं अपूर्णकामत्वेन शोच्यितुं॥५३॥ प्रीणंति तोषयंति॥५४॥ एकांतित्वान्निरुपाधिभक्तित्वात्॥५५॥ इति स
प्तमेनवमः॥९॥ ॥७॥ ॥ दृश्ममेत्वनुगृह्यामुं भक्तमंतर्हिते हरौ प्रसंगाद्धरिणा रुद्रेकंतोनुग्रहईर्ष्यते॥१॥ उत्पत्त्या स्वभा
वेनैवासक्तं मां तेषां कामानां संगाद्भीतः॥२॥ ननु किमहं भक्तं प्रलोभयामि न हि॥ किंतु वरं वृणीष्वेति वदतस्तवाभिप्रायोऽन्य
मामप्रीणात्तत्रायुष्मन् दर्शनं दुर्लभं हि मे॥ दृष्ट्वा मां न पुनर्जंतुरात्मानं तप्तुमर्हति॥५३॥ प्रीणंति ह्यथ मां धीराः स
र्वभावेन साधवः॥ श्रेयस्कामा महाभागाः सर्वासामाशिषां पतिं॥५४॥ एवं प्रलोभ्यमानोपि वरैर्लोकप्रलोभ
नैः॥ एकांतित्वाद्भगवति नैच्छत्तानसुरोत्तमः॥५५॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे नवमो
ध्यायः॥९॥ नारद उवाच॥ भक्तियोगस्य तत्सर्वमंतरायतयार्भकः॥ मन्यमानो हृषीकेशं स्मयमान उवाच
ह॥१॥ प्रह्लाद उवाच॥ मा मां प्रलोभयोत्पत्त्यासक्तं कामेषु तैर्वरैः॥ तत्संगभीतो निर्विण्णो मुमुक्षुस्त्वामुपाश्रि
तः॥२॥ भृत्यलक्षणजिज्ञासुर्भक्तं कामेष्वचोदयत्॥ भवान्संसारबीजेषु हृदयग्रंथिषु प्रभुः॥ नान्यथा

ते खिलगुरो घटेत करुणात्मनः॥३॥

एवेत्याह॥ भृत्यलक्षणेति॥ हृदयस्य ग्रंथिवद्बंधकेषु॥ अन्यथा अनर्थसाधने प्रवर्तनम्॥ न
घटेतेत्यर्थः॥३॥ रामरामरामरारा॥ ॥ ॥ ॥ राममरामराम॥ ॥ ॥ss॥ रामराममरामरा

भा० स० ईश्वराज्ञाप्राप्तकर्माधिकारः सन्पितुर्निष्कृतिं प्रार्थयते त्रिभिः ॥ वरं वरणीयमेतदपरं वृणोमि त्वत्तः ॥१४॥ विद्धोऽ
६७ मर्षेण क्रोधेनाशयो यस्य ॥१५॥ ते अपांगेन संदृष्टः ॥ अतः पूत एव तथापि भो कृपणवत्सल कार्पण्येन प्रार्थ्यते ॥
त्यर्थः ॥१६॥ यद्यपि कश्यपो मरीचिर्ब्रह्मा चेति तत्पितृत्रय एव पूर्वजाः तथापि त्रिभिः सप्तभिः सहेति प्राक्कल्पगत
पित्राभिप्रायेणोक्तं ॥१७॥ यद्यस्मात्सम्यगुत्तम आचारो येषां ते कीकटा अपि देशाः ॥ तत्तुल्या वंशाश्च एवं ते शुद्धा

प्रह्लाद उवाच ॥ वरं वरय एतत्ते वरदेशान्महेश्वर ॥ यदनिंदत्पिता मे त्वामविद्वांस्तेज ऐश्वरं ॥१४॥ विद्धा
मर्षाशयः साक्षात्सर्वलोकगुरुं प्रभुं ॥ भ्रातृहेति मृषादृष्टिस्त्वद्भक्ते मयि चाघवान् ॥१५॥ तस्मात्पिता
मे पूयेत दुरंताद्दुस्तरादघात् ॥ पूतस्तेऽपांगसंदृष्टस्तदा कृपणवत्सल ॥१६॥ श्रीभगवानुवाच ॥ त्रिःसप्तभिः
पिता पूतः पितृभिः सह तेऽनघ ॥ यत्साधोऽस्य गृहे जातो भवान्वै कुलपावनः ॥१७॥ यत्र यत्र च मद्भक्ताः प्रशां
ताः समदर्शिनः ॥ साधवः समुदाचारास्ते पूयंत्यपि कीकटाः ॥१८॥ सर्वात्मना न हिंसंति भूतग्रामेषु किं
चन ॥ उच्चावचेषु दैत्येंद्र मद्भावविगतस्पृहाः ॥१९॥ भवंति पुरुषा लोके मद्भक्तास्त्वामनुव्रताः ॥ भवान्मे ख
लु भक्तानां सर्वेषां प्रतिरूपधृक् ॥२०॥

भवंति ॥१८॥ ननु त्वद्भक्तानामयं महिमेति न चित्रं अयं तु तादृशो न भवामीति चेत्तत्राह ॥ सर्वात्मनेति द्वाभ्यां ॥ मद्भा
वेन मद्भक्त्या विगता स्पृहा येषां ॥१९॥ त्वामनुगता ये केचित्पुरुषाः ते ऽप्येवं लक्षणाः संतो मद्भक्ता भवंति ॥ अतो भवान्मे भ
क्तानां सर्वेषां प्रतिरूपधृक् ॥ उपमानास्पदं श्रेष्ठः खल्वित्यर्थः ॥२०॥ ६७

सत्यमेकांतभक्तस्त्वं ॥ तथापि मदाज्ञाकरणीयेत्याह नेति मे एकांतिनः कदाचिदपि इहामुत्र च मय्याशिषो न वां-
छंत्येव ॥ तथाप्यनन्यान्वंतरमात्वं भोगान् भुंक्ष्व ॥१०॥ न नु तर्हि बंधः स्यादित्यत आह ॥ केवलेति द्वाभ्यां ॥ सर्वेषु भूतेषु संतमे-
कमीशं यज्ञाधिष्ठातारं मामात्मन्यावेश्य यजस्व ॥ तर्हि नैनैव कर्मणा बंधः स्यान्नेत्याह ॥ योगेन मय्यर्पणेन कर्म हि न त्वत्यजन्
यजस्व ॥११॥ किं च भोगेन सुखानुभवेन प्रारब्धं पुण्यं हित्वा मुक्तबंधः सन् लोकानुग्रहार्थं कीर्तिं च वितस्तार्थ्य मोक्ष्यसि

ह्र॰ १

श्रीनृसिंह उवाच ॥ नैकांतिनो मे मयि जात्विहाशा आशासतेऽमुत्र च ये भवद्विधाः ॥ अथापि मन्वंतरमेतद-
त्र दैत्येश्वराणामनुभुंक्ष्व भोगान् ॥१०॥ कथामदीयापुषमाणः प्रियास्त्वमावेश्य मामात्मनि संततमेकं ॥ सर्वेषु भू-
तेष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन् ॥११॥ भोगेन पुण्यं कुशलेन पापं केलेवरं कालजवेन हि-
त्वा ॥ कीर्तिं विशुद्धां सुरलोकगीतां वितायमामेष्यति मुक्तबंधः ॥१२॥ य एतत्कीर्तयेन्मह्यं त्वया गीतमिदं न-
रः ॥ त्वां च मां च स्मरन्काले कर्मबंधाद्विमुच्यते ॥१३॥

कुशलेन पुण्याचरणेन पापं हित्वेति विभाषामात्रं ॥ अ-
न्यथा जन्यराज्येऽवृत्तेः न तु तस्य प्राचीनं पापमस्ति ॥ तदधिगम उत्तरपूर्वार्थयोरश्लेषविनाशौ तद्व्यपदेशादिति न्या-
यात् ॥ तस्य सुकृतदुःकृते विधुनुत इति श्रुतेश्च नन्वेवं प्रारब्धपापाभिप्रायं ॥ तस्य भोगेनैव क्षयात् कुशलेन हित्वेति वचना-
नुपपत्तेः न चासाववि ह्रानेति वाच्यं ॥ भगवतैव कृतार्थत्वस्यानेतरं वेद्यमाणत्वात् अतएव योगेन कर्म हिन्वन्निती-
दमपि लोकसंग्रहार्थं कर्मणि प्रवर्त्तितस्यानुद्वेगमात्रायेति सर्वमनवद्यं ॥१२॥ किं च य इति ॥ त्वां च मां च इदं मे स्मरितं च

भा० स० ९८ टी १ ३१॥३२॥३३॥ शिशुपालदंतवक्त्रयोर्द्विषतोः श्रीकृष्णसायुज्यं कथमितियत्पृष्टं ॥ तदेव तयोः पूर्वजन्मकथादिभिरुपपादि
तमुपसंहरति ॥ एवमितिसप्तभिः ॥ दितेःपुत्रत्वं प्रापितौ विप्रशापेनेत्युत्तरस्यानुषंगः ॥ ३४ ॥ ३५ ॥ ३६ ॥ करूषजौ दंतवक्त्रः

ततः संपूज्य शिरसा ववंदे परमेष्ठिनं ॥ भवं प्रजापतीन्देवान्प्रह्लादो भगवत्कलाः ॥ ३१ ॥ ततः काव्यादिभिः
सार्द्धं मुनिभिः कमलासनः ॥ दैत्यानां दानवानां च प्रह्लादमकरोत्पतिं ॥ ३२ ॥ प्रतिनंद्य ततो देवाः प्रयुज्य
परमाशिषः ॥ स्वधामानि ययू राजन्ब्रह्माद्याः प्रतिपूजिताः ॥ ३३ ॥ एवं तौ पार्षदौ विष्णोः पुत्रत्वं प्रापितौ दितेः
हृदि स्थितेन हरिणा वैरभावेन तौ हतौ ॥ ३४ ॥ पुनश्च विप्रशापेन राक्षसौ तौ बभूवतुः ॥ कुंभकर्णदशग्री
वौ हतौ तौ रामविक्रमैः ॥ ३५ ॥ शयानौ युधि निर्भिन्नहृदयौ रामसायकैः ॥ तच्चित्तौ जहतुर्देहं यथा प्राक्त
नजन्मनि ॥ ३६ ॥ ताविहाथ पुनर्जातौ शिशुपालकरूषजौ ॥ हरौ वैरानुबंधेन पश्यतस्ते समीयतुः ॥ ३७ ॥ एनः
पूर्वकृतं यत्तद्राजानः कृष्णवैरिणः ॥ जहुस्त्वंते तदात्मानः कीटः पेशस्कृतो यथा ॥ ३८ ॥ यथा यथा भग
वतो भक्त्या परमयाभिदा ॥ नृपाश्चैद्यादयः सात्म्यं हरेस्तच्चिंतया ययुः ॥ ३९ ॥

हरौ सायुज्यं समीयतुः ॥ ३७ ॥ कृष्णनिंदादिना पूर्वकृतं च यत्त ॥ एनः पापं ॥ तद्ध्यानेन तदात्मनः संतो ज
हुः तदात्मत्वे दृष्टांतः ॥ कीटः पेशस्कृतो ध्यानेन यथा तदात्मा भवतीति ॥ ३८ ॥ अभिदा भेददर्शनशून्यया

९८

मदंगस्पर्शनेन सर्वशः पूतस्य ते पितुः पापशंकैव नास्ति केवलं पुत्रकृत्यानि प्रेतकार्याणि कुरु ॥२१॥ वेदवादिभिरुक्त
मनतिक्रम्य मत्परः सन्कर्माणि कुरु ॥२२॥२३॥२४॥२५॥ मम सृष्टिभिर्मया सृष्टैर्भूतैः समस्तनिगमानित्यर्थः ॥ अह

कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः ॥ मदंगस्पर्शनेनांग लोकान्यास्यति सुप्रजाः ॥२१॥ पित्र्यं च स्थानमा
तिष्ठ यथोक्तं ब्रह्मवादिभिः ॥ मय्यावेश्य मनस्तात कुरु कर्माणि मत्परः ॥२२॥ नारद उवाच ॥ प्रह्लादोपि तथा चक्रे
पितुर्यत्सांपरायिकं ॥ यथाह भगवान्राजन्नभिषिक्तो द्विजोत्तमैः ॥२३॥ प्रसादसुमुखं दृष्ट्वा ब्रह्मा नरहरिं हरिं ॥
स्तुत्वा वाग्भिः पवित्राभिः प्राह देवादिभिर्वृतः ॥२४॥ ब्रह्मोवाच ॥ देवदेवाखिलाध्यक्ष भूतभावन पूर्वज ॥ दिष्ट्या ते
निहतः पापो लोकसंतापनोऽसुरः ॥२५॥ योसौ लब्धवरो मत्तो न वध्यो मम सृष्टिभिः ॥ तपोयोगबलोन्नद्धः समस्त
निगमानहन् ॥२६॥ दिष्ट्यास्य तनयः साधुर्महाभागवतोऽर्भकः ॥ त्वया विमोचितो मृत्योर्दिष्ट्या त्वां समितोऽ
धुना ॥२७॥ एतद्वपुस्ते भगवन्ध्यायतः प्रयतात्मनः ॥ सर्वत्र गोपृ संत्रासान्मृत्योरपि जिघांसतः ॥२८॥ श्रीनृ
सिंह उवाच ॥ मैवं वरं सुराणां ते प्रदेयः पद्मसंभवः ॥ वरः क्रूरनिसर्गाणामहीनाममृतं यथा ॥२९॥ नारद उ
वाच ॥ इत्युक्त्वा भगवान्राजन्तत्रैवांतर्दधे हरिः ॥ अदृश्यः सर्वभूतानां पूजितः परमेष्ठिना ॥३०॥

वेहतवान् ॥ स त्वया हतः ॥२६॥ एतद्दिष्ट्या समितः सम्यक्प्राप्तः ॥२७॥ सर्वतः संत्रासात् ॥ गोपृ रक्षकं ॥ एवं वरस्त्वया न प्रदे
यः क्रूरो निसर्गः स्वभावो येषां अमृतं क्षीरं ॥२९॥ ३०॥

भा० स० अहो प्रह्लादस्य भाग्यं येन देवो दृष्टः वयं तु मंदभाग्या इति विषीदंतं तं प्रत्याह यूयमिति त्रिभिः येषां युष्माकं गृहान्
४९ मुनयोभियंति सर्वतः समायांति तत्कस्य हेतोः एवं गृहेषु एकेवलं गूढं सत् श्रीकृष्णाख्यं परं ब्रह्म साक्षाद्वसतीति
४७ ननु कृष्णोस्माकं मातुलेयः कथं ब्रह्मेत्युच्यते तत्राह स वा इति सोयं ब्रह्मैव कथंभूतः महद्भिर्विमृग्यं यत्कैव
ल्यं निर्वाणसुखं निरुपाधिः परमानंदः तदनुभूतिरूपः वो युष्माकं खलु प्रियः सुहृदित्यादिरूपो भवति विधिकृत्

यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोभियंति येषां गृहानावसतीति साक्षाद्गूढं परं ब्रह्म मनु
ष्यलिंगं ४७ स वा अयं ब्रह्म महद्विमृग्यकैवल्यनिर्वाणसुखानुभूतिः प्रियः सुहृद्वः खलु मातुले
य आत्मार्हणीयो विधिकृद्गुरुश्च ४८ न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितं
मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ४९

आज्ञानुवर्ती ४८ ननु परंब्रह्म चेत्कथं षोडशसहस्रस्त्रीषु रतिः कथं वा धर्माद्याचरणं तस्येत्यत आह नय
स्य रूपं तत्त्वं भवादिभिरपि धिया स्वबुद्ध्या वस्तुतया इदमित्थमिति साक्षान्नोपवर्णितं स युष्माकं स्वयमेव प्रस
न्नः अस्माकं मौनादिसाधनैस्तत्प्रसादः प्रार्थनीय एवेत्याह मौनेनेति स एष सात्वतां पतिः नः प्रसीदतु ननु
प्रह्लादस्य गृहेषु परब्रह्म वसति नच तद्दर्शनाय मुनयः तद्गृहानभियांति नच तस्य ब्रह्म मातुलेयादिरूपेण वर्तते
नच स्वयमेव प्रसन्नः अनेन यूयमेव तत्तोऽधि

६० ॥ प्रह्लादचरितार्थमुपसंहरति चतुर्भिः ॥ अवतारः श्रीनृसिंहरूपः तस्य कथा आख्याने तिशेषः ॥ ६१ ॥ प्रह्लादस्यानुचरि
तमित्यादेः ॥ समाम्नातमिति तृतीयेनान्वयः ॥ अस्मिन्नाख्याने नो क्रमसर्गस्थित्यप्ययानामीशस्य हरेर्याथात्म्यं तत्त्वं अनेन महतां हरेर्गु
णकर्मानुवर्णनं चेत्यर्थः ॥ ६२ ॥ परावरेषां देवदैत्यानां यानि स्थानानि ॥ तेषां व्यत्ययो विपर्यासः ॥ ६३ ॥ आध्यात्मिकं ॥ आत्माना

आख्यानं सर्वमेतत्ते यन्मां त्वं परिपृष्टवान् ॥ दमघोषसुतादीनां हरेः सात्म्यमपि द्विषां ॥ ६० ॥ एषा ब्रह्मण्यदेवस्य
कृष्णस्य च महात्मनः ॥ अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ॥ ६१ ॥ प्रह्लादस्यानुचरितं महाभागवतस्य च
भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः ॥ सर्गस्थित्यप्ययेशस्य गुणकर्मानुवर्णनं ॥ ६२ ॥ परावरेषां स्थाना
नां कालेन व्यत्ययो महान् ॥ धर्मो भागवतानां च भगवान्येन गम्यते ॥ ६३ ॥ आख्यानेस्मिन्समाम्नातमध्या
त्मिकमशेषतः ॥ ६४ ॥ य एतत्पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितं ॥ कीर्तयेच्छ्रद्धया [illegible] श्रुत्वा कर्मपाशैर्वि
मुच्यते ॥ ६५ ॥ एतद्य आदिपुरुषस्य मृगेंद्रलीलां दैत्येंद्रयूथपवधं प्रयतः पठेत ॥ दैत्यात्मजस्य च सतां प्रवरस्य पु
ण्यं श्रुत्वानुभावमकुतोभयमेति लोकं ॥ ६६ ॥

त्मविवेकादि ॥ ६४ ॥ एतच्छ्रवणादिफलमाह ॥ य इति द्वाभ्यां ॥ एतच्छ्रुत्वा यो कीर्तयेत् ॥ ६५ ॥ एतत् एतां मृगेंद्र
स्य लीलां तामेवाह दैत्येंद्रस्य यूथपानां वधं यः शुचिः सन् पठेत ॥ पुण्यमनुभावं प्रभावं मतिनिश्चयं वा लोकं वैकुं

घ

भा०स०
५०

कूपरसे स्वयंनिर्मितकूपामृते ५४ वज्रसाराः वज्रवद्दृढांगाः महौजसो महाबलाः मेघदलनाः मेघभेदिनो विद्यु
तैः स्पृष्टा व्यसवः सर्वे निपेतुः स्म पुरौकसः तानानीय महायोगी मयः कूपरसेऽक्षिपत् ५४ सिद्धामृतरसस्प
ष्टा वज्रसारा महौजसः उत्तस्थुर्मेघदलना वैद्युता इव वह्नयः ५९ विलोक्य भग्नसंकल्पं विमनस्कं वृष
ध्वजं तदायं भगवान्विष्णुस्तत्रोपायमकल्पयत् ६० वत्स आसीत्तदा ब्रह्मा स्वयं विष्णुरयं हि गौः प्रविश्य
त्रिपुरं काले रसकूपामृतं पपौ तेऽसुरा ह्यपि पश्यन्तो न न्यषेधन्विमोहिताः ६१ तद्विज्ञाय महायोगी रसपा
लानिदं जगौ स्वयं विशोकः शोकार्तान्स्मरन्दैवगतिं च ताम् ६२ देवोऽसुरो नरोऽन्यो वा नेश्वरोऽस्तीह कश्चन
आत्मनोऽन्यस्य वा दिष्टं दैवेनापोहितुं द्वयोः ६३ अथासौ शक्तिभिः स्वाभिः शंभोः प्राधानिकं व्यधा
त् धर्मज्ञानविरक्त्यृद्धितपोविद्याक्रियादिभिः ६४ रथं सूतं ध्वजं वाहान्धनुर्वर्म शरादि यत् संनद्धो
रथमास्थाय शरं धनुरुपाददे ६५ शरं धनुषि संधाय मुहूर्तेऽभिजितीश्वरः ददाह तेन दुर्भेद्या
हरोऽथ त्रिपुरो नृप ६६ दिवि दुंदुभयो नेदुर्विमानशतसंकुलाः देवर्षिपितृसिद्धेशा जयेति कुसुमोत्करैः अ
अवाकिरन्जगुर्हृष्टा ननृतुश्चाप्सरोगणाः ६७
रूपा वत्सरूप ५९ ६० काले मध्याह्ने ६१ ६२ आत्मनो वाऽन्यस्य वा द्वयोरपि वा दैवेन दृष्टमुपकल्पितं अपो
हितुं परिहर्तुं इह कश्चिदपीश्वरः समर्थो नास्ति ६३ असौ श्रीहरिः प्रधनं संग्रामस्तत्साधनं ६४ ६५ अभिजिति

मध्याह्ने ६६ विमानशतानि शंकुलानि संकीर्णानि येषां ते देवादयः ६७

५०

५०॥२

नन्वन्यैर्दुष्करं त्रिपुरभेदादिकं श्रीरुद्रः कृतवान् ॥ स एवं भूतईश्वरोऽप्यस्य तत्त्वेन जानातीति कथमित्यपेक्षायां तस्याप्येत
त्साहाय्ये यदिवासो प्रभावो न केवलस्येति वक्तुमाख्यानमुपक्षिपति स एष इति राजा युधिष्ठिरस्तवाच ॥ जगदीशितुरीशस्य
कीर्त्तिः ॥ कस्मिन् कर्मणि मयो हतवान् ॥ ५१ ॥ अनेन श्रीकृष्णेनोपबृंहितैः संवर्द्धितैः ॥ ५२ ॥ हैमी च रौप्या चायसी चेति तिस्रः

स एष भगवान्राजन्व्यतनोद्विहितं यशः ॥ पुरा रुद्रस्य देवस्य मयेनानंतमायिना ॥ ५० ॥ राजोवाच ॥ कस्मिन्
कर्मणि देवस्य मयोऽहन् जगदीशितुः ॥ यथा चोपचिता कीर्त्तिः कृष्णेनानेन कथ्यतां ॥ ५१ ॥ नारद उवाच ॥
निर्जिता असुरा देवैर्युध्यनेनोपबृंहितैः ॥ मायिनां परमाचार्यं मयं शरणमाययुः ॥ ५२ ॥ स निर्माय पुरस्ति
स्रो हैमीरौप्यायसीर्विभुः ॥ दुर्लक्ष्यापायसंयोगा दुर्वितर्क्यपरिच्छदाः ॥ ५३ ॥ ताभिस्तेऽसुरसेनान्यो लोकां
स्त्रीन्सेश्वरान्नृपः ॥ स्मरंतो नाशयांचक्रुः पूर्ववैरमलक्षिताः ॥ ५४ ॥ ततस्ते सेश्वरा लोका उपासाद्येश्वरं वि
भो ॥ त्राहि नस्तावकान्देव विनष्टांस्त्रिपुरालयैः ॥ ५५ ॥ अथानुगृह्य भगवान्मा भैष्टेति सुरान्विभुः ॥ शरं धनुषि संधा
य पुरेष्वस्त्रं व्यमुंचत ॥ ५६ ॥ ततोऽग्निवर्णा इषव उत्पेतुः सूर्यमंडलात् ॥ यथा मयूखसंदोहा नादृश्यंत पुरो यतः ॥ ५७ ॥

सः पुरो निर्माय तेभ्योऽददाद्विति शेषः ॥ दुर्लक्ष्यो अपायसंयोगो गमनागमने यासां ॥ दुर्वितर्क्यः परिच्छदो यासु ॥ ५३ ॥ अ
सुराणां सेनान्यः सेनापतयः पूर्ववैरं स्मरंतः ॥ ५४ ॥ अस्त्रं अभिमंत्रितं ॥ शस्त्रं अनभिमंत्रितं शरं पुरेषु व्यमुंचत ॥ ५६ ॥ ततः अ
श्र

नष्टा २

अज्ञाय श्रीनारायणाय तस्यैव मुखाच्छ्रुतं ॥५॥ तन्मुखादात्मनः श्रवणं संभावयन् विशिनष्टि यरतीति ॥६॥ प्रथमं तावद्धर्मे प्रमा
णमाह धर्मेति ॥ धर्मस्य मूलं प्रमाणं श्रुतं च स्मृतिः ॥ तद्विदां वेदविदां येन चात्मा मनः प्रसीदति तुष्यति ॥ तथा च याज्ञवल्क्यः
श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ॥ सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतमिति ॥ मनुश्च ॥ वेदोऽखिलं धर्म
मूलं स्मृतिशीले च तद्विदां ॥ आचारश्चैव साधूनामात्मनस्तुष्टिरेव चेति ॥७॥ नैवं तावन्नरमात्रसाधारणं धर्ममाह सत्य

नारद उवाच ॥ नत्वा भगवतेऽजाय लोकानां धर्महेतवे ॥ वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतं ॥५॥ यो वती
र्यात्मनोंऽशेन दाक्षायण्यां तु धर्मतः ॥ लोकानां स्वस्तये ध्यास्ते तपो बदरिकाश्रमे ॥६॥ धर्ममूलं हि भगवान् सर्ववे
दमयो हरिः ॥ स्मृतं च तद्विदां राजन् येन चात्मा प्रसीदति ॥७॥ सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः ॥ अहिं
सा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवं ॥ संतोषः समदृक्सेवा ग्राम्येहोपरमः शनैः ॥ नृणां विपर्ययेहेक्षा मौ
नमात्मविमर्शनं ॥९॥ अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः ॥ तेष्वात्मदेवताबुद्धिः सुतरां नृषु पांडव ॥१०॥

मिति पंचभिः ॥ तप एकादश्युपवासादि ॥ तथा च तपः माघादिमासेषु ॥ माघे शीतधारणं फलाहारं चांद्रायणादि च चतुर्मासे
षु ईक्षा युक्तायुक्तविवेकः ॥ शमो मनःसंयमः दमो बाह्येंद्रियाणां ॥ त्यागो दानं स्वाध्यायो यथोचितं जपः ॥८॥ संतो
षो दैवलब्धेनालंबुद्धिः ॥ समदृक्साम्यं महतां सेवा ॥ ग्राम्येहोपरमः प्रवृत्तकर्मभ्यो निवृत्तिः विपर्ययेक्षा निःफलक्रिया १०
णामीक्षणं मौनं वृथाप्रलापनिवृत्तिः ॥ आत्मविमर्शनं देहादिव्यतिरिक्तात्मानुसंधानं ॥९॥ आत्मेति देवतेति च बुद्धिः

दि॰ ॥ आदितः आरभ्य स्कंधार्थं निगमयति ॥ एवं विधानीति ॥ नलोकं नराकार मात्मनो विडंबमानस्य अनुकुर्वतः

दि॰ ॥ इति सप्तमे दशमः ॥ १० ॥ एकादशे नृणां धर्माः साधारण्येन वर्णिताः ॥ विशेषेण च वर्णानां मुख्यामुख्याश्च योषितां

॥ तदेवं दशभिर्ज्ञानभक्तियोगावुदीरितौ ॥ अथ पंचभिरध्यायैः कर्मयोगोनुवर्ण्यते ॥ १ ॥ दैत्यपतेः प्रह्लादस्य सा

एवं दग्ध्वा पुरस्तिस्रो भगवान्पुरहा नृप ॥ ब्रह्मादिभिस्तूयमानः स्वधाम प्रत्यपद्यत ॥ ६९ ॥ एवंविधान्यस्य हरेः

स्वमायया विडंबमानस्य नृलोकमात्मनः ॥ वीर्याणि गीतान्यृषिभिर्जगद्गुरो लोकान्पुनानान्यपरं वदामि किं ॥ ७० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे त्रिपुरवधो दशमोध्यायः ॥ १० ॥ श्रीशुक उवाच ॥ श्रुत्वेहितं साधुसभा

जितं महत्तमाग्रण्य उरुक्रमात्मनः ॥ युधिष्ठिरो दैत्यपतेर्मुदायुतः पप्रच्छ भूयस्तनयं स्वयंभुवः ॥ १ ॥ युधिष्ठि

र उवाच ॥ भगवन्श्रोतुमिच्छामि नृणां धर्मं सनातनं ॥ वर्णाश्रमाचारयुतं यत्पुमान्विंदते परं ॥ २ ॥ भवान्

प्रजापतेः साक्षादात्मनः परमेष्ठिनः ॥ सुतानां संमतो ब्रह्मंस्तपोयोगसमाधिभिः ॥ ३ ॥ नारायणपरा विप्रा धर्मं

गुह्यं परं विदुः ॥ करुणाः साधवः शांता त्वद्विधा न तथापरे ॥ ४ ॥

धर्मानां सभासु सभाजितं सत्कृतं ईहितं श्रुत्वा

पुनरिदं पप्रच्छ ॥ कथंभूतस्येहितं महत्तमानामग्रण्यः मुख्यस्य तत्र हेतुः उरुक्रमे आत्मा मनो यस्य ॥ १ ॥ श्रव

णेच्छायां हेतुः यत यतो धर्मात्परं ज्ञानं भक्तिं च विंदति ॥ २ ॥ ३ ॥ नतु स्मृतिकारैर्धर्मा उक्ता एव तत्राह ॥ ना

४६

५०

ब्राह्मणादीनां च चतुर्णामपि स्वरूपान् धर्मानाह विप्रस्येति सार्द्धैः सप्तभिः विप्रस्य षट्कर्माणि विहितानीत्यनुषंगः तत्र त्वध्यापनं याजनं प्रतिग्रहश्च जीविका यथाह मनुः षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह इति अन्यस्य क्षत्रियस्य अप्रतिग्रह इति प्रतिग्रहातिरिक्तं याजनमध्यापनं चापद्यनुजानाति वक्ष्यति चानंतरमेव ऋते राजन्यमिति श्रूयते च अध्यापयति केकेपप्रभृतीनां क्षत्रियाणामुपदेष्टृत्वादि प्रजापालनेधिकृतस्य क्षत्रियस्य वृत्त्यंतरमाह राज्ञ इति आदिशब्देन दुष्टशुल्कादि १४ वार्त्ता कृषिवाणिज्यलक्षणा वृत्तिर्यस्य सः

विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रहः राज्ञो वृत्तिः प्रजागोप्तुरविप्राद्वा करादिभिः १४ वैश्यस्तु वार्त्तावृत्तिश्च नित्यं ब्रह्मकुलानुगः शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत् १५ वार्त्ता विचित्रा शालीनं यायावरशिलोञ्छनं विप्रवृत्तिश्चतुर्द्धेयं श्रेयसी चोत्तरोत्तरा १६ जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः ऋते राजन्यमापत्सु सर्वेषामपि सर्वशः १७

शूद्रस्य द्विजशुश्रूषा विहिता स्वामिनो द्विजस्य शुश्रूषा वृत्तिश्च भवेत् १५ विप्रस्य मुख्यानुकल्पभेदेन वृत्त्यंतराण्याह वार्त्ता विचित्रा कृष्यादिरूपा शालीनं धान्यं विनैव प्राप्तमयाचितं यायावरं प्रत्यहं धान्ययाञ्चा शिलं शालिक्षेत्रादौ स्वामित्यक्तकणिशोपादानं उञ्छनं आपणादिपतितकणोपादानं शिलोञ्छनं द्वयमेकीकृत्य चतुर्द्धेत्युक्तं श्रेयसी उत्तमा १६ वृत्तिष्वेवं व्यवस्थां दर्शयन् आपद्वृत्तीराह जघन्यो नीचः उत्तमां अध्यापनादिरूपां ऋते राजन्यं क्षत्रियस्तु प्रतिग्रहादन्यां भजेत् १७

अस्य श्रीकृष्णस्य श्रवणादयो न वाइज्यार्चनं ११ एवं त्रिंशल्लक्षणवान् १२ इदानीं वर्णधर्मानुक्त्वा द्विजानां
लक्षणमाह संस्कारमंत्रवंतो गर्भाधानादयो यस्मिन्नच्छिन्नाः स द्विजः नहि शूद्रस्यापि संस्कारविच्छेदे सति द्विज
त्वस्यात्तत्राह अजो ब्रह्मा यमेवंभूतसंस्कारयुक्तं अजगाद न चोपनयनवंतं अतो नासौ द्विजः तथा च स्मृतिः विवा
हमात्रसंस्कारं शूद्रोपि लभतां सदा नकेनचित्समसृजच्छंदसां तं प्रजापतिरिति श्रुतिश्च गायत्र्या ब्राह्मणमसृजत

श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणं ११ नृणामयं परो धर्मः
सर्वेषां समुदाहृतः त्रिंशल्लक्षणवान्राजन्सर्वात्मा येन तुष्यति १२ संस्कारा यत्राविच्छिन्नाः स द्विजोऽ
जो जगाद यं इज्याध्ययनदानानि विहितानि द्विजन्मनां जन्मकर्मावदातानां क्रियाश्चाश्रमचोदिताः १३

त्रिष्टुप् राजन्यं जगत्या वैश्यं न केनचिच्छूद्रमिति अतो विवाहव्यतिरिक्तसंस्कारस्यनावश्यकत्वात् ॥
उपनयनस्य तु सर्वथा निषेधात् न तस्य द्विजत्वमित्यर्थः पाठांतरे वैदिकादय इति गर्भाधानादय इत्यर्थः अवै
दिकानामावश्यकान् धर्मानाह इज्येति जन्मना विशुद्धेन कुलेन कर्मणा च आचारेण च अवदातानां शुद्धानां
दुःकुलानां दुराचाराणां च नैतानि विहितानीत्यर्थः ब्रह्मचर्याद्याश्रमविहिता क्रियाश्च शूद्रस्य वर्णधर्म एव च आश्रम
भेदकृतविशेषाभावात् १३ कपिलाक्षीरपानेन ब्राह्मणीगमनेन च वेदाक्षरविचारेण शूद्रो वैनरकं व्रजेत् ४ •

किंच संमार्जनोपलेपाभ्यामित्यादि पतिं भजेदित्युत्तरेणान्वयः परिमृष्टाः दृढं वर्त्तनादिना निर्मलीकृताः परिच्छदा
गृहोपकरणानि यया सा २६ २७ किंच संतुष्टा यथालाभेन तावन्मात्रभोगेप्यलोलुपाः दक्षा अनलसा प्रिया सत्या
च वाग्यस्याः सर्वत्रापि अप्रमत्ता अवहिता अपतितं महापातकरहितं यथाह याज्ञवल्क्यः आशुद्धेः संप्रतीक्ष्यो हि महापा
तकदूषित इति २८ तत्परा सती भजेत् श्रीर्हरिमिव हर्षितमना पत्या सह २९ अप्रतिलोमजानां वृत्तिमाह वृत्तिरिति

संमार्जनोपलेपाभ्यां गृहमंडलवर्त्तनैः स्वयं च मंडिता नित्यं परिमृष्टपरिच्छदा २६ कामैरुच्चावचैः सा
ध्वी प्रश्रयेण दमेन च वाक्यैः सत्यैः प्रियैः प्रेम्णा काले काले भजेत्पतिं २७ संतुष्टालोलुपा दक्षा धर्मज्ञा प्रि
यसत्यवाक् अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं भजेत् २८ या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा हर्षि
तमना हरेर्लोके पत्या श्रीरिव मोदते २९ वृत्तिः संकरजातीनां तत्तत्कुलकृता भवेत् अचौराणामपापानाम
त्यजांतेवसायिनां ३० प्रायः स्वभावविहितो नृणां धर्मो युगे युगे वेददृग्भिः स्मृतो राजन् प्रेत्य चेह च कर्मकृत् ३१

तत्कुलकृता कुलपरंपराप्राप्तमपि चौर्यहिंसादिकं निषेधति अचौराणामपापानां चेति तत्र प्रदर्शनार्थं कांश्चित्प्रतिलोमज
विशेषानाह अंत्यजेति रजकश्चर्मकारश्च नटो वरुड एव च कैवर्तमेदभिल्लाश्च सप्तैतेंत्येवसायिनस्तु चांडालपुल्कसमा
तंगादयः तेषां परंपराप्राप्तैव वृत्तिर्निर्णेजकादिवृत्तिरित्यर्थः ३० श्रेष्ठादपि परधर्मान्नीचोपि स्वधर्म एव श्रेयानित्याह
यइति स्वभावेन सत्वादिप्रकृत्या विहितो धर्मः शर्मकृत्सुखदः नृः स्मृतः कैर्वेद एव दृक् चक्षुर्येषां तैः भगवतावोक्तं श्रेयान्

स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितादिति ३१

चतुर्विधं पूर्वोक्तां विप्रवृत्तिमित्तरेषामपि दर्शयन्नाह ऋतामृताभ्यामिति १८ श्लोकं व्याचष्टे ऋतमिति १९
तयोस्तद्वर्जने हेतुमाह सर्ववेदमय इति २० वर्णानामभिव्यंजकरूपान्धर्मानाह शम इति चतुर्भिः अच्युता
त्मत्वं श्रीविष्णुपरत्वं २१ शौर्यं युद्धोत्साहः वीर्यं प्रभावः तेजः प्रागल्भ्यम् २२ २३ अमंत्रयज्ञः नमस्कारेणैव पंचय

ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथंचन १८ ऋतमुंछशिलं प्रोक्तम
मृतं यदयाचितं मृतं तु नित्ययांच्या स्यात्प्रमृतं कर्षणं स्मृतं सत्यानृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनं १९ वर्जये
त्तां सदा विप्रो राजन्यश्च जुगुप्सितं सर्ववेदमयो विप्रः सर्वदेवमयो नृपः २० शमो दमस्तपः शौचं संतोषः क्षा
तिरार्जवं ज्ञानं दयाच्युतात्मत्वं सत्यं च ब्रह्मलक्षणं २१ शौर्यं वीर्यं धृतिस्तेजस्त्याग आत्मजयः क्षमा ब्रह्म
ण्यता प्रसादश्च रक्षा च क्षत्रलक्षणम् २२ देवगुर्वच्युते भक्तिस्त्रिवर्गपरितोषणम् आस्तिक्यमुद्य ५४
मो नित्यं नैपुण्यं वैश्यलक्षणं २३ शूद्रस्य संनतिः शौचं सेवा स्वामिन्यमायया अमंत्रयज्ञो ह्यस्तेयं सत्यं गोवि
अ० १ प्ररक्षणं २४ स्त्रीणां च पतिदेवानां तच्छुश्रूषानुकूलता तद्बंधुष्वनुवृत्तिश्च नित्यं तद्व्रतधारणं २५
ज्ञानुष्ठानं तथा च याज्ञवल्क्यः नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेदिति २४ स्त्रीधर्मानाह स्त्रीणामिति पंच
भिः पतिरेव देवो यासां तस्य पत्युः शुश्रूषा तदनुकूलता च तस्य यद्व्रतं नियमस्तस्य धारणं एतच्चतुष्टयं पतिव्रतानां

भा०स०
५६
द्वादशेवर्ण्यंते धर्मो ब्रह्मचारिवनस्थयोः॥ चतुर्णामाश्रमाणांच सा धारण्येन कथ्यन॥ वर्णादीनां धर्मा उक्ताः इदानीमाश्रम
धर्मा उच्यंते॥ तत्रास्मिन्द्वादशाध्याये ब्रह्मचारिवानप्रस्थयोरसाधारणाश्चतुर्णांसाधारणाश्चोच्यंते॥ त्रयोदशे यतेधर्माः चतुर्दशे
गृहस्थस्य पंचदशे सर्वधर्मसारसंग्रहः॥ ब्रह्मचारीगुरुकुले गुरुद्वारान्तुपासीतेत्युत्तरेणान्वयः॥१॥ ब्रह्मगायत्रीं जपन्
संध्यात्रयमप्युपासीत॥ उभेसंध्येतु यतवाकू भवेत् सायंप्रातः॥ संध्याकालनिमित्तं मौनं कुर्यादित्यर्थः॥ गुरोश्चरणौनमेत्
नारदउवाच॥ ब्रह्मचारीगुरुकुलेवसन्दांतोगुरोर्हितं॥ आचरन्दासवन्नीचोगुरौसुदृढसौहृदः॥१॥ सायंप्रातरुपा
सीतगुर्वग्न्यर्कसुरोत्तमान्॥ संध्येउभेच यतवाक्जपन्ब्रह्मसमाहितः॥२॥ छंदांस्यधीयतगुरोराहूतश्चेत्सुयं
त्रितः॥ उपक्रमेवसानेच चरणौशिरसानमेत्॥३॥ मेखलाजिनवासांसिजटादंडकमंडलून्॥ बिभृयादुपवीतंचदर्भ
पाणिर्यथोदितम्॥४॥ सायंप्रातश्चरेद्भैक्ष्यंगुरवेतन्निवेदयेत्॥ भुंजीतयद्यनुज्ञातो नोचेदुपवसेत्क्वचित्॥५॥
सुशीलोमितभुग्दक्षःश्रद्दधानोजितेंद्रियः॥ यावदर्थंव्यवहरेत्स्त्रीषुस्त्रीनिर्जितेषुच॥६॥ वर्जयेत्प्रमदागाथा
मगृहस्थोबृहद्व्रतः॥ इंद्रियाणिप्रमाथीनिहरंत्यपियतेर्मनः॥७॥ केशप्रसाधनोन्मर्दस्नपनाभ्यंजनादिकं गुरुस्त्रीभि
र्यथोदितं पालाशोदंडो ब्रह्मणस्येत्यादिनियममतिक्रम्य॥ जटाधारणंतु केशप्रसाधनाभाव मात्रम्॥४॥ ५॥
यावदर्थं॥ यथोपयोगमात्रमेव॥६॥ बृहद्व्रतः॥ ब्रह्मचर्यवान्॥ गृहस्थव्यतिरिक्तः॥ सर्वोपिगाथामपिवर्जयेत्
तत्रहेतुः॥ इंद्रियाणिबलवंतिसंयतस्यापिमनोहरंतीति॥७॥ रामरामरामरामरामरामरामरामरामराम ५४

ननु स्वाभाविककर्मणैवं धर्महेतुत्वात्कथं सुखहेतुत्वं तत्राह वृत्त्येति ॥३२॥ ननु काम्यानि कर्माणि कुर्वतस्तत्फलोपभोगरतस्य कथं
नैर्गुण्यं स्यात् तत्राह ॥ तदुक्तं प्रह्लादेन ॥ जोऽप्यस्यजेहं वकुमन्यमानः कथं विरज्येत दुरंतमोहः इत्यादि तत्राधिकारभेदे
न व्यवस्थां सदृष्टांतमाह ॥ उप्यमानमिति द्वाभ्यां पुनः सूत्यै तस्य प्रसवाय ॥३३॥ कामाश्रयेरते वासनारूपेण यस्मिन् तत् ॥ उत्कटे
वासनारूपेण यस्मिन् तत् ॥ उत्कटवासनाविष्टस्य सहसैव कामत्यागासंभवाद्द्वारा क्रमनियमेन वकुशः कामान् भुंजानस्यैव

वृत्त्या स्वभावकृतया वर्तमानः स्वकर्मकृत् ॥ हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात् ॥३२॥ उप्यमानं मुहुः क्षे-
त्रं स्वयं निर्वीर्यतामियात् ॥ न कल्पते पुनः सूत्यै उप्तं बीजं च नश्यति ॥३३॥ एवं कामाशयं चित्तं कामानामतिसेव-
या ॥ विरज्येत यथा राजन्नग्निवत्कामबिंदुभिः ॥३४॥ यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यंजकं ॥ यदन्यत्रापि दृश्येत
तत्तेनैव विनिर्दिशेत् ॥३५॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे युधिष्ठिरनारदसंवादे सदाचारवर्ण-
नेकादशोध्यायः ॥ ११ ॥

नित्यनैमित्तिकैर्विशुद्धचेतसः सत्त्वदोषदर्शनेन यथातिशोभरिप्रभृ[स्वा]नामिव शनैर्विरागो भवति ॥ यथा सवीजं क्षेत्रं
शनैर्वीजं भवति ॥ यथा च प्रज्वलितोऽग्निर्घृतविंदुभिः शाम्यति महता तु घृतपूरेण शाम्यत्येव तद्वत् ॥ प्रह्लादकृत-
स्तु कौमार एव निरस्तुपदेशो मंदवासनामधिकारिणं ॥ तदुक्तं तंत्रे च ॥ बालानेद्विनिधियो दृढ्ढारामेरिते हित्वेरिति ॥ त्रे
तत्सर्वमनवद्यं ॥३४॥ समादिभिरेव ब्राह्मणादिव्यवहारो मुख्यः ॥ न जातिमात्रादित्याह ॥ यस्येति यद्यदि वर्णांतरेपि दृ-
श्येत तद्वर्णांतरं तेनैव लक्षणनिमित्तेनैव वर्णेन विनिर्दिशेत् ॥ न तु जातिनिमित्तेनेत्यर्थः ॥ ३५ ॥ इति सप्तमे एकादशः ॥११॥

भा॰ स॰ ७ ॥ स्वधामभिः स्वाश्रयैर्भूतैर्जीवैः सहितं नियंतृतया १५ चरन् एवमाचरन् विदितं विज्ञानं विशेषं येन सः १६
५५ ऋषिलोकं महर्लोकं १७ अकृष्टं अकृष्टपच्यं शृंगारादिकं अकालतः पाककालात्पूर्वमेव निष्पन्नमित्यर्थः अर्क
पक्वं फलादि आहरेत् अश्नीयात् १८ वन्यैर्नीवारादिभिः काले चोदितान् पुराणं पूर्वसंचितं १९ हिमादीन्सहत इ

अर्थो गुरावात्मनि च सर्वभूतेष्वधोक्षजं ॥ भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत् ॥१५॥ एवंविधो ब्रह्मचा
री वानप्रस्थो यतिर्गृही ॥ चरन्विदितविज्ञानः परं ब्रह्माधिगच्छति ॥१६॥ वानप्रस्थस्य वक्ष्यामि नियमान्मु
निसंमतान् ॥ यानातिष्ठन्मुनिर्गच्छेदृषिलोकमिहांजसा ॥१७॥ न कृष्टपच्यमश्नीयादकृष्टं वाप्यकालतः ॥ अ
ग्निपक्वमथामं वा अर्कपक्वमुताहरेत् ॥१८॥ वन्यैश्चरुपुरोडाशान्निर्वपेत्कालचोदितान् ॥ लब्धे नवे नवेन्नाद्यं पुराणं तु परित्यजेत् ॥१९॥ अग्न्यर्थमेव शरणमुटजं वाद्रिकंदरं ॥ श्रयेत हिमवाय्वग्निवर्षार्का
ला॰ ३ तपषाट्स्वयं ॥२०॥ केशरोमनखश्मश्रुमलानि जटिलो दधत् ॥ कमंडल्वजिने दंडवल्कलाग्निपरिच्छदान् ॥२१॥
चरेद्वने द्वादशाब्दानष्टौ वा चतुरो मुनिः ॥ द्वावेकं वा यथा बुद्धिर्न विपद्येत कृच्छ्रतः ॥२२॥ यदाकल्पः स्वक्रियायां व्या
धिभिर्जरयाथवा ॥ आन्वीक्षिक्यां वा विद्यायां कुर्यादनशनादिकं ॥२३॥

ति तथा ॥ केशादीन् मलत्वेनाप्रक्षालनेन धारयन् कमंडल्वादींश्च दधत् ॥२१॥ कृच्छ्रतः तपःक्लेशाद्यथा बुद्धिर्न नश्येत्तु तथा
चरेत् ॥२२॥ द्वादशाब्दानंतरमपि यदि स्वधर्मानुष्ठाने अशक्तस्तर्हि वन एव वसेत् यदि तु ज्ञानाभ्यासयोग्यस्तर्हि संन्यसेदित्युत्तर

॥५५॥

नकारयेदित्यत्र हेतुः ॥ नत्विति ॥ रहः एकांते ॥ अन्यदा केशप्रसाधनादिव्यतिरिक्तावसरे वा यावदर्थं तदुक्तं कुर्यात् ॥ ९
ननु मिथ्यात्वादेतिकस्मात्त्वोच्च स्वयं त्यक्तप्रायस्त्र्यादिच्छया दृष्टिति कोयमृतिनिर्वंधस्तत्राह कल्पयित्वेति ॥ आत्मनो
स्वरूपसाक्षात्कारेण ॥ इदं देहादिस्त्र्याभासमात्रं कल्पयित्वा निश्चित्य यावदसौ जीव ईश्वरः स्वतंत्रो न भवेत् तावद्द्वैतं ॥ अ
हं पुमानियं स्त्रीत्यादिभेदो न विरमेत् ॥ ततः किमत आह ॥ ततो द्वैताच्च विपर्य्ययः ॥ गुणाध्यासेन भोगपतावुद्धिः ॥ अतो ज

नन्वग्निः प्रमदा नाम घृतकुंभसमः पुमान् ॥ सुतामपि रहो जह्यादन्यदा यावदर्थकृत् ॥ ९ ॥ कल्पयित्वात्मना याव
दाभासमिदमीश्वरः ॥ द्वैतं तावन्न विरमेत्ततो ह्यस्य विपर्य्ययः ॥ १० ॥ एतत्सर्वं समाम्नातं गृहस्थस्य यतेरपि ॥ गु
रुवृत्तिर्विकल्पेन गृहस्थस्यर्तुगामिनः ॥ ११ ॥ अंजनाभ्यंजनोन्मर्दस्त्र्यवलेखामिषं मधु ॥ स्रग्गंधलेपालंकारां
स्त्यजेयुर्ये धृतव्रताः ॥ १२ ॥ उषित्वैवं गुरुकुले द्विजोधीत्यावबुध्य च ॥ त्रयीं सांगोपनिषदं यावदर्थं यथाबलं ॥ १३ ॥
दत्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः ॥ गृहं वनं वा प्रविशेत्प्रव्रजेत्तत्र वा वसेत् ॥ १४ ॥

ध्यादेवेत्यर्थः ॥ १० ॥ एतत्सर्वं शुशील इत्याद्युक्तं गृहस्थस्यापि विशेषमाह ॥ गुरुवृत्तिरिति ॥ ११ ॥ अंजनादीनामामिषांतानां
द्वंद्वैक्यं ॥ अंजनं शरीरस्य अभ्यंजनं शिरसः ॥ स्त्रियं चावलेखं च चित्रकर्म स्त्रीणां कुड्यादौ लेखनं वा तन्निरीक्षणं वा ॥ अ
भ्यंगादि स्वरूपतो वा निषिध्यते सर्वं तु कथंचिदापदि प्राप्तमपि स्त्रीकर्तृत्वं निषिद्धमिति भेदः ॥ १२ ॥ अंगैः शिक्षादिभिः
रुपनिषद्भिश्च सहितां वेदत्रयीमधीत्य अवबुध्य च तदर्थं च विचार्य यावदर्थं स्वाधिकारानुसारेण ॥ १३ ॥ यदीश्वरः
शक्तः तर्हि गुरोः काममपेक्षितं वरं दत्वा यथाधिकारं गृहस्थाद्या
श्रमं स्वीकुर्यात् तत्रैव वा वसेत् ॥ नैष्ठिकः स्यादित्यर्थः ॥ १४ ॥

भा०स०
५६

परे कवौ ब्रह्मणि ॥ अध्यात्मनाहंकारेण ॥ अध्यात्मतामिति पाठे कर्मण्यप्यहंकारे चेत्यर्थः ॥ कथंभूते रुद्रे ॥ यद्यस्मादहंममताभूर्वि
कारक्रियाभवृत्ति तस्मिन्नसत्वेन चेतनया गुणैः गुणकार्यैः प्रागवशिष्टैर्देवैः सह ॥ यद्वा सत्वादिभिर्गुणैः हेतुभूतैः वैकारिकं
भोक्तृत्वादि विकारवंतं क्षेत्रज्ञं परे निर्विकारे ब्रह्मणि ॥ २९ ॥ ननु विकारवतः कथं परे लयः स्यात् ॥ विकारहेतूनां सर्वोपाधीनां
लयद्वारेणेत्याह ॥ अक्षिण्विति ॥ अदो ज्योतिः ॥ तच्च नभः कूटस्थे अहं तत्वे तच्च कूटस्थं महति महत्तत्वे ॥ तदव्यक्ते प्रधाने ॥ तच्चाव्य

ध्येः

मनो मनोरथैश्चंद्रे बुद्धिं बुद्धिं कवौ परे ॥ कर्माण्यध्यात्मना रुद्रे यदहं ममता क्रिया सत्वेन चित्तं क्षेत्रज्ञे गुणैर्वैकारिकं प
रे ॥ २९ ॥ अप्सु क्षितिमपो ज्योतिष्यदो वायौ नभस्यमुं ॥ कूटस्थे तच्च महति तदव्यक्तेऽक्षरे च तत् ॥ ३० ॥ इत्यक्षरतयात्मा
नं चिन्मात्रमवशेषितं ॥ ज्ञात्वाद्वयोऽथ विरमेद्दग्धयोनिरिवानलः ॥ ३१ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे द्वा
दशोऽध्यायः ॥ १२ ॥ नारद उवाच ॥ कल्पस्त्वेवं परिव्रज्य देहमात्रावशेषितः ॥ मासैकरात्रविधिना निरपेक्षश्चरेन्महीं ॥ १
बिभृयाद्यद्यसौ वासः कौपीनाच्छादनं परं ॥ त्यक्तं न लिंगं दंडादेरन्यत्किंचिदनापदि ॥ २

कं अक्षरे परमात्मनि रतिः सर्वोपाधिलयाच्छ्रुतौ ॥ अवशेषितं चिन्मात्रमात्मानं क्षेत्रज्ञमक्षरतया ज्ञात्वा ॥ अद्वयः सन् विरमेत् ॥ दग्धयूका
ष्ठं यथानलः ॥ ३१ ॥ इति सप्तमे द्वादशः ॥ १२ ॥ त्रयोदशे यतेर्धर्मः साधकस्योच्यते महान् ॥ अवधूतेतिहासेन सिद्धावस्था च वर्ण्यते ए
वं ध्यात्वा ॥ अकल्पोऽनशनादिकं कुर्यात् ॥ अन्तर्विविदिषा ज्ञानाभ्यासे ॥ कल्पस्त्वेवं ध्यात्वा परिव्रज्येति संबंधः ॥ कियदवशेष्यान्यद् ॥ दे
हव्यतिरिक्तं सर्वमित्याह ॥ मात्रेति ॥ तस्य धर्मानाह ॥ ग्रामैकरात्रेति ॥ नवभिः ॥ १ ॥ कौपीनाच्छाद्यते यावता तावन्मात्रं परं केवलं
अन्यदिति वा त्यक्तं ॥ प्रैषोच्चारणात्पूर्वमेव ॥ २ ॥

५६

अनशनादिकरिष्यतः पूर्वकृत्यमाह ॥ आत्मनीत्यादि यावत्समाप्तिः यथार्हतः यथायोग्यं ॥ स्वकारणेष्वाकाशादिषु संघा
तं देहं न्यसेत् अविलापयेत् ॥ २४ ॥ तदेव विभज्य दर्शयति ॥ खे आकाशे ॥ खानि देहगतछिद्राणि ॥ आत्मवान् धीमान् ॥ शेषं अस्थिमांसा
दिकठिनांशं ॥ २५ ॥ एवं स्थूलशरीरस्य लयमुक्त्वा लिंगशरीररूपस्याध्यात्मादित्रयमाह ॥ वाचमित्यादिना ॥ तत्र यद्यपि यथाद्रवं
भयस्य युक्तत्वादध्यात्मादीनां स्वस्वकारणेषु राजसाहंकारादिषु लयो वाच्यः ॥ तथापीह तेषां तदुपभावनेऽयमद्वितीयात्मन्य

आत्मन्यग्नीन्समारोप्य संन्यस्याहं ममात्मतां ॥ कारणेषु न्यसेत्सम्यक् संघातं तु यथार्हतः ॥ २४ ॥ खे खानि वायौ निश्वासां
स्तेजस्यूष्माणमात्मवान् ॥ अप्स्वसृक्श्लेष्मपूयानि क्षितौ शेषं यथोद्भवं ॥ २५ ॥ वाचमग्नौ सवक्तव्यामिंद्रे शिल्पं करावपि ॥
पदानि गत्या वयसि रत्योपस्थं प्रजापतौ ॥ २६ ॥ मृत्यौ पायुं विसर्गं च यथास्थानं विनिर्दिशेत् ॥ दिक्षु श्रोत्रं सनादेन स्पर्श
मध्यात्मनि त्वचं ॥ २७ ॥ रूपाणि चक्षुषा राजन् ज्योतिष्यभिनिवेशयेत् ॥ अप्सु प्रचेतसा जिह्वां घ्रेयैर्घ्राणं क्षितौ न्यसेत् ॥ २८ ॥

तिपन्नये परेति यथाकथंचिल्लये भाव्ये ॥ देवतानां प्रवर्त्तकत्वेन प्राधान्यादिंद्रियतद्विषययोर्देवतासु लयः कथ्यते ॥ वक्त
व्यसहितां वाचमग्नौ न्यसेत् एवं सर्वत्र पदानि पादौ वयसि विष्णौ ॥ २६ ॥ सनादेन शब्देन सह आध्यात्मनि वायौ ॥ आध्यात्मवि
दिति पाठे वायाविति ज्ञातव्यं ॥ २७ ॥ ज्योतिषि आदित्ये रसगंधयोस्त्विंद्रियाकर्षकत्वेन प्राधान्यविवक्षया देवतासहितस्यें
द्रियस्य विषये लयमाह ॥ प्रचेतसा सह जिह्वां रसनां ॥ अप्सु रसरूपासु ॥ घ्राणं अश्विनोरुपलक्षणं ॥ अश्विभ्यां सह घ्रा
णं घ्रेयैर्गंधैरुपलक्षितायां क्षितावित्यर्थः ॥ २८ ॥

भा० स०
५७

परमहंसस्य विशेषमाह ॥ न यतेराश्रमो धर्मोऽर्थः ॥ कथंभूतस्य महात्मनः ॥ तस्य लक्षणं शांतस्येत्यादि ॥ प्रायत्यस्यायंभावः ॥ ज्ञानो
त्पत्तिपर्यंतं वंडूरकादिलिंगमाश्रित्य सत्वशुद्ध्यर्थं यमान्नियमांश्चाचरेन्नैव ॥ ज्ञानोपपत्तौ यतेत ॥ उत्पन्ने तु ज्ञानेन निय
मैः कृत्यमस्ति येमाश्रमास्त एव स्युः ॥ अतस्तदा लिंगादिभिः प्रयोजनाभावाल्लोकसंग्रहार्थं धारयेद्वा त्यजेद्वेति ॥ ९ ॥ तस्यैव ज्ञानद
र्शीभावे योगभ्रंशापरिहारार्थमाह ॥ नवहिर्व्यक्तं लिंगं यस्य व्यक्तोऽर्थः प्रयोजनमात्मानुसंधानं यस्य सः ॥ मनीषापि धर्म

न यतेराश्रमः प्रायो धर्महेतुर्महात्मनः ॥ शांतस्य समचित्तस्य बिभृयादुत वा त्यजेत् ॥ ९ ॥ अव्यक्तलिंगो व्यक्तार्थो
मनीष्युन्मत्तबालवत् ॥ कविर्मूकवदात्मानं स दृष्ट्या दर्शयेन्नृणां ॥ १० ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ प्रह्ला
दस्य च संवादं मुनेराजगरस्य च ॥ ११ ॥ तं शयानं धरोपस्थे कावेर्यां सह्यसानुनि ॥ रजस्वलै स्तनूदेशैर्निगूढामल
लतेजसं ॥ १२ ॥ ददर्श लोकान्विचरंल्लोकतत्वविवित्सया ॥ वृतोऽमात्यैः कतिपयैः प्रह्लादो भगवत्प्रियः ॥ १३ ॥ कर्मणा
कृतिभिर्वाचा लिंगैर्वर्णाश्रमादिभिः ॥ न विंदंति जना यं वै सोऽसाविति न वेति च ॥ १४ ॥

उन्मत्तवद्बालवच्च ॥ कविरपि मूकवदात्मानं नृणां दृष्ट्या दर्शयेन्न ॥ ते यथोन्मत्तादिरूपं मन्येरन् तथा वर्तेत ॥ स्वदृष्ट्येतिया
गे वाह्यानुसंधानाभावेनेत्यर्थः ॥ १० ॥ परमहंसधर्ममेवेतिहासेन स्फुटयति ॥ अत्रापीति यावदध्यायसमाप्तिः ॥ अज
गरवृत्तस्य मुनेश्च ॥ ११ ॥ धरोपस्थे भूपृष्ठे सह्याद्रेस्तटे रजोभिर्धूसरैस्तनूदेशैर्देहावयवैर्निगूढममलं तेजो यस्य तं ॥ १२ ॥
कर्मादिभिर्जना यं न विदुः ॥ तं पादयोः शिरसा स्पृशन् ॥ नत्वा अप्राक्षीदिति उत्तरेणान्वयः ॥ १४ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥

५७

३ सदसतः परे कार्यकारणव्यतिरिक्ते ॥४॥ नन्वात्मानं परं ब्रह्मेति कथं सामानाधिकरण्यनिर्देशः ॥ न हि बद्धमुक्तयोरै
क्यं संभवतीति तत्राह ॥ सुषुप्ते हि तमसावृतमात्मतत्त्वं जाग्रत्स्वप्नयोस्तु विक्षिप्तं प्रकाशते ॥ संधौ तु न तमो नापि विक्षेपः ॥ अत
स्तदानात्मदृक् ॥ आत्मानं लक्षीकृत्य स्थितः सन् ॥ आत्मनो गतिं तत्त्वं पश्यन् ॥ अत एव बंधं मोक्षं मायामात्रं पश्यन्
आत्मानं परं ब्रह्म सर्वत्र पश्येदित्यन्वयः ॥ तदुक्तं योगग्रंथे ॥ निद्रादौ जागरस्यांते यो भाव उपजायते ॥ तं भावं भावयन्नि

एकश्चरेद्भिक्षुरात्मारामोऽनपाश्रयः ॥ सर्वभूतसुहृच्छान्तो नारायणपरायणः ॥३॥ पश्येदात्मन्यदो विश्वं प
रे सदसदव्यये ॥ आत्मानं च परं ब्रह्म सर्वत्र सदसन्मये ॥४॥ सुप्तप्रबोधयोः संधावात्मनो गतिमात्मदृक् ॥ पश्यन्
बंधं च मोक्षं च मायामात्रं न वस्तुतः ॥५॥ नाभिनंदेद्ध्रुवं मृत्युमध्रुवं वास्य जीवितं ॥ कालं परं प्रतीक्षेत भूतानां प्र
भवाप्ययं ॥६॥ नासच्छास्त्रेषु सज्जेत नोपजीवेत जीविकां ॥ वादवादांस्त्यजेत्तर्कान्पक्षं कं च न संश्रयेत् ॥७॥ न
शिष्याननुबध्नीत ग्रंथान्नैवाभ्यसेद्बहून् ॥ न व्याख्यामुपयुंजीत नारंभानारभेत्क्वचित् ॥८॥

त्यमुच्यते नेत्तरीय श्रुतिरिति ॥५॥ अस्य देहस्य प्रभवोप्ययश्च यस्मात्तं कालं ॥६॥ असच्छास्त्रेषु नात्मपरेषु जीविकां
नक्षत्रविद्यादिवृत्तिं वादवादान् ॥ तुल्यवितंडानिष्ठान् तर्कान् तर्कमाश्रित्य कंच कमपि पक्षं निर्वंधेन देहे
केन न संश्रयेत ॥७॥ नानुबध्नीत प्रलोभनादिना बलात्नापादयेत् ॥ आरंभान् मठादिव्यापारान् ॥८॥ रामराम

भा०स०
५९

वेदेत्यत्रहेतुः॥यस्येतिहृदिप्रविष्टःसन्अज्ञानंधुनोति॥अर्कोयथाबहिर्ध्वांतमिति॥२१॥यथाश्रुतमित्यौद्धत्यपरिहारोक्तं
२२लोककर्मसुप्रवर्त्तते॥त्वंतुनिवृत्तःसन्किंशेषइतियदुक्तंतत्राह तृष्णयेतिचतुर्भिः भवप्रवाहकारिण्यायययोनि
तैरपिविविधैः॥पूरयितुमशक्ययातृष्णयातृष्णयाकर्मसुप्रवर्त्यमानोऽहंपूर्वंनान्ययोनिषुप्रवेशितः॥२३॥तयैवेमंलोकंम
नुष्यदेहं॥यदृच्छयाप्रापितः॥कथंभूतंलोकंधर्मेणस्वर्गस्यद्वारंसाधनंअधर्मेणतिरश्चांश्वशूकरादियोनिद्वारंमिश्राभ्यां

यस्यनारायणोदेवोभगवान्हृदयंगतः॥भक्त्याकेवलयाज्ञानंधुनोतिध्वांतमर्कवत्॥२१॥अथापिब्रूमहेप्रश्नां
स्तवराजन्यथाश्रुतं॥संभाषणीयोहिभवानात्मनःशुद्धिमिच्छता॥२२॥तृष्णयाभववाहिन्यायोग्यैःकामैरपूरया॥क
र्माणिकार्यमाणोहंनानायोनिषुयोजितः॥२३॥यदृच्छयालोकमिमंप्रापितःकर्मभिर्भ्रमन्॥स्वर्गापवर्गयो
र्द्वारंतिरश्चांपुनरस्यच॥२४॥अत्रापिदंपतीनांचसुखायान्यापनुत्तये॥कर्माणिकुर्वतांदृष्ट्वानिवृत्तोस्मिविपर्ययं॥
॥२५॥सुखमस्यात्मनोरूपंसर्वेहोपरतिस्तनुः॥मनःसंस्पर्शजान्दृष्ट्वाभोगान्स्वप्स्यामिसंविशन्॥२६॥ स्व १

युताभ्यां॥पुनरप्यस्यमनुष्यत्वस्यद्वारंसर्वतोनिवृत्त्याअपवर्गस्यद्वारमित्यर्थः॥२४॥अत्रापिमनुष्यत्वेति॥अन्यापनुत्तयेदुःखनिवृत्त्यै
विपर्ययंदृष्ट्वानिवृत्तोस्मि॥२५॥प्रवृत्त्याकदाचित्सुखंस्यादपि॥निवृत्त्यातुकिंस्यादितिचेत्तत्राह॥सुखमस्यजीवस्यस्वरूपमेव
तर्हिकिंनप्रकाशतेतत्राह॥सर्वेति तनोतीतितनुः॥सर्वक्रियानिवृत्तौस्वतएवप्रकाशतइत्यर्थः॥भोगांश्चमनःसंस्पर्शजा
न्मनोरथमात्रजान्॥अशाश्वतान्॥अहठान्दृष्ट्वास्वप्स्यामीतिनिरुद्धोस्मीत्यर्थः॥तर्हिकदाचित्कथंभुंक्तेतत्राह॥संविश
न्प्रारब्धभोगान्भुंजानइत्यर्थः॥२६॥

५८

१५ ॥ उद्यमसहितस्यैव भोगवान्नियमात् पीवानं स्थूलं देहं धारयसि ॥ तत्र हेतुं वदेति तृतीयेनान्वयः ॥ १६ ॥ उद्यमं विनैव भोगोऽस्तीति
चेत्तत्राह वित्तं चेति ॥ नु इति निश्चये हः इति प्रसिद्धौ तत्वार्थो नास्तीति प्रसिद्धमेवार्थः ॥ यतोऽर्थादेव यतो हि तो ॥ पीवानं क्षमं
योग्यं चेत् ॥ १७ ॥ किंच वित्तार्जनाद्यसमर्थोऽप्ययं जनस्तदर्थमुद्यमं करोति ॥ त्वं तु समर्थोऽपि किमिति करोषीत्याह ॥ कविरिति वि-
न ॥ कल्पो दक्षः निपुणदृक् चतुरः चित्राः प्रियाः ॥ लोकरंजनाः कथा यस्य ॥ तथापि लोकस्य कर्म कुर्वतः सतः शेषे तद्वीक्षि-

तं नत्वाभ्यर्च्य विधिवत्पादयोः शिरसा स्पृशन् ॥ विवित्सुरिदमप्राक्षीन्महाभागवतोऽसुरः ॥ १५ ॥ बिभर्षि कायं पी-
वानं सोद्यमो भोगवान्यथा ॥ वित्तं चैवोद्यमवतां भोगो वित्तवतामिह ॥ भोगिनां खलु देहोऽयं पीवा भवति नान्य-
था ॥ १६ ॥ न ते शयानस्य निरुद्यमस्य ब्रह्मन्नु हार्थो यत एव भोगः ॥ अभोगिनोऽयं तव विप्र देहः पीवा यतस्तद्व-
द नः क्षमं चेत् ॥ १७ ॥ कविः कल्पो निपुणदृक् चित्रप्रियकथः समः ॥ लोकस्य कुर्वतः कर्म शेषे तद्वीक्षितापि वा ॥ १८
नारद उवाच ॥ स इत्थं दैत्यपतिना परिपृष्टो महामुनिः ॥ स्मयमानस्तमभ्याह तद्वागमृतयंत्रितः ॥ १९ ॥ ब्राह्मण
उवाच ॥ वेदेदमसुरश्रेष्ठ भवान्नन्वार्यसंमतः ॥ ईहोपरमयोर्नॄणां पदान्यध्यात्मचक्षुषा ॥ २०

तापि तत्तु सर्वे पश्यन्नपि पापांतरेण द्वेषितत्कर्मेण न हेतुः ॥ नौषि वा न वा स्तौषीत्यर्थः ॥ १८ ॥ तस्य वाचा ॥ गेवामृतं तेन
यंत्रितो वशीकृतः सन् ॥ १९ ॥ अध्यात्मचक्षुषा अंतर्दृष्ट्या भवान्वेद वेत्ति आर्याणां ज्ञानिनां संमतस्तेन त्वं भवानिद-
मिति ॥ यदुक्तं तदेवाह ॥ नृणामिहोपरमयोः प्रवृत्तिनिवृत्त्योः पदानि स्थानानि फलानीत्यर्थः ॥ २० ॥ ॥ ५५ ॥

भा० स० अतोऽनर्थहेतुत्वात् प्राणेन्द्रियार्थे च स्पृहा न कार्येत्याह ॥ शोकेति ॥ ३३ ॥ नन्वेवमनर्थोननुभवंतोऽपि न केचिद्विरज्यंते न
५५ च यथालाभेन तुष्यंति ॥ त्वं तु कथं वैराग्यादिकं प्राप्तोसि तत्राह ॥ मधुकारेति ॥ मधुमक्षिकाजगरो च पर्योः शिक्षया तत्त्वप
र्यालोचनया ॥ ३४ ॥ मधुकराच्छिक्षितमाह ॥ विराग इति ॥ वित्तपतिं हत्वाप्यन्यो वित्तं हरेदित्येवं ॥ अजगराच्छिक्षितमाह ॥ अनीह

शोकमोहभयक्रोधरागक्लैब्यश्रमादयः ॥ यन्मूलाः स्युर्नृणां जह्यात्स्पृहां प्राणार्थयोर्बुधः ॥ ३३ ॥ मधुकारमहासर्पौ लो
म २ केऽस्मिन्नो गुरूत्तमौ ॥ वैराग्यं परितोषं च प्राप्ता यच्छिक्षया वयं ॥ ३४ ॥ विरागः सर्वकामेभ्यः शिक्षितो मे मधुव्रतात् ॥ कृच्छ्रा
प्तं मधुवद्वित्तं हत्वाप्यन्यो हरेत्पतिं ॥ ३५ ॥ अनीहः परितुष्टात्मा यदृच्छोपनतादहं ॥ नो चेच्छये बह्वहानि महाहिरिव स
त्त्ववान् ॥ ३६ ॥ क्वचिदल्पं क्वचिद्भूरि भुंजेऽन्नं स्वाद्वस्वादु वा ॥ क्वचिद्भूरि गुणोपेतं गुणहीनमुत क्वचित् ॥ ३७ ॥ श्रद्धयोपहृ
तं क्वापि कदाचिन्मानवर्जितं ॥ भुंजे भुक्त्वाथ कस्मिंश्चिद्दिवा नक्तं यदृच्छया ॥ ३८ ॥ क्षौमं दुकूलमजिनं चीरं वल्क
लमेव वा ॥ वसेऽन्यदपि संप्राप्तं दिष्टभुक् तुष्टधीरहं ॥ ३९ ॥ क्वचिच्छये धरोपस्थे तृणपर्णाश्मभस्मसु ॥ क्वचित्प्रा
ग्व १ सादपर्यंके कशिपौ वा परेच्छया ॥ ४० ॥ क्वचित्स्नातोऽनुलिप्तांगः सुवासाः स्रग्व्यलंकृतः ॥ रथेभाश्वैश्चरे क्वापि दिग्वासा ग्रह

इति सत्त्ववान् धैर्यवान् ॥ ३६ ॥ पीनत्वे हेतुत्वेन यदृच्छया प्राप्तात्परितोषं प्रपंचयति ॥ क्वचिदल्पमिति षड्भिः ॥ ३७ ॥ ३८ ॥ चीरं जी
र्णवस्त्रखंडं भूर्ज्जत्वचं वा वसे परिदधे दिष्टभुक् प्रारब्धभोगी ॥ ३९ ॥ प्रसादमध्ये पर्यंके तत्रापि कशिपौ ॥ ४० ॥ चरे विचरामि क्व

५५

एवंत्वेकोपिसंसारंनप्राप्नुयादित्याह॥इत्येतदात्मनंस्वात्मकंस्वरूपंस्वार्थंस्वस्मिन्नेवसंतंपुरुषार्थंविस्मृत्य॥असत्यपि
द्वैते॥२७॥एतदेवदृष्टांतेनस्पष्टयति जलमिति तद्‌उद्भवैः तृणशैवालादिभिः॥जलकाम्ययाजलेच्छयास्वतःआत्मनःस्व
रूपादन्यत्रपुरुषार्थंपश्यन्॥२८॥एवंस्वस्यनिरूपमत्वेकारणमुक्त्वाविपर्ययंदर्शयतियदुक्तंतद्विवृणोति॥देहादिभिरिति
पंचभिः॥ईहितरूपःततः॥अनीशस्य॥निर्दैवस्यपुनःपुनःप्रारब्धाःक्रियामोघाविफलाएवभवंति॥२९॥क्रियाणांसफलत्वेपिफल

इत्येतदात्मनःस्वार्थंसंतंविस्मृत्यवैपुमान्॥विचित्रामसतिद्वैतेघोरामाप्नोतिसंसृतिं॥२७॥जलंतद्‌उद्भवैश्छन्नंहि
त्वाज्ञोजलकाम्यया॥मृगतृष्णामुपाधावेत्‌यथान्यत्रार्थदृक्स्वतः॥२८॥देहादिभिर्दैवतंत्रैरात्मनःसुखमीहतः॥
दुःखात्ययंचानीशस्यक्रियामोघाःकृताःकृताः॥२९॥आध्यात्मिकादिभिर्दुःखैरविमुक्तस्यकर्हिचित्॥मर्त्यस्यकृच्छ्रोपन
तैरर्थैःकामैःक्रियेतकिं॥३०॥पश्यामिधनिनांक्लेशंलुब्धानामजितात्मनां॥भयादलब्धनिद्राणांसर्वतोभिविशं
किनां॥३१॥राजतश्चौरतःशत्रोःस्वजनात्पशुपक्षितः॥अर्थिभ्यःकालतःस्वस्मान्नित्यंप्राणार्थवद्भयं॥३२॥

स्यानुपयोगमाह॥आध्यात्मिकादिभिरिति मर्त्यस्यमरिष्यतः॥कृच्छ्रेणदुःखेनोपनतैःप्राप्तैः॥३०॥कथंचिद्विनैवप्राप्तेप्यर्थे
दुःखंतदावश्यमित्याह॥पश्यामीति॥३१॥एवंभयंप्रपंचयतिराजत इति॥स्वस्मान्मत्तएव॥कथंचित्त्यागभोग
विस्मरणादिनानाप्रःस्यादितिप्राणवत्तामर्थवतांभयंनित्यम्॥३२॥रामरामरामरामरामरामरामरामरामरामराम

भा०स० ३॥ स्वयमेवमुच्यमानेषु वियुज्यमानेषु यथा उत्थितः पुमान्स्वप्नदृष्टेषु पुत्रादिषु संगं विमुंचति तद्वत्॥४॥ नन्वेवं
६० भक्तस्य दुर्जनैरभिभूयमानस्य कुतो गृहोचिताः क्रियाः स्युस्तत्राह यावदर्थमिति॥ अंतरनासक्तः बहिस्त्वासक्त इव नरलो-
केजनमध्ये नरतामनुष्ठातान्यसेत् पुरुषकारमाविष्कुर्यादित्यर्थः॥५॥ अयंहेतुः कापि न कुर्यादित्याह॥ ज्ञातय इति॥६॥ नन्वे-

भी१ श्रृण्वन्भगवतोऽभीक्ष्णमवतारकथामृतं॥ श्रद्दधानो यथाकालमुपशांतजनावृतः॥३॥ सत्संगाच्छनकैः संगमात्म-
जायात्मजादिषु॥ विमुच्येन्मुच्यमानेषु स्वयं स्वप्नवदुत्थितः॥४॥ यावदर्थमुपासीनो देहे गेहे च पंडितः॥ वि-
रक्तो रक्तवत्तत्र नृलोके नरतां न्यसेत्॥५॥ ज्ञातयः पितरौ पुत्रा भ्रातरः सुहृदो परे॥ यद्वदंति यदिच्छंति वा-
नुमोदेत निर्ममः॥६॥ दिव्यं भौमं चांतरिक्षं वित्तमच्युतनिर्मितं॥ तत्सर्वमुपभुंजान एतत्कुर्यात्स्वतो बुधः॥७॥
यावद्भ्रियेत जठरं तावत्स्वत्वं हि प्राणिनां॥ अधिकं योऽभिमन्येत स स्तेनो दंडमर्हति॥८॥ मृगोष्ट्रखरमर्का-
स१ खुसरीसृप्खगमक्षिकाः॥ आत्मनः पुत्रवत्पश्येत्तैरेषामंतरं कियत्॥९॥

वं सर्वाननुमोदने वित्तव्ययप्रसंगात्कुतो जीवनं कुतो वा कर्मकरणं तत्राह॥ दिव्यं वृष्ट्यादिभिर्जातं धान्यादि॥ अंतरिक्षं
अकस्मादेव प्राप्तं एवं स्वतः एव अच्युतनिर्मितं दैवलब्धं यत्॥ एतत् पूर्वोक्तं कर्मादि॥७॥ दैवाद्भूरिलाभे जाते पित्रा-
भिमानो न कार्य इत्याह॥ यावदिति म्रियेत पूर्यते॥८॥ अतएव कमपि स्वगृहं स्तेनं वा प्रविश्य भुंजानं न निवारये-
दित्याह॥ मृगेति॥ मर्को मर्कटः॥ सरीसृप् सर्पः॥ मक्षिकाश्च तैः पुत्रैः एषां मृगादीनां॥९॥ ॥ ऽऽ ॥ ॥ ॥ ऽऽ॥ ॥६०॥

न च मानापमानकर्तृषु मम वैषम्यमित्याह ॥ नाहं निंदामि महात्मनि विषमो ॥ ४२ ॥ एवं भक्तत्वेन स्थितस्तत्र उपायमाह ॥ विकल्पमि
ति द्वाभ्यां चित्तेनोभेदग्राहकमनोवृत्तौ ॥ अर्थरूपो विभ्रमो यस्मिन् ॥ वैकारिके अहंकारे अन्तुअनंतरं मे हतत्वपूरे एतत्पर्थः
॥ ४३ ॥ सत्यमेव पश्यतीत्तितथा ॥ ४४ ॥ मंदर्दृष्ट्या लोकशास्त्राभ्यां व्यपेतं न तु तत्त्वदृष्ट्या लोकशास्त्राभ्यां व्यपेतं न लतत्त्वदृष्ट्या

भू २ नाहं निंदे न च स्तौमि स्वभावविषमं जनं ॥ एतेषां श्रेय आशासे उतैकात्म्यं महात्मनि ॥ ४२ ॥ विकल्पं जुहुयाच्चि
त्तौ तां मनस्यर्थविभ्रमे ॥ मनो वैकारिके हुत्वा तं मायायां जुहोत्यनु ॥ ४३ ॥ आत्मानुभूतौ तां मायां जुहुयात्सत्यदृ
ङ्मुनिः ॥ ततो निरीहो विरमेत्स्वानुभूत्यात्मनि स्थितः ॥ ४४ ॥ स्वात्मवृत्तं मयेत्थं ते सुगुप्तमपि वर्णितं ॥ व्यपेत
लोकशास्त्राभ्यां भवान्हि भगवत्प्रियः ॥ ४५ ॥ नारद उवाच ॥ धर्मं पारमहंस्यं वै मुनेः श्रुत्वासुरेश्वरः ॥ पूजयित्वा
ततः प्रीत आमंत्र्य प्रययौ गृहं ॥ ४६ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे यतिधर्मे त्रयोदशोध्यायः ॥ १३ ॥ यु
धिष्ठिर उवाच ॥ गृहस्थ एतां पदवीं विधिना न यथांजसा ॥ याति देवऋषे ब्रूहि मादृशो गृहमूढधीः ॥ १ ॥ नारद उवा
च ॥ गृहेष्ववस्थितो राजन्क्रियाः कुर्वन्गृहोचिताः ॥ वासुदेवार्पणं साक्षादुपासीत महामुनीः ॥ २ ॥ या २

यतो भवान्भगवत्प्रियः ॥ ४५ ॥ ४६ ॥ इति सप्तमे त्रयोदशः ॥ १३ ॥ चतुर्दशे गृहस्थस्य परो धर्म ईर्यते ॥ देशकालादिभेदेन
पुनः श्रेयोविशेषकृत् ॥ गृहस्थमुल्लंघ्य मोक्षं प्रति अंतरंगत्वेन प्रथमं वनस्थयतिधर्मेष्वभिहितेषु ॥ तर्हि गृहस्थस्य
मोक्षो न स्यादिति शंकितचित्तः पृच्छति गृहस्थ इति ॥ १ ॥ तस्य मोक्षधर्मानाह गृहेष्वित्यादि यावदध्यायसमाप्तिः ॥ साक्षा

१६॥ न पुनरतिनिर्बंधो यज्ञार्थं कार्य्य इत्याह॥ नह्यीति विप्रमुखे हुतैरन्नादिभिर्यथा इज्येत॥ तथात्र अग्निमुखतो हविषा इज्ये
त॥१७॥ ब्राह्मणेषु चेदेषु पंचयज्ञदेवतास्तु मर्त्यादिषु अन्येषु पितरे तु पश्वादिषु च तत्र तत्र अंतर्यामिणं ब्राह्मणेनानुम
त्यादि यजेत ब्राह्मणे यजमानं तेरं अन्येषु यजस्व॥ पात्रोत्तरे ब्राह्मणा अन्नेयस्यत॥१८॥ प्रोष्ठपदे भाद्रपदे॥१९॥२०॥ स्व

यद्यात्मनोधिकाराद्याः सर्वाः स्युर्यज्ञसंपदः॥ वैतानिकेन विधिना अग्निहोत्रादिकं यजेत्॥१६॥ नह्यग्निमुख
तोऽयं वै भगवान्सर्वयज्ञभुक्॥ इज्येत हविषा राजन्यथा विप्रमुखे हुतैः॥१७॥ तस्माद्ब्राह्मणदेवेषु मर्त्यादि
षु यथार्हतः॥ तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं ब्राह्मणाननु॥१८॥ कुर्यादपरपक्षीयं मासि प्रोष्ठपदे द्विजः॥ श्राद्धं
पित्रोर्यथावित्तं तद्बंधूनां च वित्तवान्॥१९॥ अयने विषुवे कुर्याद्व्यतीपाते दिनक्षये॥ चंद्रादित्योपरागे
च द्वादश्यां श्रवणेषु च॥२०॥ तृतीयायां शुक्लपक्षे नवम्यामथ कार्त्तिके॥ चतसृष्वप्यष्टकासु हेमंते शि
शिरे तथा॥२१॥ माघे च सितसप्तम्यां मघाराकासमागमे॥ राकया चानुमत्या च मासर्क्षाणि युतान्यपि॥२२॥

शुक्लपक्षे वैशाखतृतीयायां अक्षय्यतृतीयायामित्यर्थः॥ हेमंते शिशिरे च मार्गशीर्षादिमासचतुष्टये पि यास्तिस्रोऽष्टका
स्तासु॥२१॥ संपूर्णचंद्रा पौर्णमासी राका॥ न्यूनचंद्रा सैवानुमतिः॥ तया मासर्क्षाणि तन्मासनामवृत्तिनिमित्ता
नि नक्षत्राणि युतानि यदा स्युः तदा तदुक्तं त्रिकांड्यां॥ पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा॥ नाम्ना स पौषो मा
घाद्याश्चैवमेकादशापरा इति॥२२॥

अतिकृच्छ्रेणापाद्य न भजेत् ॥ किंतु यावद्दैवप्रापितं तावदेव भजेत ॥ १० ॥ आनत्स्व श्वपाकपतिताः ॥ अंतेवसायिनः आः
ढलादयः ॥ तानभिव्याप्य यथायथार्हं कामान्संविभजेत् स्वभोग्यान्विभज्य दद्यात् ॥ यद्यप्येके व्ययात्मनो दारा भार्या तस्या
मतिथिशुश्रूषणे नियुक्तायां स्वस्य शुश्रूषा हीयेत ॥ तस्यां च नृणां स्वत्वग्रहः ममैवेयमित्याग्रहः ॥ तामेवात्मपि संविभजे
त् ॥ अथवा पादिशुश्रूषणे नियुंजीतेत्यर्थः ॥ नेतरेष्वथामंतत्रं वा ॥ यथार्हं संविभजेदित्युक्तत्वात् ॥ ११ ॥ एवं चेत्तेनेश्वरो वशी कृ

त्रिवर्गं नातिकृच्छ्रेण भजेत गृहमेध्यपि ॥ यथादेशं यथाकालं यावद्दैवोपपादितं ॥ १० ॥ आश्वाघांतेवसायिभ्यः
कामान्संविभजेद्यथा ॥ अप्येकामात्मनो दारां नृणां स्वत्वग्रहो यतः ॥ ११ ॥ जह्याद्यदर्थे स्वप्राणान्हन्याद्वा
पितरं गुरुं ॥ तस्यां स्वत्वं स्त्रियां जह्याद्यस्तेन ह्यजितो जितः ॥ १२ ॥ कृमिविड्भस्मनिष्ठांतं क्वेदं तुच्छं कलेवरं
क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः ॥ १३ ॥ सिद्धैर्यज्ञावशिष्टार्थैः कल्पयेद्वृत्तिमात्मनः ॥ शेषे स्वत्वं त्य
जन्प्राज्ञः पदवीं महतामीयात् ॥ १४ ॥ देवानृषीन्नृभूतानि पितॄनात्मानमन्वहं ॥ स्ववृत्त्यागतवित्तेन यजेत
पुरुषं पृथक् ॥ १५ ॥

तः स्यादित्याह ॥ यदर्थे यत्किमित्तं ॥ अन्यैरजितोपीश्वरस्तेन जित एव ॥ १२ ॥ कथमेवं ॥
न स्यात्स्वत्वाभिमानो हातुं शक्यः ॥ तत्वविचारेणेत्याह ॥ किमिविड्भस्मसु निष्ठा पर्यवसानमंते यस्य ॥ तदीयादेहापरोरति
र्यस्यां सा ॥ स्वमहिम्ना ॥ नभोपि छादयतीति तथा ॥ १३ ॥ किंच ॥ सिद्धैर्दैववल्लब्धैः ॥ यज्ञावशिष्टार्थैः ॥ पंचयज्ञशेषैरन्नादिभिः
महतां निरहंतानां ॥ १४ ॥ एतद्विवृण्वन्नाह ॥ देवादीन् पंचयज्ञदेवताः ॥ आत्मानं च ॥ एवं पृथक् पुरुषमंतर्यामिणमेव यजेत् ११०

भा॰स॰ सीतायारमस्यवाश्राश्रमंश्च आदिर्येषां ॥ द्वयोः पृथग्ग्रहणं वियोगकालाभिप्रायेण ॥ ३१ ॥ सर्वोश्रिताश्चस्थिरप्रतिमाश्रिताः
६२ पूर्वं तु शालग्रामशिलार्चनेनं उक्तमित्यपौनरुक्त्यं ॥ ३२ ॥ अत्र च एषु देशेषु ईहितः कृतः सहस्रगुणं [illegible] मधिकस्य फलस्य
उदयो यस्मात्स्मृतथा ॥ ३३ ॥ हरिरेव पात्रं निरुक्तं निर्णीतं ॥ ३४ ॥ तद्देवाह देवेषु चरस्थिरेषु च ॥ अर्हत्सु च तपोयोगादिसिद्धेषु ॥ ब्रह्मा

वाराणसी मधुपुरी पंपा विंदुसरस्तथा ॥ नारायणाश्रमो नंदा सीतारामाश्रमादयः ॥ ३१ ॥ सर्वे कुलाचला राजन्म
हेंद्रमलयादयः ॥ एते पुण्यतमा देशा हरेरर्चाश्रिताश्च ये ॥ ३२ ॥ एतान्देशान्निषेवेत श्रेयस्कामो ह्यभीक्ष्णशः ॥ ध
र्मो यत्रेहितः पुंसां सहस्राधिफलोदयः ॥ ३३ ॥ पात्रं त्वत्र निरुक्तं वै कविभिः पात्रवित्तमैः ॥ हरिरेवैक उर्वीश यन्मयं
वै चराचरं ॥ ३४ ॥ देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु ॥ राजन्यदग्रपूजायां मतः पात्रतयाच्युतः ॥ ३५ ॥ जीवराशि
भिराकीर्ण आंडकोशांघ्रिपो महान् ॥ तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणं ॥ ३६ ॥ पुराण्यनेन सृष्टानि नृतिर्य
ग्गृषिदेवताः ॥ शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ॥ ३७ ॥ तेष्वेषु भगवान्राजन् तारतम्येन वर्त्तते ॥ तस्मात्पात्रं
हि पुरुषो यावानात्मा यथेयते ॥ ३८ ॥

त्मजादिषु सनकादिष्वपि ॥ सत्सु तत्र तु दीये राजसूये ॥ यद्यस्मादच्युत एव पात्रतया संम
तः ॥ ३५ ॥ समतत्वे हेतुमाह ॥ जीवराशिभिर्व्याप्तो ब्रह्मांडकोश एव यो ऽंघ्रिपः सर्वजीवानामात्मा तेन अच्युततर्पणं ॥ ३६ ॥ एतदेव पुरुषनामनिरुक्त्याह
इयन्ति पुराणीति नृतिर्यगादिरूपाणि शरीराणि तेषु तत्त्याभिरूपेण प्रत्यगंशेन च यतः शेते ॥ अतः पुरुष इति प्रसिद्धः ॥ ३७ ॥ तारत
म्येन तिर्यगादिभ्यः पुरुषो यस्मादाधिक्येन वर्त्तते तस्मात्पुरुषः पात्रं ॥ तत्रापि यावानात्मज्ञानेनांशः यथा यथा ईयते तपआ
दियोगेन यत्र यत्र प्रतीयते ॥ तथा तथा तयासौ पात्रमित्यर्थः ॥ तथा च श्रुतिः पुरुषत्वे चाविस्तरामात्मेत्यादिः ॥ ३८ ॥ ॥ ऽऽ ॥ १ ॥ ऽऽ ॥ ६२

अनुराधाश्रवणोत्तराफाल्गुनीउत्तराषाढाउत्तराभाद्रपदा द्वादश्यां यदा स्यात् ॥ आसु तु त्रयोदशी वा यदा स्यात्
तदा च जन्मर्क्षे श्रोणायोगयुक्तं ॥ जन्मनक्षत्रस्य श्रवणस्य वा योगे न युक्तं दिनं यदा ॥ योगग्रहणं संबंधवाहुल्यार्थं ॥ २३ ॥ न केव
लं श्राद्धस्यैवैते कालाः किंतु धर्ममात्रस्येत्याह ॥ तएत इति द्वाभ्यां ॥ तदैव आयुषः अमोघं सा फलमित्यर्थः ॥ २४ ॥ २५ ॥

द्वादश्यामनुराधास्यात् श्रवणोत्तरास्त्रयः ॥ तिस्रश्चैकादशी वासु जन्मर्क्षश्रोणयोगयुक् ॥ २३ ॥ तएते श्रेयसः
कालानृणां श्रेयोविवर्द्धनाः ॥ कुर्यात्सर्वात्मनैतेषु श्रेयोमोघं तदायुषः ॥ २४ ॥ एषु स्नानं जपो होमो व्रतं देव
द्विजार्चनं ॥ पितृदेवनृभूतेभ्यो यद्दत्तं तदनश्वरं ॥ २५ ॥ संस्कारकाले जायाया अपत्यस्यात्मनस्तथा ॥ प्रेत
संस्थामृताहश्च कर्मण्याभ्युदयेन्नृप ॥ २६ ॥ अथ देशान्प्रवक्ष्यामि धर्मादिश्रेयआहवान् ॥ स वै पुण्यतमो दे
शः सत्पात्रं यत्र लभ्यते ॥ विंवं भगवतो यत्र सर्वमेतच्चराचरं ॥ २७ ॥ यत्र ह ब्राह्मणकुलं तपोविद्यादयान्वितं ॥
यत्र यत्र हरेरर्चा स देशः श्रेयसां पदं ॥ २८ ॥ यत्र गंगादयो नद्यः पुराणेषु च विश्रुताः ॥ सरांसि पुष्करादीनि क्षे
त्राण्यर्हाश्रितान्युत ॥ २९ ॥ कुरुक्षेत्रं गयशिरः प्रयागः पुलहाश्रमः ॥ नैमिषं फाल्गुनं सेतुः प्रभासोथ कुशस्थली ॥ ३० ॥

संस्कारकाल इति जायायाः पुंसवनादिः ॥ अपत्यस्य जातकर्मादि ॥ आत्मनो यज्ञदीक्षादि ॥ प्रेतसंस्था दहनादि ॥ मृताह
श्च सांवत्सरिकं यदा ॥ अन्यस्मिन्नप्यभ्युदयार्थे कर्मणि श्रेयः कुर्यादित्यनुषंगः ॥ २६ ॥ यत्र यस्मिन्सर्वमेतच्चराचरमस्ति
तस्य भगवतो विंवं रूपं सत्पात्रं च यत्र लभ्यते स वै पुण्यतमो देशः ॥ २७ ॥ अर्हैः कृत्तमैराश्रितानि ॥ २८ ॥ २९ ॥ ३० ॥ ॥ ८८ ॥

भा० स० ननु विस्तरः कुतः प्राप्तः येन निषिध्यते तत्राह ॥ स्वजनानामर्पणात् ॥ जामाता चेन्निमंत्र्यते तन्मित्रादयः कथं वर्ज्या इत्येवं प्राप्ताद्वि
६३ स्तारादित्यर्थः ॥ ६ ॥ मुन्यन्नं आरण्यं व्रीह्यादि ॥ हरिदैवतं हरये निवेदितं सत् ॥ पुरुषात्मकं ईश्वररूपं हि ॥ ७ ॥ दंडस्य न्यासः
हिंसायास्त्यागो यः ॥ एतादृशोऽन्यो नास्ति ॥ ८ ॥ अत एवोत्तमाधिकारिणो बाह्यानि कर्माणि त्यजंतीत्याह ॥ एक इति ॥ अनीहाः
द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा ॥ भोजयेत्सुसमृद्धोऽपि श्राद्धे कुर्यान्न विस्तरं ॥ ३ ॥ देशकालोचितश्रद्धाद्रव्य
पात्रार्हणानि च ॥ सम्यग्भवंति नैतानि विस्तरात्स्वजनार्पणात् ॥ ४ ॥ देशे काले च संप्राप्ते मुन्यन्नं हरिदैवतं ॥ श्रद्धया वि
धिवत्पात्रे न्यस्तं कामधुगक्षयं ॥ ५ ॥ देवर्षिपितृभूतेभ्य आत्मने स्वजनाय च ॥ अन्नं संविभजन्पश्येत्सर्वं तत्पुरु
५४ षात्मकं ॥ ६ ॥ न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित् ॥ मुन्यन्नैः स्यात्परा प्रीतिर्यथा न पशुहिंसया ॥ ७ ॥ ने
तादृशः परो धर्मो नृणां सद्धर्ममिच्छतां ॥ न्यासो दंडस्य भूतेषु मनोवाक्कायजस्य यः ॥ ८ ॥ [illegible]
एके कर्ममयान्यज्ञान् ज्ञानिनो यज्ञवित्तमाः ॥ आत्मसंयमनेऽनीहा जुह्वति ज्ञानदीपिते ॥ ९ ॥ द्रव्ययज्ञैर्यक्ष्य
८१ माणं दृष्ट्वा भूतानि बिभ्यति ॥ एष माकरुणो हन्यादतज्ज्ञो ह्यसुतृप् ध्रुवं ॥ १० ॥
निष्कामाः ॥ ज्ञानदीपिते आत्मस्फूर्तिमति ॥ आत्मसंयमने जुह्वति ॥ मनोनियमनं तदंतरायत्वात्त्यजंतीत्यर्थः ॥ तदु
क्तं सर्वेत्तस्फुरको प्रत्यक्स्फूर्तिरसंस्फूर्तिस्तनुनिष्ठानियामकं ॥ संकल्पसंत्यजेत्कर्मन्यजन्निग्रहतोऽन्यथेति ॥ ९ ॥ मा
मां एष अकरुणो हन्यादिति कुतः अकरुणः न तु कुतः ॥ असुतृप् प्राणतर्पकः ॥ ततः किं अतज्ज्ञः ॥ आत्मतत्त्वानभिज्ञः ॥ त

६३ यावच्छ्रुतिः ॥ न तं विदाथ य इमा जजानान्यद्युष्माक ॥
मंतरं बभूव ॥ नीहारेण प्रावृता जल्प्या ॥ श्चासुतृप उक्थशास
श्चरंतीति ॥ १० ॥

तर्हि प्रतिमादौ हरेः पूजां किमिति कुर्वंतीत्यत आह ॥ दृष्ट्वेति ॥ मिथो अवज्ञानमसन्मानं तस्तेनात्मत्वबुद्धिर्येषां भावं दृष्ट्वा क्रियायै पूजा
र्थी ॥३९॥ हरिमुपासते ॥ उपासिता पि अर्चा पुरुषद्वेषिणामर्थदा न भवति ॥ पुरुषेषु द्वेषं हित्वा पि ना सा पि मद्दये कारिसां पुरुषं
प्रदा भवत्येवेत्यर्थः ॥४०॥ पुरुषश्रेष्ठत्वात्तत्पश्चादिभिः पुनर्विशेषांतरमाह ॥ पुरुषेष्विति यो धत्ते तं सुपात्रं विदुः ॥४१॥
दृष्ट्वा तेषां मिथो नृणामवज्ञानात्मतां नृप ॥ त्रेतादिषु हरेरर्चा क्रियायै कविभिः कृता ॥३९॥ ततोऽर्चायां हरिं केचित्सं
श्रद्धाय सपर्यया ॥ उपासत उपास्तापि नार्थदा पुरुषद्विषां ॥४०॥ पुरुषेष्वपि राजेंद्र सुपात्रं ब्राह्मणं विदुः ॥ तपसा विद्य
या तुष्ट्या धत्ते वेदं हरेस्तनुम् ॥४१॥ नन्वस्य ब्राह्मणा राजन्कृष्णस्य जगदात्मनः ॥ पुनंतः पादरजसा त्रिलोकीं दैवतं
महत् ॥४२॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे सदाचारनिर्णये चतुर्दशोऽध्यायः ॥१४॥ नारद उवाच ॥ कर्मनि
ष्ठा द्विजाः केचित्तपोनिष्ठा नृपापरे ॥ स्वाध्यायेऽन्ये प्रवचने केचन ज्ञानयोगयोः ॥१॥ ज्ञाननिष्ठाय देयानि कव्यान्या
नंत्यमिच्छता ॥ दैवे च तदभावे स्यादितरेभ्यो यथार्हतः ॥२॥ एतदेव कैमुत्यन्यायेन द्रढयति नन्वस्येति ॥४२॥ इति स
प्तमे चतुर्दशः ॥१४॥ ततः पंचदशे सर्ववर्णाश्रमनिबंधनं ॥ सारतः संग्रहेणाथ वर्ण्यते मोक्षलक्षणं ॥ सर्वेषामपि मो
क्षधर्माणां सारसंग्रहार्थं अध्यायारंभः ॥ तत्र श्राद्धगतान्विशेषानाह ॥ कर्मनिष्ठा इति ॥ स्वाध्यायादिषु परिष्ठिता इति शे
षः ॥१॥ कव्यानि पितॄनुद्दिश्य देयानि ॥ दैवे च हव्यान्यपि तस्मै देयानि ॥ यथार्हत इति सर्वत्र ज्ञानादितारतम्येन ॥ २ ॥ ६६

गृहपालः श्वा तद्वाचरतीति ॥१८॥१९॥ क्षुधा तृषा च जनः ॥ कामस्यांतं याति ॥ अन्नोदकातिरिक्तकामांतराभावात् ॥ क्रो-
धस्य चांतं याति एतस्य क्रोधस्य यत्फलं हिंसा तस्योदयान्निष्पत्तेः ॥ दिशो जित्वापि भुवो भुक्त्वापि लोभस्य नांतं या-
तीत्यर्थः ॥२०॥२१॥ इदानीं कामादिजयोपायानाह ॥ असंकल्पादिति चतुर्भिः ॥ जयेदिति ॥ यथापेक्षमन्वेति ॥ अर्थे

असंतुष्टः केन वा राजन्न वर्त्तेतापि वारिणा ॥ औपस्थ्यजैह्व्यकार्पण्याद्गृहपालायते जनः ॥१८॥ असंतुष्ट-
स्य विप्रस्य तेजो विद्या तपो यशः ॥ स्रवंतींद्रियलौल्येन ज्ञानं चैवावकीर्यते ॥१९॥ कामस्यांतं च क्षुत्तृ-
ड्भ्यां क्रोधस्यैतत्फलोदयात् ॥ जनो याति न लोभस्य जित्वा भुक्त्वा दिशो भुवः ॥२०॥ पंडिता बहवो राजन्ब-
हुज्ञाः संशयच्छिदः ॥ सदसस्पतयोप्येके असंतोषात्पतंत्यधः ॥२१॥ असंतोषाज्जयेत्कामं क्रोधं कामवि-
वर्जनात् ॥ अर्थानर्थेक्षया लोभं भयं तत्त्वावमर्शनात् ॥२२॥ आन्वीक्षिक्या शोकमोहौ दंभं महदुपास-
या ॥ योगांतरायान्मौनेन हिंसां कायाद्यनीहया ॥२३॥ कृपया भूतजं दुःखं दैवं जह्यात्समाधिना ॥ आत्मजं
योगवीर्येण निद्रां सत्त्वनिषेवया ॥२४॥

नर्थदर्शनेन तत्त्वावमर्शनात् ॥ अद्वैतानुसंधानेन ॥२२॥ आन्वीक्षिक्या आ-
त्मानात्मविवेकेन ॥ महतां सात्विकानां सेवया ॥ योगस्यांतरायाः प्रवृत्तस्य प्रसारितकरस्य च तेजस्तेजस्विनोऽर्कस्य
हीयतेऽन्यस्य कातरायान् लोकवार्त्तादीन् ॥२३॥ येभ्यो भूतेभ्यो भयं जायेत तेष्वेव हितहिताचरणेन दैवं दैवोपसर्गनि-
मित्तं व्यथा मनःपीडादि तदुक्तं याज्ञवल्क्येन ॥ विमना विफलारंभः संसीदत्यनिमित्ततः इति ॥ आत्मजं देहजं योग-
वीर्य्येण प्राणायामादिबलेन सत्त्वनिषेवया सात्त्वि-
काहारसेवना ॥२४॥

कृपया २

प्रस्तुतमनुवर्णयति ॥ तस्मादिति ॥११॥ अधर्मवत् ॥ सात्त्वान्निषिद्धवत् ॥१२॥ क्रममनादृत्य पंचापि व्याचष्टे ॥ धर्मबाधः ॥ ध
र्मबुद्ध्यापि यस्मिन् क्रियमाणे स्वधर्मबाधः ॥ अन्यस्य चोदितोऽन्यस्य परधर्मः ॥ उपमेति व्याचष्टे ॥ उपधर्मस्त्विति शब्दस्य
भित् भेदः ॥ अन्यथा व्याख्यानं यस्मिन् ॥ यथा दशावरान् भोजयेदित्युक्ते ॥ दशभ्योऽवरान्निति ॥ श्वचूभि . दिति पाठे धर्मश

तस्माद्दैवोपपन्नेन मुन्यन्नेनापि धर्मवित् ॥ संतुष्टोऽहरहः कुर्यान्नित्यनैमित्तिकाः क्रियाः ॥११॥ विधर्मः प
रधर्मश्च आभास उपमा छलः ॥ अधर्मशाखाः पंचेमा धर्मज्ञोऽधर्मवत्त्यजेत् ॥१२॥ धर्मबाधो विधर्मः
स्यात्परधर्मोऽन्यचोदितः ॥ उपधर्मस्तु पाषंडो दंभो वा शब्दभिच्छलः ॥१३॥ यस्त्विच्छया कृतः पुंभिराभासो
ह्याश्रमात्पृथक् ॥ स्वभावविहितो धर्मः कस्य नेष्टः प्रशांतये ॥१४॥ धर्मार्थमपि नेहेत यात्रार्थं वाऽधनो धनं
अनीहानीहमानस्य महाहेरिव वृत्तिदा ॥१५॥ संतुष्टस्य निरीहस्य स्वात्मारामस्य यत्सुखं ॥ कुतस्तत्कामलो
भेन धावतोऽर्थेहया दिशः ॥१६॥ सदा संतुष्टमनसः सर्वाः शिवमया दिशः ॥ शर्कराकंटकादिभ्यो यथोपानत्पदः शि

ब्दमात्रं बिभर्तीति यथा ॥ यथा गां दद्यादित्युक्ते मरिष्यंत्या गोदानं ॥१३॥ स्वधर्मोद्दिष्टानामनंतरं ॥ धर्मेभ्यः यस्त्वार्थमपि
परधर्मो नानुष्ठेयः ॥ अनुपयोगादित्याह ॥ स्वभावविहित इति ॥१४॥ किंच ॥ अधनो धर्मार्थं धनं नेहेत ॥ नापेक्षेत ॥ धना
र्थेन व्या प्रियेतेति वा ॥ दैवोपपन्नेनैव स्वधर्मसिद्धेरुक्तत्वात् ॥ यात्रार्थमपि नेहेतेत्येतत्प्रपंचयति ॥ अनीहेति सार्द्धैः

भा० स० ६५

एवं योगं युंजतोपि यस्य कुटुंबादिसंयोगेन चित्तं विक्षिप्येत तस्य कृत्यमाह ॥ यश्चित्तेति चित्तस्य विजये यत्तः उद्युक्तः भिक्षुः
स्यात्संन्यसेत् ॥ तथा च स्मृतिः ॥ द्वंद्वाहतस्य गार्हस्थ्यं ध्यानभंगादिकारणं लक्षयित्वा गृही स्पष्टं संन्यसेदविचारयन्नि
ति भिक्षया प्राप्तं मितमशनं यस्य ॥३०॥ ऋज्वंगस्समं गं यस्य सः सुखं यथा भवत्येवमासीत ॥ ॐ मित्युच्चारयन्निति शे
षः ॥३१॥३२॥३३॥ एवमनिशमभ्यसतस्तस्य यतेश्चित्तं निर्वाणं शांतिं याति ॥३४॥ न च पुनर्विक्षिप्यतेत्याह कामादिभिर

यश्चित्तविजये यत्तः स्यान्निःसंगोपरिग्रहः ॥ एको विविक्तशरणो भिक्षुर्भैक्ष्यमिताशनः ॥३०॥ देशे शुचौ स
मे राजन्संस्थाप्यासनमात्मनः ॥ स्थिरं समं सुखं तस्मिन्नासीतर्ज्वंग ॐ मिति ॥३१॥ प्राणापानौ संरुंध्या
त्पूरकुंभकरेचकैः ॥ यावन्मनस्त्यजेत्कामान्स्वनासाग्रनिरीक्षणः ॥३२॥ यतो यतो निःसरति मनः काम
हतं भ्रमत् ॥ ततस्तत उपाहृत्य हृदि रुंध्याच्छनैर्बुधः ॥३३॥ एवमभ्यसतश्चित्तं कालेनाल्पीयसा यतेः ॥ अ
निशं तस्य निर्वाणं यात्यनिंधनवह्निवत् ॥३४॥ कामादिभिरनाविद्धं प्रशांताखिलवृत्ति यत् ॥ चित्तं ब्रह्मसुख
स्पृष्टं नैवोत्तिष्ठेत कर्हिचित् ॥३५॥ यः प्रव्रज्य गृहात्पूर्वं त्रिवर्गावपनात्पुनः ॥ यदि सेवेत तान्भिक्षुः स वै वांत्यपत्र

हेतुभिर्न यच्चित्तं तन्नोत्तिष्ठेत ॥ यतः प्रशांता अखिला वृत्तयो यस्य कुतः ब्रह्मसुखेन स्पृष्टं ॥३५॥ यस्तु प्रव्रज्य पः ॥३६॥
कृत्वापि भोगमभिलिप्सुः स्यात् ॥ तं निंदति यइति ॥ त्रयाणां धर्मादीनां वर्गः आ समंतात् उप्यते यस्मिन् तत्तस्मात् ॥ गृहात्
तान् धर्मादीन् वांताशी छर्दितभोजी निर्लज्जश्च सः ॥३६॥

रा

६५

२५॥ननुकथंगुरौभक्त्यासर्वस्यजयःस्यात्तस्यापिमनुष्यत्वेनतदवस्थत्वात्तत्राहयस्येतिमर्त्योसद्धीः॥मनुष्यइतिबु
द्धिः॥तस्यश्रुतंशास्त्रश्रवणंकुंजरस्नानवद्व्यर्थं॥२६॥ननुगुरोःपितृपुत्रादिवत्तनरसेवमन्यतेअतआह॥एषगुरुः॥साक्षाद्भग
वानेवलोकस्यनरोऽसावितिबुद्धिर्भ्रांतिरित्यर्थः॥यद्वाननुहितस्तुत्रादेर्मनुष्यबुद्ध्याप्रतीयमानेपिगुरुर्भगवान्नभवेत्त
यथैषश्रीकृष्णइत्यर्थः॥२७॥एवंसर्वैरुपायैःकामादिवेगंजित्वानियतेंद्रियोभूत्वाध्यानपरोभवेत्॥अन्यथातत्प्रतिसे

रजस्तमश्चसत्वेनसत्वंचोपशमेनच॥एतत्सर्वंगुरौभक्त्यापुरुषोह्यंजसाजयेत्॥२५॥यस्यसाक्षाद्भगवति
ज्ञानदीपप्रदेगुरौ॥मर्त्यासद्धीःश्रुतंतस्यसर्वंकुंजरशौचवत्॥२६॥एषवैभगवान्साक्षात्प्रधानपुरुषेश्व
रः॥योगेश्वरैर्विमृग्यांघ्रिर्लोकोयंमन्यतेनरं॥२७॥षड्वर्गसंयमैकांताःसर्वानियमचोदनाः॥तदंतायदिनो
योगानावहेयुःश्रमावहाः॥२८॥यथावार्तादयोह्यर्थायोगस्यार्थंनबिभ्रति॥अनर्थायभवेयुस्तेपूर्तमिष्टंतथा

वैशास्त्रवैफल्यंस्यादित्याह॥षड्वर्गेति॥सर्वाअपिनियमचोदनाःईश्वराज्ञोदिविधयः॥षडिंद्रियवर्गस्य॥सतः॥२९॥
यःसंयमः॥तस्मिन्नेवएकस्मिन्नंतोयासांतदेकपराइत्यर्थः॥नचतावतापिचरितार्थाइत्याह॥तदंताःसत्योपियदियोगा
नुधारणाध्यानसमाधीन्नोआवहेयुर्नसाधयेयुः॥केवलंश्रमावहाएवेत्यर्थः॥२८॥एतदेवसदृष्टांतमाह॥यथावा
र्तादयः॥कृष्यादयःअर्थाःतत्फलानिचयोगस्यार्थंमोक्षंनसाधयंति॥प्रत्युतअनर्थायसंसारायैव॥असतोवहिर्मुख

भा०स० प्राणादयः पंच नागः कूर्मश्च कृकरो देवदत्तो धनंजयश्चेत्येवं दशविधं प्राणमस्तं अभिमानं साहंकारं जीवं रथिनं स्व

६६ ऽहंजीवं शरं परब्रह्मलक्ष्यं ॥ यथा धनुषा शरो लक्ष्ये निपात्यते तथा प्रणवेन जीवो ब्रह्मणि निपात्यत इत्यर्थः ॥४२॥ रागा

द्या जेतव्याः शत्रवः ॥४३॥ तत्र रजो भिनिवेशः ॥ कश्चिदारूढसमाधेः ॥ सत्त्वप्रकृतेर्योपि परोपकारादि रजस्तमः शत्रवः ॥४४॥

नृकायरूपं रथं आत्मवशः उपकल्पः इंद्रियादि परोपकारो यस्मिन् तथाभूतं यावद्धत्ते ॥ तावदेव गरिष्ठानां गुरूणां चरणसे

अहं तं दश प्राणमधर्मे धर्मैश्च रेभिमानं रथिनं च जीवं ॥ धनुर्हि तस्य प्रणवं पठंति शरं तु जीवं परमेव लक्ष्यं

॥४२॥ रागो द्वेषादि लोभः शोक मोहो भयं मदः ॥ मनोवमानो सूया च माया हिंसा च मत्सरः ॥४३॥ रजः प्रमादः क्षु

न्निद्रा शत्रवस्त्वेवमादयः ॥ रजस्तमः प्रकृतयः सत्त्वप्रकृतयः क्वचित् ॥४४॥ यावन्नृकायरथमात्मवशोपकल्पं

धत्ते गरिष्ठचरणार्चनया निशातं ॥ ज्ञानासिमच्युतबलो दधदस्तशत्रुः स्वाराज्यतुष्ट उपशांत इदं विजह्यात् ॥४५॥

नोचेत्प्रमत्तमसदिंद्रियवाजिसूता नीत्वोत्पथं विषयदस्युषु निक्षिपंति ॥४६॥ प्रवृत्तं च निवृत्तं च द्विविधं

कर्म वैदिकं ॥ आवर्तेत प्रवृत्तेन निवृत्तेनाश्नुतेऽमृतं ॥४७॥ हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशांतिकं ॥ द

र्शश्च पूर्णमासश्च चातुर्मास्यं पशुः सुतः ॥४८॥

वया निशितं ज्ञानखड्गं बिभ्रत् अच्युताश्रयः सन्निरस्तः शत्रुरूपशांतः स्वानंदेन तुष्टो भूत्वा इदं रथादिकं उपेक्षेतेत्यर्थः ॥४५॥ अ

च्युताश्रयाभावे बाधकमाह नो चेदिति ॥ असंतो बहिर्मुखा ये इंद्रियवाजिनः सूताश्च ते उत्पथं प्रवृत्तिमार्गं नीत्वा विषयाख्येषु चौरेषु दस्यु

षु निक्षिपंति हयैः सूतेन च सह रथं मानं तमोधे तमसा व्याप्ते रूढं स्त्युभयं यस्मिन् ॥४६॥ ननु च वेदविहिते ष्टापूर्तादिको हि लाभः पुंसः क

थमेवमनर्थप्राप्तिः स्यादित्याशंक्य वेदोक्तकर्म एवं द्वैविध्यं दर्शयन् ॥ फलभेदमाह प्रवृत्तं चेति द्वाभ्यां ॥४७॥ हिंस्रं सेनादिकर्म अशां

तिदं ॥ अशान्तियुक्तं ॥ आदिशब्दाद्वैविवरणं दर्शश्चेति ॥ प

शुः पशुयागः सुतः सोमयागः ॥४८॥ ६६

नचेदमघटितंदृष्टत्वादित्याह यैःपूर्वंस्वदेहः अनात्मादिरूपः स्मृतः ॥ चिंतितः ॥ तएवपुनरेनमात्मेतिमत्वाश्ला
घयंतिहि ॥ ३७ ॥ यतिमुपलक्षणीकृत्यान्यानपिस्वधर्मत्यागिनोनिंदंति गृहस्थस्येतिद्वाभ्यां ॥ ३८ ॥ ३९ ॥ नन्वात्मतत्वज्ञस्यापि
इंद्रियलौल्येपिकोदोषस्तत्राह ॥ आत्मानंचेत्परंब्रह्मचेद्विजानीयात् ॥ ज्ञानेनधुतानिरस्ताआशयावासनायस्यतस्य
ज्ञानिनोलौल्यमेवनसंभवतीत्यर्थः ॥ तथाचश्रुतिः ॥ आत्मानंचेद्विजानीयादयमस्मीतिपुरुषः ॥ किमिच्छन्कस्यकामाय
यैःस्वदेहःस्मृतोऽनात्मामर्त्योविट्कृमिभस्मसात् ॥ तएनमात्मसात्कृत्वाश्लाघयंतिह्यसत्तमाः ॥ ३७ ॥ गृह
स्थस्यक्रियात्यागोव्रतत्यागोवटोरपि ॥ तपस्विनोग्रामसेवाभिक्षोरिंद्रियलौल्यता ॥ ३८ ॥ आश्रमापसदा
ह्येतेखल्वाश्रमविडंबकाः ॥ देवमायाविमूढांस्तानुपेक्षेतानुकंपया ॥ ३९ ॥ आत्मानंचेद्विजानीयात्परंज्ञा
नधुताशयः ॥ किमिच्छन्कस्यवाहेतोर्देहंपुष्णातिलंपटः ॥ ४० ॥ आहुःशरीरंरथमिंद्रियाणिहयानभीषून्म
नइंद्रियेशं ॥ वर्त्मानिमात्राधिषणांचसूतं सत्त्वंबृहद्बंधुरमीशसृष्टम् ॥ ४१ ॥
शरीरमनुसंचरेदिति ॥ ४० ॥ अज्ञस्यतुलौ
ल्येननरकपाताप्तेरप्रमत्तेनसदातत्त्वज्ञानेपतितव्यमितिद्रुतमर्थं ॥ आत्मानंरथिनंविद्धिशरीरंरथमेवचेत्या
दिश्रुत्युक्तंरथरूपकंद्वाभ्यामाह ॥ आहुरितिषड्भिः ॥ इंद्रियेशंमनोभीषून् रश्मीनाहुः ॥ मात्राशब्दादीन् ॥ वर्त्मानिगं
तव्यदेशानाहुः ॥ सत्त्वंचित्तं बृहत्देहव्यापि बंधुरंबंधनं चित्तविनाशेनिकृष्टमिवशरीरंभवति ॥ ईशसृष्टमिति
बंधनकर्त्तृत्वेपिईशएवेत्यर्थः ॥ ४१ ॥

भा० स०
६७

ऊर्मैर्दृर्शना दिसंकल्परूपे मनसि वैकारिकं विकारयुक्तं मनो वाचि विध्यादिलक्षणायां वाग्घि मनःकॢप्तं वादिवि का
रोभजति वर्णानां समाम्नाये समुदाये ॥ तद्विशेषतोप्याह चः स्वरे अकारादिस्वरत्रयात्मके ॥ ओंकारं बिंदौ तं च नादे प्राणे सूत्रात्म
नि महति ब्रह्मणि ॥ २३ ॥ अग्निरिति तत्तदभिमानिन्यो देवताः ताः प्राप्नोतीति पूर्ववत् ॥ दिवाहः शुक्लः स्वैवं तः शुक्ल
पक्षस्तं ततः यथा प्राक्प्राणे केति पुराणांतरमतं ॥ उत्तरमयनं स्वराट् ब्रह्मा ॥ एवं ब्रह्मलोकं गतस्य भोगावसाने मोक्षप्रका
रमाह ॥ विश्व इति विश्वस्थूलोपाधिः तं स्थूलं सूक्ष्मे विलाप्य ॥ सूक्ष्मोपाधिस्तैजसो भवति ॥ सूक्ष्मं च कारणे विलाप्य कारणो

इंद्रियाणि मनस्यूर्मैर्वाचि वैकारिकं मनः ॥ वाचं वर्णसमाम्नाये तमोंकारे स्वरे न्यसेत् ॥ ओंकारं बिंदौ नादे तं तं तु प्राणे
महत्यमुं ॥ २३ ॥ अग्निः सूर्यो दिवा प्राह्णः शुक्लो राकोत्तरं स्वराट् ॥ विश्वस्तैजसः प्राज्ञस्तु र्य आत्मा समन्वयात्
पूर्व ॥ देवयानमिदं प्राहुर्भूत्वा भूत्वानुपूर्वशः ॥ आत्मयाजी पशांतात्मा ह्यात्मस्थो न निवर्तते ॥ २४ ॥ य एते पितृ
देवानामयने वेदनिर्मिते ॥ शास्त्रेण चक्षुषा वेद जनस्थोपि न मुह्यति ॥ २६ ॥ आदावंते जनानां सद्बहिरंतः परावरं ॥ ज्ञानं
ज्ञेयं वचो वाच्यं तमो ज्योतिश्च यत्स्वयम् ॥ २७ ॥

पाधिः प्राज्ञो भवति कारणं च सर्वत्र साक्षित्वे नान्वयात् ॥ साक्षिस्वरूपे विलाप्य तु तुर्यो भवति तेषां च व्यभिचारेणाल्पये शुद्ध आ
त्मा भवति मुच्यत इत्यर्थः ॥ २४ ॥ य एते तेरोभूत्वा भूत्वा निवर्तते ॥ तथा न निवर्तत इत्यर्थः ॥ २५ ॥ वेदेन निर्मिते ते धूममभिसंभ
वंतीत्यादिना तेर्चिरभिसंभवंतीत्यादिना च ॥ निश्चयेन विविच्य ज्ञापिते इत्यर्थः ॥ जनस्थोपि देहस्थोपि न मुह्यति ॥ २६ ॥ तत्र
हेतुमाह ॥ आदावित्ति ॥ जनानां देहादीनां आदौ कारणत्वेन अंत्यावधित्वेन यत्सत् यावद्बहिर्भोग्यं ॥ अंतर्भोक्तृ परमवरं च ज्ञानी
चेतमोः प्रकाशः ज्योतिः प्रकाशे ॥ तत्तु सर्वमयं ज्ञानी यत्स्वयमेव न तस्माद्व्यतिरिक्तं च वस्तु किंचिदस्ति ॥ येन मुह्येदित्यर्थः ॥ ॥ ७८ ॥
६७

हुतं वैश्वदेवं प्रहुतं बलिहरणं एतत्स्वर्गमिष्टमुच्यते ॥ एतदेव यदिकामं त्र शांतिदं चेत्तर्हि प्रवृत्ताख्यमपीत्यर्थः ॥ आज्ञीयप्रमा
वि ॥ ४९ ॥ प्रवृत्तेन कर्मणा आरोहावरोहाभ्यामावृत्तिप्रकारमाह ॥ द्रव्यस्य चरुपुरोडाशादेः सूक्ष्मो विपाकः ॥ परिणामो देहांतरारंभकः ये
न संपरिष्वक्तो गच्छतीति यएवमुक्तो वपशब्देनोक्त इति तु पंचम्यामाहुतावापः पुरुषवचसो भवंतीति ॥ पाठांतरे द्रव्याशब्देन ते
जोमात्र प्राच्यो ज्ञानेंद्रियाणि ॥ कृष्णविपाकशब्देन हृदयाग्रप्रद्योतः ॥ तथाच श्रुतिः ॥ स इमास्तेजोमात्राः समभ्याददानो हृद
यमेवान्ववक्रामतीति ॥ तथा तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेनैष आत्मा निःक्रामतीति धूमादिशब्दैस्तत्तदभिमानिन्यो

एतदिष्टं प्रवृत्ताख्यं हुतं प्रहुतमेव च ॥ पूर्तं तु रात्र्या रामकूपाजीव्यादिलक्षणं ॥ ४९ ॥ द्रव्यस्य सूक्ष्मविपाक
श्च धूमो रात्रिरपक्षयः ॥ अयनं दक्षिणं सोमो दर्श दोषधिवीरुधः ॥ अन्नं रेत इति क्रमेश पितृयानं पुन
र्भवः ॥ ५० ॥ एकैकशयेनानुपूर्वं भूत्वा भूत्वेह जायते ॥ निषेकादिश्मशानांतैः संस्कारैः संस्कृतो द्विजः ॥ ५१
इंद्रियेषु क्रियायज्ञो ज्ञानदीपेषु जुह्वति ॥ ५२ ॥

देवताः ॥ तत्रापक्षयः कृष्णपक्षः सोमः सोमलोकः ॥ तत्र भुक्तभोगस्यावरोहणप्रकारमाह ॥ दर्श इति विपरीतलक्ष
णया विशिष्टभोगक्षये चन्द्रलोकाग्निना देहलये नादर्शनमश्च्यवते ॥ एतदुक्तं भवति भुक्तस्वर्गोयुक्तो धूमाद्यात्मिवाहि
कदेवताभिः सोमलोकं प्रापितस्तद्भोगावसाने विलीनदेहो वृष्टिद्वारेण पृथ्वीं वीरुधादिरूपस्य पात्रक्रमेण जायते ॥ एवं
पुनर्भवहेतुः पितृयानं प्रवृत्तकर्ममार्ग इति ॥ तमेवाह भूपते ॥ ५० ॥ पुनर्भवमेवाह ॥ एकैकशयेन प्रत्येकं क्रमेण भूत्वा
तत्सान्निध्यं प्राप्येह भूमौ जायते ॥ तत्राधिकारिणमाह निषेकादीति ॥ अन्यत्रिविष्टादिकाप्येवं जन्मनेलमेतदित्यर्थः ॥ ५१ ॥
निरस्तकर्मनिष्ठस्योपासनाविशेषमुपदिशन्नर्चिरादिमार्गेण प्राप्तिमाह ॥ इंद्रियाणीत्यादिना ॥ यज्ञा ॥ द्रव्ययज्ञे तु ॥ इह सो

भा० स०
६८

नन्ववयविनोऽभावे आगमापायिषु वाल्यादिषु। सोऽयं देवदत्त इति प्रत्यभिज्ञानं न स्यात्। तदुक्तं भट्टैः। आविर्भावतिरोभावध
र्मकेष्वनपायि यत्। तद्धर्मीति तत्राह। स्यादिति। वस्तुनः परमात्मनो विकल्पे भेदे असति। यद्वा वस्तुनोऽविद्यायाविक
ल्पेऽसति एवं विपर्ययस्तादृश्यापास्त एवेति भ्रमः स्यात्। स च तावदेव यावत्स्वविद्यानिवृत्तेः। ननु सर्वं मिथ्या चेच्छास्त्रस्य वि
धिनिषे[illegible]धज्ञाकर्यं तत्राह। स्वाप्नमध्ये जाग्रत्स्वापयचेति। ६१। इदानीमुक्तमेवाद्वैतभावनात्रयोपदेशेन द्रढीकरो

स्यात्सादृश्यभ्रमस्तावद्विकल्पे सति वस्तुनः। जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता। ६१। भावा
द्वैतं क्रियाद्वैतं द्रव्याद्वैतं यथात्मनः। वर्त्तयन्स्वानुभूत्येह त्रीन्स्वप्नान्धुनुते मुनिः। ६२। कार्यकारण
वस्त्वैक्यमर्शनं पटतन्तुवत्। अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते। ६३। यद्ब्रह्मणि परे साक्षात्सर्व
कर्मसमर्पणं। मनोवाक्तनुभिः पार्थ क्रियाद्वैतं तदुच्यते। ६४। ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ

ति। भावाद्वैतमिति चतुर्भिः। वर्त्तयन्नालोचयन्स्वानुभूत्यात्मतत्त्वानुभवेन त्रीन् जाग्रदादीन् त्रयः अवयवाः त्र
यः स्वप्ना इति श्रुतेः। यद्वा वस्तुभेदबुद्धिरेकः स्वप्नः। ततस्तत्तदधिकारभेदेन कर्मभेदबुद्धिर्द्वितीयः। ततो मत्कर्म
साधितमेतत्फलं ममैव भोग्यमिति तृतीयः। तान्धुनुते निवर्त्तयति। ६२। कार्यकारणयोर्वस्त्वैक्यस्यमर्शनं तं
तुरेव न पर इति। ६३। मनोवाक्तनुभिः कृतानां कर्मणां समर्पणं तैः समर्पणमिति वा। उद्देश्यफलभेदो हि क्रि
याभेदहेतुः। ईश्वरार्पणे च तदभावात्क्रियाणामद्वैतं। ६४।

६८

ननु तर्हि कथं पृथगर्थे तस्यापि प्रतीयन्ते तत्राह ॥ अबाधितस्तर्कविरोधे न स बत्तो बाधितोपि आभासः प्रतिबिंबादिवस्तुतया
यथा स्वतः तद्वद्देहेन्द्रियकं सर्वमर्थत्वेनाविकल्पितं न तु परमार्थतः दुर्घटत्वात् ॥ ४८ ॥ तदेवाह क्षित्यादीनां पंचभूतानां छा
यारैक्यबुद्धौ तत्व न रूपदेहादिसंघातारंभपरिणामानां मध्ये कतमापि न भवति ॥ न तावत्तेषां संघातः ॥ द्वणुकाणामिव
चतेरेकदेशाकर्षे सर्वाकर्षणानुपपत्तेः ॥ नच कस्मिंश्चित्प्रदेशे आकृष्टे सर्वे वनमाकृष्यते न च विकारा आरब्धो वयवी
अपि शब्दान्न परिणामोपि कुतः स स्वावयवेभ्यो वा परिणामतेभ्यो वा पृथक् तदन्वितो वा न तावदत्यंतं पृथक् तथात्र
अबाधितोपि ह्याभासो यथा वस्तुतया स्मृतः ॥ दुर्घटत्वादैंद्रियकं तद्वदर्थविकल्पितं ॥ ४९ ॥ क्षित्यादीनामि
हार्थानां छायानां कतमापि हि ॥ न संघातो विकारोपि न पृथङ्नान्वितो मृषा ॥ ५० ॥ धातवोवयवित्वाच्चेत
न्मात्रावयवैर्विना ॥ न स्युर्ह्यसत्यवयविन्यसन्नवयवोंततः ॥ ५१ ॥ ॥ ३३ ॥ ॥ ७ ॥ ॥ ५५ ॥ ॥ ७ ॥
तीतिः ॥ न चान्वितः ॥ स किं प्रत्यवयवं सर्वोपि अन्वेति ॥ अंशेन वा आद्ये अंगुलिमात्रेपि देहबुद्धिः स्यात् ॥ द्वितीये तस्या
प्यंशांशिकारे सत्यनवस्था स्यात् ॥ अतो मृषैवेत्यर्थः ॥ ५० ॥ एवं देहादेर्मिथ्यात्वमुक्त्वा तद्धेतूनां क्षित्यादीनामपि मिथ्या
त्वमाह ॥ धारयंतीति धातवो महाभूतानि ॥ तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युः ॥ अवयवित्वात्तेषामपि तर्ह्यवयवः सत्य
इति चेत्तत्राह ॥ उक्तप्रकारेणावयविन्यसति अवयवोऽत्यंततोऽसन्नेव स्यात् ॥ अवयविप्रतीत्यन्यथानुपपत्तिं विना
तत्सद्भावे प्रमाणाभावादित्यर्थः ॥ तदुक्तं पंचमस्कंधे ॥ एवं निरुक्तं क्षितिशब्दवृत्तमित्यादि ॥ ५१ ॥ ॥ ५५ ॥ ॥ ५५ ॥

भा०स०
६९

श्रीकृष्णसेवा महतामवज्ञेया भ्रश्यति॥ तत्कृपया च सिद्ध्यतीति दर्शयन् स्वपूर्ववृत्तांतमाह॥ अहमिति सार्द्धैः पंचभिः

अहं पुराभवं कश्चिद्गंधर्व उपबर्हणः॥ नाम्नातीते महाकल्पे गंधर्वाणां सुसंमतः॥ ६९॥ रूपपेशल माधुर्यसौगंध्यप्रियदर्शनः॥ स्त्रीणां प्रियतमो नित्यं मत्तस्तु पुरलंपटः॥ ७०॥ एकदा देवसत्रे तु गंधर्वाप्सरसां गणाः॥ उपहूता विश्वसृग्भिर्हरिगाथोपगायने॥ ७१॥ अहं च गायंस्तद्विद्वान्स्त्रीभिः परिवृतो गतः॥ ज्ञात्वा विश्वसृजस्तन्मे हेलनं शेपुरोजसा॥ ७२॥ याहि त्वं शूद्रतामाशु नष्टश्रीः कृतहेलनः॥ तावद्दास्यामहं जज्ञे तत्रापि ब्रह्मवादिनां॥ शुश्रूषयानुषंगेण प्राप्तोहं ब्रह्मपुत्रतां॥ ७३॥ धर्मस्ते गृहमेधीयो वर्णितः पापनाशनः॥ गृहस्थो येन पदवीमंजसा न्यासिनामियात्॥ ७४॥

नाम्ना उपबर्हणः॥ ६९॥ पेशलत्वं सौकुमार्य्यं॥ रूपादिभिः प्रियं दर्शनं यस्य॥ ७०॥ ७१॥ तद्गानं विद्वान् उन्मत्तः सन् गायन्
गतः॥ ७२॥ ७३॥ ७४॥॥

६९

आत्मनः स्वस्य जायादीनां च स्वार्थस्य कामस्य च तयोः॥ देहादीनां पंचभूतात्मकत्वेन भोक्तुश्च परमात्मत्वेनाभेदात्तो चनैना
र्थकामयोर्यदैक्यदर्शनमित्यर्थः॥ ६४॥ उक्तानामर्थधर्माणां संक्षिप्याह॥ यदिति॥ यद्द्वयं येनोपायेन यतः सकाशात्॥ ६६॥ प्र
स्तुतमुपसंहरति॥ एतैरिति॥ अस्य श्रीकृष्णगतिं तद्भक्तिभाक् तस्य भक्तः॥ ६७॥ एतच्च सर्वसाधारणमुक्तं॥ भक्तस्य तु भक्ति

आत्मजायासुतादीनामन्येषां सर्वदेहिनां॥ यत्स्वार्थकामयोरैक्यं द्व्याहैतं तदुच्यते॥ ६८॥ यद्यस्याच्या
निषिद्धं स्याद्येन यत्र यतो नृप॥ स तेनेहेत कार्याणि नरो नान्यैरनापदि॥ ६६॥ एतैरन्यैश्च वेदोक्तैर्वर्त
मानः स्वकर्मभिः॥ गृहेप्यस्य गतिं यायाद्राजंस्तद्भक्तिभाङ् नरः॥ ६७॥ यथा हि यूयं नृपदेव दुस्त्यजादाप
द्गणादुत्तरतात्मनः प्रभोः॥ यत्पादपंकेरुहसेवया भवानहार्षीन्निर्जितदिग्गजः क्रमात्॥ ६८॥

रेव सर्वपुरुषार्थहेतुरिति॥ पांडवानेव लक्षीकृत्याह॥ यथा हीति॥ हे नृपदेव॥ नृपेंद्रैर्वैर्दुस्त्यजादिति वा॥ आ
त्मनः श्रीकृष्णाद्देव प्रभोर्हेतोः॥ अडभाव आर्षः उत्कर्षेण तरतेत्यर्थः॥ यथा यथावत्तमेव भजतेति शेषः
यज्ञ॥ यथा आपद्गणादुत्तीर्णास्त्वं यथा च क्रतून् अहार्षीत्॥ तथा श्रीकृष्णाद्देवतारकात्संसाराद्दुत्तरमि
त्यर्थः॥ ६८॥

त्वं तु कृतार्थ एवेति हर्षेण पुनः सर्वश्लोकानेव पठति यूयमिति ॥ ७५ ॥ शेषं स्पष्टं ॥ ८० ॥ इति सप्तमे भावार्थदीपिकायां

यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियंति ॥ येषां गृहानावसतीति साक्षाद्गूढं परं ब्रह्मम
नुष्यलिंगं ॥ ७५ ॥ स वा अयं ब्रह्म महद्विमृग्यः कैवल्यनिर्वाणसुखानुभूतिः ॥ प्रियः सुहृद्वः खलु मातुले
य आत्मार्हणीयो विधिकृद्गुरुश्च ॥ ७६ ॥ न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितं ॥ मौनेन
भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ॥ ७७ ॥ श्रीशुक उवाच ॥ इति देवर्षिणा प्रोक्तं निश
म्य भरतर्षभः ॥ पूजयामास सुप्रीतः कृष्णं च प्रेमविह्वलः ॥ ७८ ॥ कृष्णपार्थावुपामंत्र्य पूजितः प्रययौ
मुनिः ॥ श्रुत्वा कृष्णं परं ब्रह्म पार्थः परमविस्मितः ॥ ७९ ॥ इति दाक्षायणीनां ते पृथग्वंशाः प्रकीर्तिताः ॥ देवा
सुरमनुष्याद्या लोका यत्र चराचराः ॥ ८० ॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
सप्तमस्कंधे प्रह्लादानुचरिते युधिष्ठिरनारदसंवादे सदाचारवर्णने नाम पंचदशोऽध्यायः ॥ १५ ॥ ❀ ॥

पंचदशोऽध्यायः ॥ १५ ॥ इति श्रीश्रीधरविरचितायां भावार्थदीपिकायां समाप्तेयं ॥ शुभमस्तु ॥ ❀ ॥ रामराम ॥